श्री

॥ राम ॥ यजुः प्रथमाष्टक प्रारंभोनास्ति ॥ राम ॥

वेद कृष्ण प्रत नोस्ति.

उँ गणानांत्वा० सादेनुप्रस्वाहा

॥श्रीगणेशायनमः॥श्रीसरस्वत्यैनमः॥श्रीगुरुचरणारविंदाभ्यांनमः॥हरिः ॐ॥
इषेत्वोर्जेत्वावायवस्थोपायवस्थदेवोवःसवितापार्पयतुश्रेष्ठतमायकर्मणआप्याय
ध्वमघ्न्याइंद्रायभागमूर्जस्वतीःपयस्वतीःप्रजावतीरनमीवाअयक्ष्मामावस्तेनईश
तमाघशंसोरुद्रस्यहेतिःपरिवोवृणक्तुध्रुवाअस्मिन्गोपतौस्यातबह्वीर्यजमान
स्यपशून्पाहि॥१॥इषेत्वाचत्वारिंशत्॥१॥यज्ञस्यघोषदसिप्रत्युष्टंरक्षःप्रत्युष्टा
अरातयःप्रेयमगाद्धिषणाबर्हिरच्छमनुनाकृतास्वधयावितष्टातआवहंतिकव
यःपुरस्ताद्देवेभ्योजुष्टमिहबर्हिरासदेदेवानांपरिषूतमसिवर्षवृद्धमसिदेवबर्हिर्मा

१ तान्वङ्ग्नानिर्यक्पर्वतेराध्यासमाञ्छेत्तानेमारिषंदेवबर्हिःशतवल्शंविरोहसहस्र
वल्शाः॥१॥विवयंरुहेमपृथिव्याःसंपृचःपाहिसुसंभृतात्वासंभराम्यदित्यैरा १
स्नासीन्द्राण्यैसन्नहनंपूषातेग्रंथिंग्रथ्नातुसतेमास्थादिन्द्रस्यत्वाबाहुभ्यामुद्य
च्छेबृहस्पतेर्मूर्ध्नाहराम्युर्वन्तरिक्षमन्विहिदेवंगमनमसि॥२॥सहस्रवल्शास्त्रुष्टा
त्रिंःशाञ्च॥३॥शुंधध्वंदैव्यायकर्मणेदेवयज्यायैमातरिश्वनोघर्मोसिद्यौरसि
पृथिव्यसिविश्वधायाअसिपरमेणधाम्नादृंहस्वमाह्वार्वसूनांपवित्रमसिश
तधारंवसूनांपवित्रमसिसहस्रधारंहुतस्तोकोहुताद्रप्सोग्नयेबृहतेनाकं

युस्वाहाद्यावापृथिवीभ्यांᳬसाविश्वायुःसाविश्वव्यचाःसाविश्वकर्मासंपृच्यध्व
मृतावरीरूर्मिणीर्मधुमत्तमामंद्राधनस्यसातयेसोमेनत्वातनच्मींद्रायदधि
विष्णोहव्यंᳬरक्षस्व॥१॥सोमेनाष्टोच॥२॥कर्मणेवांदेवेभ्यः [illegible] शकेयं
वेषायत्वाप्रत्युष्टंᳬरक्षःप्रत्युष्टाअरातयोधूरसिधूर्वधूर्वंतंधूर्वतंयोस्मान्धूर्व
तितंधूर्वयंवयंधूर्वामस्त्वंदेवानामसिसस्नितमंपप्रितमंजुष्टतमंवन्हितमंदे
वहूतममह्रुतमसिहविर्धानंदृंᳬहस्वमाह्वार्मित्रस्यत्वाचक्षुषाप्रेक्षेमाभेर्मा
संविक्थामात्वा॥१॥हिंᳬसिषमुरुवातायदेवस्यत्वासवितुःप्रसवेश्विनोर्बाहु

२ भ्यांपूष्णोहस्ताभ्यामग्नयेजुष्टंनिर्वपाम्यग्नीषोमाभ्यामिदंदेवानामिदमुनः
सहस्फात्यैत्वानारात्यैसुवरभिविख्येषंवैश्वानरंज्योतिर्दृंहन्तांदुर्याद्यावापृ
थिव्योरुर्वन्तरिक्षमन्वित्यदित्यास्त्वोपस्थेसादयाम्यग्नेहव्यंरक्षस्व॥१॥मा
त्वाषट्त्वे   त्वारिङ्खाञ्च॥२॥देवोवःसवितोत्पुनात्वच्छिद्रेणपवित्रेणवसोःसू
र्यस्यरश्मिभिरापोदेवीरग्रेपुवोग्रेगुवोग्रइमंयज्ञंनयताग्रेयज्ञपतिंधत्त
युष्मानिन्द्रोवृणीतवृत्रतूर्येयूयमिन्द्रमवृणीध्वंवृत्रतूर्येप्रोक्षितास्थाग्नयेवो
जुष्टंप्रोक्षाम्यग्नीषोमाभ्यांःसुंधध्वंदैव्यायकर्मणेदेवयज्यायायाश्चवोधृतःर

क्षोवधूता अरातयो दित्यास्त्वगसि प्रति त्वा ॥ १ ॥ पृथिवी वेत्त्वधिषवणमसि वा
त्वग्ने नस्पत्यं प्रति त्वादित्यास्त्वग्वेत्त्वग्नेस्तनूरसि वाचो विसर्जनं देववीतये त्वा गृह्णाम्य
द्रिरसि वानस्पत्यः स इदं देवेभ्यो हव्यं सुशमि शमिष्वेषमावदोर्जमावद द्यु
मद्वदत वयं संघातं जेष्म वर्षवृद्धमसि प्रति त्वा वर्षवृद्धं वेत्तु परापूतं रक्षः प
रापूता अरातयो रक्षसां भागोऽसि वायुर्वो विविनक्तु देवो वः सविता हिरण्य
पाणिः प्रतिगृह्णातु ॥ ३ ॥ त्वाभागरकादन्नाच ॥ ५ ॥ अवधूतं रक्षोवधूता अ
रातयो दित्यास्त्वगसि प्रति त्वा पृथिवी वेत्तु दिवः स्कम्भनिरसि प्रति त्वादित्यास्त्व

३ वेत्तुधिषणासिपर्वत्याप्रतित्वा प्रतित्वा दिवस्कंभनिर्वेत्तुधिषणासिपार्वतेयी १
प्रतित्वापर्वतिर्वेत्तुदेवस्यत्वासवितुःप्रसवेश्विनोर्बाहुभ्यांपूष्णोहस्ताभ्याम
धिवपामिधान्यमसिधिनुहिदेवान्प्राणायत्वापानायत्वाव्यानायत्वादीर्घा
मनुप्रसितिमायुषेधांदेवोवःसविताहिरण्यपाणिःप्रतिगृभ्णातु॥ १ ॥ प्रा
पायेत्वापंचेदन्नान्व॥ ८ ॥ धृष्टिरसिब्रह्मयच्छापाग्नेग्निमामादंजहिनिष्क्र
व्यादꣳसेधादेवयजंवहनिर्दग्धꣳरक्षोनिर्दग्धाअरातयोध्रुवमसिपृथिवीं
दृꣳहायुर्दृꣳहप्रजांदृꣳहसजातानस्मैयजमानायपर्यूहधर्त्रमस्यंतरिक्षं

दृꣳहप्राणंदृꣳहापानंदृꣳहसजातानस्मैयजमानायपर्यूहधरुणमसिदिवं
ह दृꣳहचक्षुः॥१॥ दृꣳहश्रोत्रंदृꣳहसजातानस्मैयजमानायपर्यूहधर्मासिदिशो
दृꣳहयोनिंदृꣳहप्रजांदृꣳहसजातानस्मैयजमानायपर्यूहचितस्थप्रजाम
स्मैरयिमस्मैसजातानस्मैयजमानायपर्यूह॥ भृगूणामंगिरसांतपसात
प्यध्वंयानिघर्मेकपालान्युपचिन्वंतिवेधसः॥ पूष्णस्तान्यपिव्रतइंद्रवायू
विमुंचतां॥२॥ चक्षुरस्याचत्वारिꣳशाच्च॥७॥ संवपामिसमापोअद्भिरग्मत
समोषधयोरसेनसꣳरेवतीर्जगतीभिर्मधुमतीर्मधुमतीभिःसृज्यध्वमद्भ्यः

४ परिप्रजातास्थसमद्भिःपृच्यध्वंजनयत्यैत्वासंयौम्यग्नयेत्वाग्नीषोमाभ्यां
मखस्यशिरोसिघर्मोसिविश्वायुरुरुप्रथस्वोरुतेयज्ञपतिःप्रथतांत्वचं १
गृह्णीष्वांतरितंरक्षोंतरिताअरातयोदेवस्त्वासविताश्रपयतुवर्षिष्ठेअधि
नाकेग्निस्तेतनुवंमातिधागग्नेहव्यंरक्षस्वसंब्रह्मणापृच्यस्वैकतायस्वा
हाद्वितायस्वाहात्रितायस्वाहा॥१॥सविताद्वाविंशतिश्च॥८॥आददइं
द्रस्यबाहुरसिदक्षिणःसहस्रभृष्टिःशततेजावायुरसितिग्मतेजाःपृथि
विदेवयजन्योषध्यास्तेमूलंमाहिंसिषमपहतोररुःपृथिव्यैव्रजंगच्छगो

स्थानंवर्षंतुतेद्यौर्बधानदेवसवितःपरमस्यांपरावतिशतेनपाशैर्योस्मान्द्वेष्टि
यंचवयंद्विष्मस्तमतोमामौगपहतोररुःपृथिव्यैदेवयजन्यैव्रजं॥१॥गछगो
स्थानंवर्षंतुतेद्यौर्बधानदेवसवितःपरमस्यांपरावतिशतेनपाशैर्योस्मान्द्वेष्टियं
चवयंद्विष्मस्तमतोमामौगपहतोररुःपृथिव्याअदेवयजनाद्व्रजंगछगोस्था
नंवर्षंतुतेद्यौर्बधानदेवसवितःपरमस्यांपरावतिशतेनपाशैर्योस्मान्द्वेष्टियं
चवयंद्विष्मस्तमतोमा॥२॥मौगररुस्तेदिवंमास्कान्वसवस्त्वापरिगृह्णंतुगा
यत्रेणछंदसारुद्रास्त्वापरिगृह्णंतुत्रैष्टुभेनछंदसादित्यास्त्वापरिगृह्णंतुजाग

५४ तेनछंदसादेवस्यसवितुःसवेकर्मकृण्वंतिवेधसंकृतमस्यृतसदनमस्यृत
श्रीरसिधात्र्यसिस्वधात्र्यसुर्वीचासिवस्वीचासिपुराक्रूरस्यविसर्पोविर
प्शिन्नुदादायपृथिवींजीरदानुर्यामैरयंचंद्रमासिस्वधाभिस्तांधीरासोअ
नुदृश्यंयजंते॥३॥देवयज्न्यैब्रजांतन्वामाविर प्शिन्नकोदग्राच॥१॥प्र म४
त्युष्टंरक्षःप्रत्युष्टाअरातयोनिर्वृस्तेजिष्टेनतेजसानिष्टपामिगोष्ठंमानिर्मृ
क्षंवाजिनंत्वासपत्नसाहंसंमार्ज्मिवाचंप्राणंचक्षुःश्रोत्रंप्रजांयोनिंमा
निर्मृक्षंवाजिनीत्वासपत्नसाहींसंमार्ज्म्याशासानासौमनसंप्रजांसौ

भाग्यंतनूं॥ अग्नेरनुव्रताभूत्वासंनह्येसुकृतायकं॥ सुप्रजसस्त्वावयंसु
पत्नीरुप॥१॥ दिसेम॥ अग्नेसपत्नदंभनमदब्धासोअदाभ्यं॥ इमंवरुणस्य विष्यामि
पाशंयमबध्नीतसवितासुकेतः॥ धातुश्चयोनौसुकृतस्यलोकेस्योनंमेस
हपत्याकरोमि॥ समायुषासंप्रजयासमग्नेवर्चसापुनः॥ संपत्नीपत्याहंग
छेसमात्मातनुवामम॥ महीनांपयोस्योषधीनांरसस्यतेक्षीयमाणस्य स्त
निः॥२॥ वपामिमहीनांपयोस्योषधीनांरसोदब्धेनत्वाचक्षुषावेक्षेसु
प्रजास्त्वायतेजोसितेजोनुप्रेह्यग्निस्तेतेजोमाविनैदग्नेर्जिह्वासिसुभूर्दे

६ वानांधाम्नेधाम्नेदेवेभ्योयजुषेयजुषेभवश्शुक्रमसिज्योतिरसितेजोसिदे
वोवःसवितोत्पुनात्वच्छिद्रेणपवित्रेणवसोःसूर्यस्यरश्मिभिःशुक्रंत्वाशुक्रा १
यांधाम्नेधाम्नेदेवेभ्योयजुषेयजुषेगृह्णामिज्योतिस्त्वाज्योतिष्यर्चिस्त्वार्चि
षिधाम्नेधाम्नेदेवेभ्योयजुषेयजुषेगृह्णामि॥३॥उपनीरश्मिभिःशुक्रंषो
ढ्शाच॥१०॥कृष्णोस्याखरेष्ठोग्नयेत्वास्वाहावेदिरसिबर्हिषेत्वास्वाहाबर्हि
स्वा २ बेरसिस्रुग्भ्यस्त्वाहादिवेत्वांतरिक्षायत्वापृथिव्यैत्वास्वधापितृभ्यऊर्ग्भव
बर्हिषद्भ्यऊर्जापृथिवींगच्छतविष्णोस्तूपोसूर्णाम्रदसंत्वास्तृणामिस्वास

स्कंदेवेभ्योगंधर्वोसिविश्वावसुर्विश्वस्मादीषतोयजमानस्यपरिधिरिडईडितइं
द्रस्यबाहुरसि॥१॥दक्षिणोयजमानस्यपरिधिरिडईडितोमित्रावरुणौत्वोत्तर
तःपरिधत्तांध्रुवेणधर्मणायजमानस्यपरिधिरिडईडितःसूर्यस्त्वापुरस्तात्पातु
कस्याश्चिदभिशस्त्यावीतिहोत्रंत्वाकवेद्युमंतꣳसमिधीमह्यग्नेबृहंतमध्वरे
विश्वोयंत्रेस्थोवसूनाꣳरुद्राणामादित्यानाꣳसदसिसीदजुहूरुपभृद्ध्रुवासि
घृताचीनाम्नाप्रियेणनाम्नाप्रियेसदसिसीदैताअसदन्त्सुकृतस्यलोकेता
विष्णोपाहिपाहियज्ञंपाहियज्ञपतिंपाहिमांयज्ञनियं॥२॥बाहुरसिप्रियेसद

सं॰प्र॰

८

ह्वा १ सिपंचत्र॥११॥भुवनमसिविप्रथस्वाग्नेयष्टरिदंनमः॥जुह्वेह्यग्निस्त्वाह्वयति

सविता २ देवयुज्यायाउपभृदेहिदेवस्त्वाह्वयतिदेवयुज्यायाअग्नाविष्णूमावामवक्रमि

षंविजिहाथांमामासंतांसंलोकंमेलोककृतौकृणुतंविष्णोःस्थानमसीत

इंद्रोअकृणोद्वीर्याणिसमारभ्योर्ध्वोअध्वरोदिविस्पृशमह्रुतोयज्ञोयज्ञ

पतेरिंद्रावान्त्स्वाहाबृहद्भाःपाहिमाग्नेदुश्चरिताद्दामासुचरितेभजमखस्य

शिरोसिसंज्योतिषाज्योतिरक्तां॥३॥अङ्कुलएकविंशतिश्च॥१२॥वाजस्य

माप्रसवेनोद्ग्राभेणोदग्रभीत्॥अथासपत्नाँइंद्रोमेनिग्राभेणाधराँअकः॥

॥८॥

उद्ग्राभंचनिग्राभंचब्रह्मदेवाअवीवृधन्॥ अथासपत्नानिंद्राग्नीमेविषूचीनान्व्य
स्यतां॥ वसुभ्यस्त्वारुद्रेभ्यस्त्वादित्येभ्यस्त्वाक्तꣳरिहाणावियंतुवयः॥ प्रजांयोनिं
मानिर्मृक्षमाप्यायंतामापओषधयोमरुतांपृषतयस्थदिवं॥१॥ गच्छततोनावृष्टि
मेरय॥ आयुष्पाअग्नेस्यायुर्मेपाहिचक्षुष्पाअग्नेसिचक्षुर्मेपाहिध्रुवासियंपरि
धिंपर्यधत्थाअग्नेदेवपणिभिर्वीयमाणः॥ तंतएतमनुजोषंभरामिनेदेषत्वदप
चेतयातैयज्ञस्यपाथउपसमितꣳसꣳस्रावभागास्थेषाबृहंतःप्रस्तरेष्ठाबर्हि
षदश्च॥२॥ देवाइमांवाचमभिविश्वेगृणंतआसद्यास्मिन्बर्हिषिमादयध्वम्

८ मेर्वीमपंनगृहस्यसदसिसादयामिसुम्नायसुम्निनीसुम्नेमाधत्तंधुरिधुर्यौ
पातमग्नेदब्धायोशीततनोपाहिमाद्यदिवःपाहिप्रसित्यैपाहिदुरिष्ट्यैपाहिदु डु
र्मन्यैपाहिदुश्चरितादविषंनःपितुंकृणुसुषदायोनिःस्वाहादेवागातुविदो
गातुंवित्त्वागातुमित मनसस्पतइमंनोदेवदेवेषुयज्ञंस्वाहावाचिस्वा
हावातेधाः॥२॥दिवंचविलागातुंचयोदस्रात॥१२॥उभावामिंद्राग्नीआहु
वध्याउभाराधसःसहमादयध्यै॥उभादातारविषांरयीणामुभावाजस्य
सातयेहुवेवां॥अश्वैवद्भिर्दिवावंन्तरावांविजामातुरुतवाघास्यालात॥अ

धासोमस्यप्रयतीयुवभ्यामिंद्राग्नीस्तोमंजनयामिनव्यं॥इंद्राग्नीनवतिंपुरो
दासपत्नीरधूनुतं॥साकमेकेनकर्मणा॥शुचिंनुस्तोमंनवजातमद्येंद्राग्नी
वृत्रहणाजुषेथां॥१॥उभाहिवांसुहवाजोहवीमितावाजंसद्यउशतेधेष्ठा
॥वयमुत्वापथस्पतेरथंनवाजसातये॥धियेपूषन्नयुज्महि॥पथस्पथःपरि
पतिंवचस्याकामेनकृतोअभ्यानडर्कं॥सनोरासच्छुरुधश्चंद्राग्राधियंधियं
सीषधातिप्रपूषा॥क्षेत्रस्यपतिनावयंहितेनेवजयामसि॥गामश्वंपोष
यित्न्वासनः॥२॥मृळातीदृशे॥क्षेत्रस्यपतेमधुमंतमूर्मिंधेनुरिवपयोअस्म

१ स्मासुधुक्ष्व॥ मधुश्चुतंघृतमिवसुपूतमृतस्यनःपतयोमृडयंतु॥ अग्नेनय
सुपथारायेअस्मान्विश्वानिदेववयुनानिविद्वान्॥ युयोध्यस्मज्जुहुराण
मेनोभूयिष्ठांतेनमउक्तिंविधेम॥ आदेवानामपिपंथामगन्मयच्छक्नवाम
तदनुप्रवोढुं॥ अग्निर्विद्वान्त्सयजात्॥ २॥ सेदुहोतासोअध्वरान्त्सऋतून्
कल्पयाति॥ यद्वाहिष्ठंतदग्नयेबृहदर्चविभावसो॥ महिषीवत्वद्रयिस्त्वद्वा
जाउदीरते॥ अग्नेत्वंपारयानव्योअस्मान्त्स्वस्तिभिरतिदुर्गाणिविश्वा॥ पू
श्चपृथ्वीबहुलानउर्वीभवातोकायतनयायशंयोः॥ त्वमग्नेव्रतपाअसि

सिदेवआमर्त्येष्वा॥ त्वंयज्ञेष्वीड्यः॥ यद्वोवयंप्रमिनामव्रतानिविदुषांदे
वाअविदुष्टरासः॥ अग्निष्टद्विश्वमापृणातिविद्वान्येभिर्देवाँऋतुभिःक
३८
ल्पयाति॥४॥ जुषथामासनोयज्ञादानर्योविःग्रातिश्च॥१४॥ इषेत्वायज्ञ
स्यघुंधंधुंकर्मणेवांदेवोवधृतंधृष्टिःसंवपाम्याददेप्रत्युष्टंरक्षोभुवनम सि
सिवाजस्याभावांचतुर्दन्ना ॥१४॥ इषेदंःहंभुवनमुष्टाविःग्रातिः॥२५॥
हरिः ॐम्॥ ॥ ॥६॥ ॥ ॥ ॥ ॥७॥ हरि ॐम्॥ आपउंदंतुजीवसेदीर्घायुत्वा
यवर्चसओषधेत्रायस्वैनंःस्वधितेमैनंःहिंःसीर्देवश्रूरेतानिप्रवपेस्व

१० सूत्राण्यनुष्ठीयापोअस्मान्मातरःशुंधंतुघृतेननोघृतप्वःपुनंतुविश्वम
स्मत्प्रवहंतुरिप्रमुदाभ्यःशुचिरापूतएमिसोमस्यतनूरसितनुवंमेपाहि १
महीनांपयोसिवर्चोधाअसिवर्चः॥१॥मयिधेहिवृत्रस्यकनीनिकासि
चक्षुष्पाअसिचक्षुर्मेपाहिचित्पतिस्त्वापुनातुदेवस्त्वासवितापुनात्वच्छिद्रे
णपवित्रेणवसोःसूर्यस्यरश्मिभिःतस्यतेपवित्रपतेपवित्रेणयस्मैकंपु
नेतच्छकेयमावोदेवासईमहेसत्यधर्माणोअध्वरेयद्वोदेवासआगुरेयज्ञि आ
यासोहवामहइंद्राग्नीद्यावापृथिवीआपओषधीस्त्वंदीक्षाणामधिपति ॥१०॥

रसीहमासंतपाहि॥२॥वर्च्चोओषधीरष्टोर्च्च॥१॥आकूत्यैप्रयुजेग्नयेस्वाहा
मेधायैमनसेग्नयेस्वाहादीक्षायैतपसेग्नयेस्वाहासरस्वत्यैपूष्णेग्नयेस्वा
हापोदेवीर्बृहतीर्विश्वशंभुवोद्यावापृथिवीउर्वंतरिक्षंबृहस्पतिर्नोहविषा
वृधातुस्वाहा [illegible] वि श्वेदेवस्यनेतुर्मर्त्तोवृणीतसख्यंविश्वेरायइषुध्यसि
द्युम्नंवृणीतपुष्यसेस्वाहाऋक्सामयोःशिल्पेस्थस्तेवामारभेतेमा॥१॥पातमा
स्ययज्ञस्योदृचंइमांधियंशिक्षमाणस्यदेवक्रतुंदक्षंवरुणसंशिशा
धिययातिविश्वादुरितातरेमसुतर्माणमधिनावंरुहेमागीस्यांगिरस्यू

११ पीमृदाऊर्जंमेयच्छपाहिमामामाहिंसीर्विष्णोःशर्मासिशर्मयजमानस्यश
र्मंमेयच्छनक्षत्राणांमातीकाशात्पाहींद्रस्ययोनिरसि॥२॥मामाहिंसीः २
कृष्यैत्वासुसस्यायैसुपिप्पलाभ्यस्त्वौषधीभ्यःसूपस्थादेवोवनस्पतिरूर्ध्वो
मापाह्योदृचःस्वाहायज्ञंमनसास्वाहाद्यावापृथिवीभ्यांस्वाहोरोरंतरिक्षा
त्स्वाहायज्ञंवातादारभे॥३॥मायोनिरसिचिंःमूत्रं॥दैवींधियंमनामहे
सुमृडीकामभिष्टयेवर्चोधांयज्ञवाहसंःसुपारानोअसद्वशे॥४॥येदेवामनो
जातामनोयुजःसुदक्षादक्षपितारस्तेनःपांतुतेनोवंतुतेभ्योनमस्तेभ्यःस्वा

हाग्नेत्वंःसुजागृहिवयंःसुमंदिषीमहिगोपायनःस्वस्तयेप्रबुधेनःपुनर्ददः॥त्वम
ग्नेव्रतपाअसिदेवआमर्त्येष्वा॥त्वं॥१॥यज्ञेष्वीड्यः॥विश्वेदेवाअभिमाँवृत्रन्पू मा
षासन्यासोमोराधसादेवःसविताववसोर्वसुदावारास्वेयत्सोमाभूयोभरमापृ
णन्पूर्त्याविराधिमाहमायुषाचंद्रमसिममभोगायभववस्त्रमसिममभोगायभ
वोस्रासिममभोगायभवहयोसिममभोगायभव॥२॥छागोसिममभोगाय
भवमेषोसिममभोगायभववायवेत्वावरुणायत्वानिर्ऋत्यैत्वारुद्रायत्वादे
देवीरापोअपांनपाद्यऊर्मिर्हविष्यइंद्रियावान्मदिंतमस्तंवोमावक्रमिषमच्छि

१२ नंतंत्वंपृथिव्याअनुगेषंभद्रादभिश्रेयःप्रेहिबृहस्पतिःपुरएतातेअस्त्वथेमवस्य
वरआपृथिव्याआरेशत्रूंकृणुहिसर्ववीरःएदमगन्मदेवयजनंपृथिव्याविश्वे २
८ देवायदजुषंतपूर्वऋक्सामाभ्यांयजुषासंतरंतोरायस्पोषेणसमिषामदेम
॥२॥ आलंदृष्ट्योसिममभोगायमवस्यपंचविंशतिश्च॥२॥इयंतेशुक्रतनू
रिदंवर्चस्तयासंभवभ्राजंगच्छजूरसिधृतामनसाजुष्टाविष्णवेतस्यास्तेसत्य
सवसःप्रसवेवाचोयंत्रमशीयस्वाहाशुक्रमस्यमृतमसिवैश्वदेवंहविःसूर्य
स्यचक्षुरारुहमग्नेरक्ष्णःकनीनिकांयदेतशेभिरीयसेभ्राजमानोविपश्चिता

चिदसिमनासिधीरसिदक्षिणा॥१॥ आसियज्ञियासिक्षत्रियास्यदितिरस्युभ
यतःशीर्ष्णीसानःसुप्राचीसुप्रतीचीसंभवमित्रस्त्वापदिबध्नातुपूषाध्वनः
पात्विंद्रायाध्यक्षायानुत्वामातामन्यतामनुपितानुभ्रातासगर्भ्योनुसखा
सयूथ्यःसादेविदेवमच्छेहींद्रायसोमंरुद्रस्त्वावर्त्तयतुमित्रस्यपथास्वस्तिसो
मसखापुनरेहिसहरय्या॥२॥दक्षिणासोमसखापंचच॥४॥वस्व्यसिरुद्रा
स्यदितिरस्यादित्यासिशुक्रासिचंद्रासिबृहस्पतिस्त्वासुम्नेरण्वतुरुद्रोवसु
भिराचिकेतुपृथिव्यास्त्वामूर्धन्नाजिघर्मिदेवयजनइडायाःपदेघृतवति॥

सं॰अ॰२ मियोऽस्मान्द्वेष्टियंचवयंद्विष्मइदमस्यग्रीवाँअपिकृंता २

१३ स्वाहापरिलिखितंरक्षःपरिलिखिताअरातयइदमहंरक्षसोग्रीवाँअपिकृं अ
तौम्यस्मेरायस्त्वेरायस्तोतेरायःसंदेविदेव्योर्वश्यापश्यस्वत्वष्टीमतीतेसपे २
यसुरेतारेतोदधानावीरंविदेयतवसंदृशिमाहंरायस्पोषेणवियोषं॥ २ ॥
अस्यग्रीवाएकान्नचिंत्राच्च॥५॥ अंशुनातेअंशुःपृच्यतांपरुषापरु
र्गंधस्तेकाममवतुमदायरसोअच्युतोमात्योसिशुक्रस्तेग्रहोभित्यंदेवंस
वितारमूण्योःकविक्रतुमर्चामिसत्यसवंसरत्नधामभिप्रियंमतिमूर्ध्वाय
स्यामतिर्भाअदिद्युतत्सवीमनिहिरण्यपाणिरमिमीतसुक्रतुःकृपास्वः॥

१३

जाभ्यंस्त्वाप्राणायत्वाव्यानायत्वाप्रजास्त्वमनुप्राणिहिप्रजास्त्वामनुप्राणंतु
॥१॥ अनुसप्तचं॥६॥ सोमंतेक्रीणाम्यूर्ज्जस्वंतंपयस्वंतंवीर्यावंतमभिमातिषा
हं। शुक्रंतेशुक्रेणक्रीणामिचंद्रं चंद्रेणामृतममृतेनसम्मग्तेगोरस्मेचंद्राणित
पसस्तनूरसिप्रजापतेर्वर्णस्तस्यास्तेसहस्रपोषंपुष्यंत्याश्चरमेणपशु ना
क्रीणाम्यस्मेतेबंधुर्मयितेरायः श्रयंतामस्मेज्योतिः सोमविक्रयिणितमो
मित्रोनएहिसुमित्रधाइंद्रस्योरुमाविशदक्षिणमुशन्नुशंतं स्योनःस्योनं
स्वानभ्राजांघारेबंभारेहस्तसुहस्तकृशानवेतेवःसोमक्रयणास्तान्रक्षध्वं

१४ मावोदेष्मन्॥३॥ उरुंद्दाविं गातिश्वा॥७॥ उदायुषास्वायुषोदोषधीनांरसेनो
त्पर्जन्यस्यशुष्मेणोदस्थाममृतांअनु॥ उर्वंतरिक्षमन्विह्यदित्याःसदोस्य 2
दित्याःसदआसीदास्तभ्नाद्यामृषभोअंतरि क्षौरिमाणंपृथिव्याआसीद्वि
श्वाभुवनानिसम्राड्विश्वेत्तानिवरुणस्यव्रतानिवनेषुव्यंतरिक्षंततानवाज
मर्वत्सुपयोअघ्नियासुहृत्सु॥१॥ क्रतुंवरुणोविक्ष्वग्निंदिविसूर्यमदधात्सो
ममद्राबुदुत्यंजातवेदसंदेवंवहंतिकेतवः॥ दृशेविश्वायसूर्यं॥ उस्रावेतंधूर्षा
हावनश्रूअवीरहणौब्रह्मचोदनौवरुणस्यस्कंभनमसिवरुणस्यस्कंभसर्जं

स्य

नमस्मित्रस्यस्तोवरुणपात्राः॥२॥ हृत्सुपंचेतिः॥न्वं॥८॥ प्रच्यवस्वभुवस्प
तेविश्वान्यभिधामानिमात्वापरिपरिणोविदन्मात्वापरिपंथिनोविदन्मात्वावृ
काअघायवोमागंधर्वोविश्वावसुरादघछ्येनोभूत्वापरापतयजमानस्य
नोगृहद्देवैःसंःस्कृतंयजमानस्यस्वस्त्ययन्यस्यपिपंथामगस्महिस्वस्ति
गामनेहसंयनविश्वाःपरिद्विषोवृणक्तिविंदतेवसुनमोमित्रस्यवरुणस्य
चक्षसेमहोदेवायतदृतंःसपर्यतदूरेदृशेदेवजातायकेतवेदिवस्पुत्राय
सूर्यायशंसतवरुणस्यस्कंभनमसिवरुणस्यस्कंभसर्जनमस्युन्मुक्तोव

सं·ग्रं·२

१५ रुणस्यपाशः ॥१॥ मित्रस्यचर्योविःश्रातिश्च ॥२॥ अग्नेरातिथ्यमसिविष्णवे
त्वासोमस्यातिथ्यमसिविष्णवेत्वातिथेरातिथ्यमसिविष्णवेत्वाग्नयेत्वाराय २
स्पोषदाव्नेविष्णवेत्वाश्येनायत्वासोमभृतेविष्णवेत्वायातेधामानिहवि
षायजंतितातेविश्वापरिभूरस्तुयज्ञंगयस्फानःप्रतरणःसुवीरोवीरहाप्र
चरासोमदुर्यान्[illegible]दित्याःसदो[illegible]स्यदित्याःसदआ ॥३॥
सि सीदवरुणोधृतव्रतोवारुणमसिशंयोर्देवानांसख्यान्मादेवानामप
सश्छित्स्मापतयेत्वागृह्णामितनूनप्त्रेत्वागृह्णामिशाक्वरायत्वागृह्णा

परिपतयेत्वागृह्णामि १५

मित्राकमंनोजिष्ठायत्वागृह्णाम्यनाधृष्टमस्यनाधृष्यंदेवानामोजोभिशा
स्तिपाऽअनभिशस्तेन्यमनुमेदीक्षांदीक्षापतिर्मन्यतामनुतपस्तपस्पति
रंजसासत्यमुपगेषंसुवितेमाधाः॥२॥आमेकंच॥१०॥अंशुरंशुष्टे
देवसोमाप्यायतामिन्द्रायैकधनविदऽआतुभ्यमिन्द्रःप्यायतामात्वमिन्द्रा
यप्यायस्वाप्याययसखीन्त्सन्यामेधयास्वस्तितेदेवसोमसुत्यामशीय
ष्टारायःप्रेषेभगायऋतमृतवादिभ्योनमोदिवेनमःपृथिव्याऽअग्नेव्रतपतेत्वं
व्रतानांव्रतपतिरसियाममतनूरेषासात्वयि॥१॥यातववतनूरियंसाम

१६ यैसहनौव्रतपतेव्रतिनोर्व्रतानियातेअग्नेरुद्रियातनूस्तयांनःपाहितस्यांस्ते
स्वाहायातेअग्नेऽयाशयारजाशयाहराशयातनूर्वर्षिष्ठागह्वरेष्ठाउग्रंवचोअ २
पावधींत्वेषंवचोअपावधींस्वाहा॥२॥त्रयिचत्वारिंऋच्चं॥४१॥वित्तायनी
मसितिक्तायनीमेस्यवतान्मानाथितमवतान्माव्यथितंविदेदग्निर्नभोना
माग्नेअंगिरोयोस्यांपृथिव्यामस्यायुषानाम्नेहियत्तेनाधृष्टंनामयज्ञि
यंतेनत्वादधेअग्नेअंगिरोयोद्वितीयस्यांतृतीयस्यांपृथिव्यामस्यायुषानाम्ने
हियत्तेनाधृष्टंनाम॥३॥यज्ञियंतेनत्वादधेसिंहीरसिमहिषीरसिउरुप्रथस्वो

हृतेयज्ञपतिः प्रथतां ध्रुवासि देवेभ्यः शुंधस्व देवेभ्यः शुंभस्वेंद्रघोषस्त्वा वसुभिः
पुरस्तात्पातु मनोजवास्त्वा पितृभिर्दक्षिणतः पातु प्रचेतास्त्वा रुद्रैः पश्चात्पातु
विश्वकर्मा त्वादित्यैरुत्तरतः पातु सिंःहीरसि सपत्नसाही स्वाहा सिंःहीरसि
सुप्रजावनिः स्वाहा सिंःहीः ॥२॥ असि रायस्पोषवनिः स्वाहा सिंःहीरस्यादि
त्यवनिः स्वाहा सिंःहीरस्यावह देवान्देवयते यजमानाय स्वाहा भूतेभ्यस्त्वा
विश्वायुरसि पृथिवीं दृंःह ध्रुवक्षिदस्यंतरिक्षं दृंःहाच्युतक्षिदसि दिवं दृंः
हाग्नेर्भस्मास्यग्नेः पुरीषमसि ॥३॥ नामसुप्रजावनिः स्वाहा सिंःहीः पंचत्रि

१८ ऽ॒ह्य॥१२॥युंजतेमनउतयुंजतेधियोविप्राविप्रस्यबृहतोविपश्चितः॥
विहोत्रादधेवयुनाविदेकइन्महीदेवस्यसवितुःपरिष्टुतिः॥सुवाग्देवदुर्या २
ऽ॒आवददेवश्रुतौदेवघोषेथ्यामानोवीरोजायतांकर्मण्योयंऽसर्वेनुजी
वामयोबहूनामसद्वशी॥इदंविष्णुर्विचक्रमेत्रेधानिदधेपदं॥समूढमस्य
॥१॥पांऽसुरइरावतीधेनुमतीहिभूतंसूयवसिनीमनवेयशस्ये॥व्य
स्कभ्नारोदसीविष्णवेतेदाधर्थपृथिवीमभितोमयूखैः॥प्राचीप्रेतमध्वरंक म
ल्पयंतीऊर्ध्वंयज्ञंनयतंमाजीह्वरतमत्ररमेथांवर्ष्मन्पृथिव्यादिवोवाविष्ण

वुतवापृथिव्यामहोवाविष्णवुरुवांतरिक्षाद्धस्तौपृणस्वबहुभिर्वसव्यैराप्रयंछ॥
॥१२॥दक्षिणादोतसव्यात्॥विष्णोर्नुकंवीर्याणिप्रवोचंयःपार्थिवानिविममेर
ग्र जांसियोअस्कभायदुत्तरंसधस्थंविचक्रमाणस्त्रेधोरुगायोविष्णोरराटमसि
विष्णोःपृष्ठमसिविष्णोःश्नप्त्रेस्थोविष्णोःस्यूरसिविष्णोर्ध्रुवमसिवैष्णवमसि
विष्णवेत्वा॥१३॥अस्ययछेकांनचत्वारिंशाच्च॥१२॥कृणुष्वपाजःप्रसितिंन
पृथ्वीयाहिराजेवामवाँइभेन॥तृष्वीमनुप्रसितिंद्रूणानोस्तासिविध्यरक्षसस्त
स्तपिष्ठैः॥तवभ्रमासआशुयापतंत्यनुस्पृशधृषताशोशुचानः॥तपूंष्यग्ने

१८

जुह्वा पतंगानसंदितो विसृज विष्वगुल्काः ॥ प्रतिस्पशो विसृज तूर्णितमो भ
वा पायुर्विशो अस्या अदब्धः ॥ यो नो दूरे अघशंसः ॥ ३ ॥ यो अंत्यग्ने माकिष्टे
व्यथिरादधर्षीत् ॥ उदग्ने तिष्ठ प्रत्यातनुष्व न्यमित्राँ ओषतात्तिग्महेते ॥ यो नो
अरातिं समिधान चक्रे नीचा तं धक्ष्यतसं न शुष्कं ॥ ऊर्ध्वो भव प्रति विध्याध्यस्म
हि दाविष्कृणुष्व दैव्यान्यग्ने ॥ अव स्थिरा तनुहि यातुजूनां जामिमजामिं प्रमृणीहि श
त्रून् ॥ स ते ॥ २ ॥ जानाति सुमतिं यविष्ठ य ईवते ब्रह्मणे गातुमैरत् ॥ विश्वान्य
स्मै सुदिनानि रायो द्युम्नान्यर्यो वि दुरो अभि द्यौत् ॥ सेदग्ने अस्तु सुभगः सुदा

सु

नुर्यस्त्वानित्येनहविषायउक्थैः॥ पिप्रीषतिस्वआयुषिदुरोणेविश्वेदस्मैसु
दिनासासदिष्टिः॥ अर्चामितेसुमतिंघोष्यर्वाक्संतेवावाताजरतां॥ २॥ इयंगीः
॥ स्वश्वास्त्वासुरथामर्जयेमास्मेक्षत्राणिधारयेरनुद्यून्॥ इहत्वाभूर्याचरेदुप
त्मंदोषावस्तर्दीदिवांसमनुद्यून्॥ क्रीळंतस्त्वासुमनसःसपेमाभिद्युम्नातस्थि
वांसोजनानां॥ यस्त्वास्वश्वःसुहिरण्योअग्नउपयातिवसुमतारथेन॥ तस्य
त्राताभवसितस्यसखायस्तआतिथ्यमानुषग्जुजोषत्॥ महोरुजामि॥ ९॥ बं
धुतावचोभिस्तन्मापितुर्गोतमादन्वियाय॥ त्वंनोअस्यवचसश्चिकिद्धिहोतर्य

१९ विश्वसुकृतोदमूनाः॥ अस्वप्नजस्तरणयःसुशेवाअतंद्रासोवृकाअश्रमिष्ठाः
॥तेपायवःसध्रियंचोनिषद्याग्नेतवनःपांत्वमूर॥ येपायवोमामतेयंतेअग्ने २
पश्यंतोअंधंदुरितादरक्षन्॥ ररक्षतान्सुकृतोविश्ववेदादिप्संतइद्रिपवोना
ह॥५॥देभुः॥ त्वयावयंसधन्यस्त्वोतास्तवप्रणीत्यश्यामवाजान्॥ उभा
शंसासूदयसत्यतातेनुष्ठुयाकृणुह्यह्रयाण॥ अयातेअग्नेसमिधाविधे धी
मप्रतिस्तोमंशस्यमानंगृभाय॥ दहाशसोरक्षसःपाह्यस्मान्द्रुहोनिदो
मित्रमहोअवद्यात्॥ रक्षोहणंवाजिनमाजिघर्मिमित्रंप्रथिष्ठमुपयामिशर्म॥

॥ ६ ॥

शाशानो अग्निः क्रतुभिः समिद्धः स नो दिवा स रिषः पातु नक्तं ॥ विज्योतिषा बृह
ता भात्यग्निराविर्विश्वानि कृणुते महित्वा ॥ प्रादेवीर्मायाः सहते दुरेवाः शिशीते
शृंगे रक्षसे विनिक्षे ॥ उत स्वानासो दिवि षंत्वग्नेस्तिग्मायुधा रक्षसे हंतवा उ ॥ म
दे चिदस्य प्र रुजंति भामा न वरंते परिबाधो अदेवीः ॥ ८ ॥ अघज्मः सः सते जर
ताः रुजामि हृदि वेकं चलारि ज्ञान्ह ॥ १५ ॥ आ पर्दु दूलाकूल्यै दनी मियं तैवस्य
स्यः शुनाति सा मंत उदायुषा मच्छ वसा अग्ने रातिथ्यमः शुरः शुर्विचायनी मसि
युंजते कृणुघ पाज अश्चतुर्दन्ना ॥ १६ ॥ आपो वस्य सियाते वयं गीश्च तुस्त्रिः शान ॥

सं॰य॰ २

२० ॥५॥ हरिः ओम् ॥ श्रीपरमेश्वरार्पणमस्तु ॥ ६ ॥॥ ॥ ६ ॥॥ हरिः ॥ ओम् ॥ देवस्यत्वासवि
तुःप्रसवेश्विनोर्बाहुभ्यांपूष्णोहस्ताभ्यामाददेभ्रिरसिनारिरसिपरिलिखितꣳ ३
रक्षःपरिलिखिताअरातयइदमहꣳरक्षसोग्रीवाअपिकृन्तामियोस्मान्द्वेष्टियंचव अ॰२
यंद्विष्मइदमस्यग्रीवाअपिकृन्तामिदिवेत्वान्तरिक्षायत्वापृथिव्यैत्वाशुन्धन्तांलो
काःपितृषदनायवोसियवयास्मद्द्वेषः॥१॥यवयारातीःपितृणाꣳसदनमस्यु
द्दिवꣳस्तभानान्तरिक्षंपृणपृथिवींदृꣳहद्युतानस्त्वामारुतोमिनोतुमित्रावरु
णयो ध्रुवेणधर्मणाब्रह्मवनिंत्वाक्षत्रवनिꣳसुप्रजावनिꣳ

२०

रायस्पोषवनिंपर्यूहामिब्रह्मदृꣳहक्षत्रंदृꣳहप्रजांदृꣳहरायस्पोषंदृꣳहघृते
नद्यावापृथिवीआपृणेथामिंद्रस्यसदोसिविश्वजनस्यछायापरित्वागिर्व
णोगिरइमाभवंतुविश्वतोवृद्धायुमनुवृद्धयोजुष्टाभवंतुजुष्टयइंद्रस्यस्यूरसी
इंद्रस्यध्रुवमस्यैंद्रमसीइंद्रायत्वा॥२॥इंद्रषट्माम्रष्टादनाच॥१॥रक्षोहणोवलग
हनोवैष्णवान्खनामीदमहंतंवलगमुद्वपामियंनःसमानोयमसमानोनि
चखानेदमेनमधरंकरोमियोनःसमानोयोसमानोरातीयतिगायत्रेणछं
दसावबाढोवलगःकिमत्रभद्रंतन्नौसहविराडसिसपत्नहासम्राडसिभ्रात

१ २१ व्यहास्वैडस्यभिमातिहाविश्वाराडसिविश्वासांनाष्ट्राणांहंता॥१॥रक्षोह
णोवलगहनःप्रोक्षामिवैष्णवान्रक्षोहणोवलगहनोवनयामिवैष्णवान्य 3
वोसियवयास्मद्द्वेषोयवयारातीरक्षोहणोवलगहनोवस्तृणामिवैष्णवा
न्रक्षोहणोवलगहनोभिजुहोमिवैष्णवान्रक्षोहणौवलगहनाउपदधामि
वैष्णवीरक्षोहणौवलगहनौपर्यूहामिवैष्णवीरक्षोहणौवलगहनौपरिस्तृ
णामिवैष्णवीरक्षोहणौवलगहनौवैष्णवीबृहन्नसिबृहंतीमिंद्रायवाचंव
द॥२॥हंतेंद्रायेहव्यं॥३॥विभूरसिप्रवाहणोवन्हिरसिहव्यवाहनः श्वात्रो

सिप्रचेतास्तुथोसिविश्ववेदाउशिगसिकविरंघारिरसिबंभारिरवस्युरसिदु
वस्वांछुंध्यूरसिमार्जालीयःसम्राडसिकृशानुःपरिषद्योसिपवमानःप्रतक्वा
सिनभस्वानसंमृष्टोसिहव्यसूदऋतधामासिस्वर्ज्योतिर्ब्रह्मज्योतिरसिसु
वर्धामाजोस्येकपादहिरसिबुध्नियारौद्रेणानीकेनपाहिमाग्नेपिपृहिमामामा
माहिंसीः॥१॥अनीकेनाष्टौच॥२॥त्वंसोमतनूकृद्भ्योद्वेषोभ्योन्यकृते
भ्यउरुयंतासिवरूथंस्वाहाजुषाणोअप्तुराज्यस्यवेतुस्वाहायन्नोअ
तु॰ ग्निर्वरिवःकृणोत्वयंमृधःपुरएतुप्रभिंदन्॥अयंशत्रूंजयतुजर्हृषाणो

२१ यंवाजंजयतुवाजसातौ॥ उरुविष्णोविक्रमस्वोरुक्षयायनःकृधि॥ घृतंघृतयो
नेपिबप्रप्रयज्ञपतिंतिर॥ सोमोजिगातिगातुविद्देवानामेतिनिष्कृतमृतस्य
योनिमासदमदित्याःसदोऽस्यदित्याःसदआसीदएषवोदेवसवितःसोमस्तंरक्ष
ध्वंमावोदभदेतत्त्वंसोमदेवोदेवानुपागाइदमहंमनुष्योमनुष्यान्सहप्रजयासह
रायस्पोषेणनमोदेवेभ्यःस्वधापितृभ्यः इदमहंनिर्वरुण
स्यपाशात्सुवरभि॥ २॥ विख्येषंवैश्वानरंज्योतिरग्नेव्रतपतेत्वंव्रतानांव्रतपतिर
सि याममतनूस्त्वय्यभूदियंसामयियातवतनूर्मय्यभूदेषासात्वयियथायथं

नौव्रतपतेव्रतिनोर्व्रतानि ॥ ३ ॥ गातुविदो ये कत्रिं ग्राव ॥ ४ ॥ अत्यन्यानगां
नान्यानुपागामर्वाक्त्वापरैरविदं परावरैस्तन्त्वा जुषे वैष्णवं देवयज्यायै देवस्त्वा
सविता मध्वानक्त्वोषधे त्रायस्वैनं स्वधिते मैनं हिंसीर्दिवमग्रेण मा लेखीरं
तरिक्षं मध्येन मा हिंसीः पृथिव्या संभव वनस्पते शतवल्शो विरोह सहस्रव
ल्शा वि वयं रुहेम यं त्वायं स्वधितिस्तेतिजानः प्रणिनाय महते सौभगा
य ॥ छिन्नो रायः सुवीरः ॥ ५ ॥ यं दर्नीच ॥ पृथिव्यै त्वान्तरिक्षाय त्वा दिवे त्वा शुंध
तां लोकः पितृषदनो यवोऽसि यवयास्मद्द्वेषो यवयारातीः पितृणां सदनम

२२ सिस्त्वावेन्नोस्यग्रेगानेतॄणांवनस्पतिरधित्वास्थास्यतितस्यवित्ताद्देवस्त्वास
विताम‍ध्वानक्तुसुपिप्पलाभ्यस्त्वौषधीभ्य उद्दिवꣳस्तभानान्तरिक्षंपृणपृथिवी 3
सि मुपरेणदृꣳहतेतेधामान्युश्मसि॥१॥गमध्येगावोयत्रभूरिशृङ्गाअयासः॥अ
त्राहतदुरुगायस्यविष्णोःपरमंपदमवभातिभूरेः॥विष्णोःकर्माणिपश्यतय
तोव्रतानिपस्पशे॥इन्द्रस्ययुज्यःसखा॥तद्विष्णोःपरमंपदꣳसदापश्यन्तिसू
रयः॥दिवीवचक्षुराततं॥ब्रह्मवनिंत्वाक्षत्रवनिंत[illegible]निꣳसुप्रजावनिꣳ
रायस्पोषवनिंपर्यूहामिब्रह्मदृꣳहक्षत्रंदृꣳहप्रजांदृꣳहरायस्पोषंदृꣳहपरि

वीरसिपरित्वादेवीर्विशोव्ययंतांपरीमं॑ रायस्पोषोयजमानंमनुष्याअंतरि
क्षस्यत्वासानाववगूहामि॥२॥ उन्नमसीपोषुमकान्नविः॑ नातिश्चे॥६॥इषेत्वो
पवीरस्युपोदेवान्दैवीर्विशः प्रागुर्वह्नीरुशिजोबृहस्पतेधारयावसूनिहव्याते
स्वदंतांदेवत्वष्टर्वसुरण्वरेवतीरमध्वमग्नेर्जनित्रमसिवृषणौस्थउर्वश्यस्या
युरसिपुरूरवाघृतेनाक्तेवृषणंदधाथांगायत्रंछंदोनुप्रजायस्वत्रैष्टुभंजाग
तंछंदोनुप्रजायस्वभवतं॥१॥नः समनसौसमोकसावरेपसौ॥मायज्ञं
हिंसिष्टंमायज्ञपतिंजातवेदसौशिवौभवतमद्यनः॥ अग्नावग्निश्चरतिप्र

सं·प्र·क्र

२३ विंष्टुकृषीणांपुत्रोऽअधिराजएषः॥ स्वाहाकृत्यब्रह्मणातेजुहोमिमादेवा
नांमिथुयाकर्मभागधेयं॥२॥ भवतमकंत्रिं॑नुाञ्च॥७॥ आर्द्दकृतस्यंता 3
देवहविःपात्रोनारभेधर्मामानुषानन्यस्तोषधीभ्यःप्रोक्षाम्यपांपूरुसि
स्वात्तंचित्सदेवं॑हव्यमापोदेवीःस्वदतैनं॑संतेप्राणोवायुनागच्छतां॑सं
यजत्रैरंगानिसंयज्ञपतिराशिषाघृतेनाक्तौपशुंत्रायेथां॑रेवतीर्यज्ञप
तिंप्रियधाविशताउरोअंतरिक्षसजूर्देवेन॥३॥ वातेनास्यहविषस्त्मना
यसि· यजसमस्यतनुवांभववर्षीयोवर्षीयसियज्ञेयज्ञपतिंधाःपृथिव्याःसंपृचः

॥२क्र॥

पाहिनमस्तआतानानर्वाप्रेहिघृतस्यकुल्यामनुसहप्रजयासहरायस्पोषेणा
पोदेवीःशुद्धायुवःशुद्धायूयंदेवाःऊढ्वंःशुद्धावयंपरिविष्टाःपरिवेष्टारोवोभू
यास्म॥२॥देवनचतुश्चत्वारिंशः॥नाद्व॥५॥वाक्तआप्यायतांप्राणस्तआप्याय
तांचक्षुस्तआप्यायतांःश्रोत्रंतआप्यायतांयातेप्राणाञ्छुग्जगामयाश्रोत्रंय चक्षुर्यं
त्तेक्रूरंयदास्थितंतत्तआप्यायतांतत्तएतेनशुंधतांनाभिस्तआप्यायतांपायु
स्तआप्यायतांःशुद्धाश्चरित्राःशमद्भ्यः॥१॥शमोषधीभ्यःशंपृथिव्यैशमहो
भ्यामोषधेत्रायस्वैनंःस्वधितेमैनंःहिंःसीरक्षसांभागोसीदमहंःरक्षोध

२४ मंतमोनयामियोस्मांद्वेष्टियंचवयंद्विष्मइदमेनमधमंतमोनयामीषेल।
घृतेनद्यावापृथिवीप्रोर्णुवाथामच्छिन्नोरायःसुवीरउर्वंतरिक्षमन्विहिवा
योवीहिस्तोकानांःस्वाहोर्ध्वनभसंमारुतंगच्छतं॥२॥अज्योवीहिपंचेच ३
॥९॥संतेमनंसामनःसंप्राणेनप्राणोजुष्टंदेवेभ्योहव्यंघृतवत्स्वाहैंद्रःप्रा
णोअंगेअंगेनिदेध्यदैंद्रोपानोअंगेअंगेविबोभुवद्देवत्वष्टर्भूरितेसं
मेतुविषुरूपायत्सलक्ष्माणोभवथदेवत्रायंतमवसेसखायोनुत्वामा
तापितरोमदंतुश्रीरस्यग्निस्त्वाश्रीणात्वापःसमरिणन्वातस्य॥१॥त्वा

ऽद्येपृक्ष्णोरꣳस्याऽअपामोषधीनाꣳरोहिष्यैघृतंघृतपावानःपिबतवसां
वसापावानःपिबतान्तरिक्षस्यहविरसिस्वाहालांतरिक्षायदिशःप्रदिशा
आदिशोविदिशाउद्दिशःस्वाहादिग्भ्योनमोदिग्भ्यः॥२॥वातस्याध्राविंः
मूतिश्च॥१०॥समुद्रंगच्छस्वाहान्तरिक्षंगच्छस्वाहादेवꣳसवितारंगच्छ
स्वाहाहोरात्रेगच्छस्वाहामित्रावरुणौगच्छस्वाहासोमंगच्छस्वाहायज्ञं
गच्छस्वाहाछंदांसिगच्छस्वाहाद्यावापृथिवीगच्छस्वाहानभोदिव्यंगच्छ
स्वाहाग्निंवैश्वानरंगच्छस्वाहाद्भ्यस्त्वौषधीभ्योमनोमेहार्दियच्छतनूंत्वचं

सं॰प्र॰म्

२५ पुत्रंनभ्रातरमग्रीयुश्रुगासितमभिन्नोाचयोस्मांद्वेष्टियंचवयंद्विष्मोधाम्नो
धाम्नोराजंस्ततोवरुणनोमुंचयदापोअघ्नियावरुणेतिशपामहेततोवरु ३
णनोमुंच॥१॥असिषड्डुं॑ऽगनिश्च॥११॥हविष्मतीरिमाआपोहविष्मा
न्देवोअध्वरोहविष्मां॑आविवासतिहविष्मां॑अस्तुसूर्यः॥अग्नेर्वो[म]प
न्नगृहस्यसदसिसादयामिसुम्नायसुम्निनीःसुम्नेमाधत्तेंद्राग्न्योर्भा
गधेयीस्थमित्रावरुणयोर्भागधेयीस्थविश्वेषांदेवानांभागधेयीस्थय
ज्ञेजागृत॥१॥हविष्मतीश्चतुस्त्रिं॑ऽशत॥१२॥हृदेत्वामनसेत्वादिवेत्वा

॥२५॥

सूर्यंयितोर्ध्वमिममध्वरंकृधिदिविदेवेषुहोत्रायछसोमराजन्नेत्यवेरोहमाभि
र्मासंविक्थामात्वाहिंसिषंप्रजास्त्वमुपावरोहप्रजास्त्वामुपावरोहंतुशृणो
त्वग्निःसमिधाहवंमेशृण्वंत्वापोधिषणाश्चदेवीः॥ शृणोतग्रावाणोविदुषोनु
॥१॥ यज्ञंशृणोतुदेवःसविताहवंमे॥ देवीरापोअपांनपाद्यऊर्मिर्हविष्यइंद्रि
यावान्मदिंतमस्तंदेवेभ्यो देवत्राधत्तशुक्रंशुक्रपेभ्यो येषांभागस्थ
स्वाहाकार्षिरस्यपापांमृध्रंसमुद्रस्यवोअक्षित्याउन्नये॥ यमग्नेपृत्सुमर्त्य
मावोवाजेषुयंजुनाः॥ सयंताशश्वतीरिषः॥३॥ नुसप्तचत्वारिंशाच्च॥२॥

त्वमग्नेरुद्रोअसुरोमहोदिवस्त्वंशर्धोमारुतंपृक्षईशिषे।।त्वंवातैररुणैर्यासि
शंगयस्त्वंपूषाविधतःपासिनुत्मना।।आवोराजानमध्वरस्यरुद्रंहोतारं ३
सत्ययजंरोदस्योः।।अग्निंपुरातनयित्नोरचित्ताद्धिरण्यरूपमवसेकृणु
ध्वं।।अग्निर्होतानिषसादायजीयानुपस्थेमातुःसुरभाउलोके।।युवाक
विःपुरुनिष्ठः।।१।।ऋतावाधर्ताकृष्टीनामुतमध्यइद्धः।।साध्वीमकर्देववीतिं
नोअद्ययज्ञस्यजिह्वामविदामगुह्यां।।सआयुरागात्सुरभिर्वसानोभ
द्रामकर्देवहूतिंनोअद्य।।अक्रंदद्ग्निस्तनयन्निवद्यौःक्षामारेरिहद्वीरुधः

समंजन्॥ सघोडंज्ञोनोविहीमिद्धोऽअरव्यद्रोरोदसीभानुनाभात्यंतः॥ त्वेव

स्तूनिपुर्वणीक॥ २॥ होतर्दोषावस्तोरेरिरेयज्ञियासः॥ क्षामेवविश्वाभुवना

नियस्मिन्त्सः सौभगानिदधिरेपावके॥ तुभ्यंताअंगिरस्तमविश्वाःसुक्षित

यःपृथक्॥ अग्नेकामाययेमिरे॥ अश्यामतंकाममग्नेतवोत्यश्यामरयिंर

यिवःसुवीरं॥ अश्यामवाजमभिवाजयंतोऽश्यामद्युम्नमजराजरंते॥ श्रेष्ठं

यविष्ठभारताग्नेद्युमंतमाभर॥ ३॥ वसोपुरुस्पृहंरयिं॥ सश्वितानस्तन्यतू

रोचनस्थाअजरेभिर्नानदद्भिर्यविष्ठः॥ यःपावकःपुरुतमःपुरूणिपृथू

२७ न्यग्निरनुयातिभर्वनं ॥ आयुष्टेविश्वतोदधदयमग्निर्वरेण्यः ॥ पुनस्तेप्राण ३
आयतिपरायक्ष्मंसुवामिते ॥ आयुर्दाअग्नेहविषोजुषाणोघृतप्रतीकोघृत षा२
योनिरेधि ॥ घृतंपीत्वामधुचारुगव्यंपितेवपुत्रमभि ॥ ६ ॥ रक्षतादिमं ॥ तस्मै
तेप्रतिहर्यतेजातवेदोविचर्षणे ॥ अग्नेजनामिसुष्टुतिं ॥ दिवस्परिप्रथमंज
ज्ञेअग्निरस्मद्द्वितीयंपरि जातवेदाः ॥ तृतीयमप्सुनृमणाअजस्रमिंधा
नएनंजरतेस्वाधीः ॥ शुचिःपावकवंद्योऽग्नेबृहद्विरोचसे ॥ त्वंघृतेभिराहुतः ॥
दृशानोरुक्मउर्व्याव्यद्यौद्दुर्मर्षमायुःश्रियेरुचानः ॥ अग्निरमृतोअभव

हूयोभिः॥५॥यदेनंद्योरजनयत्सुरेताः॥आयद्विषेनृपतिंतेजआनट्छुचिरेतो

निषिक्तंद्यौरभीके॥अग्निःशर्धमनवद्यंयुवानंस्वाधियंजनयत्सूदयच्च॥स

तेजीयसामनसात्वोतउतशिक्षस्वपत्यस्यशिक्षोः॥अग्नेरायोनृतमस्यप्रभू

तौभूयामतेसुष्टुतयश्चवस्वः॥अग्नेसहन्तमाभरद्युम्नस्यप्रासहारयिं॥विश्वायः भं

॥६॥चर्षणीरभ्यासावाजेषुसासहत्॥तमग्नेपृतनाषहंरयिंसहस्वआ

भर॥त्वंहिसत्योअद्भुतोदातावाजस्यगोमतः॥उक्षान्नायवशान्नायसोमपृ

ष्ठायवेधसे॥स्तोमैर्विधेमाग्नये॥वद्माहिसूनोअस्यद्मसद्वाचक्रेअग्निर्जनु

२८ षाड्मांनं॥ सत्वंनर्ऊर्जसन ऊर्जंधाराजेवजेरवृकेक्षेष्यंतः॥ अग्नआयूंःषि॥
॥७॥ पवस्वआसुवोर्जमिषंचनः॥ आरेबाधस्वदुच्छुनां॥ अग्नेपवस्वस्वपाअ
स्मेवर्चःसुवीर्यं॥ दधत्पोषंःरयिंमयि॥ अग्नेपावकरोचिषामंद्रयादेवजिह्व
या॥ आदेवान्वक्षियक्षिच॥ सनःपावकदीदिवोऽग्नेदेवाःइहावह॥ उपयज्ञ
ंहविश्चनः॥ अग्निःशुचिव्रततमःशुचिर्विप्रःशुचिःकविः॥ शुचीरोचतआ
हुतः॥ उदग्नेशुचयस्तवशुक्राभ्राजंतईरते॥ तवज्योतींषिअर्चयः॥ ५४ ३पुरुनि
ष्ठःपुर्वणीकभराभिवयोभिर्यआयूंःषिविप्रःशुचिश्चतुर्देवाच॥१४॥ देव

स्यरक्षोहणोविभूस्त्वः सोमात्यन्यानगांपृथिव्यादूषत्वाद्देवाके सांतेसमुद्र

ःहविष्मतीर्द्देवलमग्निरुद्रश्चतुर्दन्नि॥ १९॥ देवस्यगुमध्येहविष्मतीःपवसएक

त्रिंशान्॥ २॥ हरिः ओंम्॥ श्रीपरमेश्वरार्पणमस्तु॥ ७॥ ॥ ७॥ हरिः ॥ ७॥ ओंम

आदद्ग्रावास्यध्वरंकृद्देवेभ्योगंभीरमिमंमध्वरंकृध्युत्तमेनंपविनेंद्रायसोमंसु म

षुतंमधुमंतंपयस्वंतंवृष्टिवनिमिंद्रायत्वावृत्रघ्नइंद्रायत्वावृत्रतुरइंद्रायत्वाभि

मातिघ्नइंद्रायत्वादित्यवंतइंद्रायत्वाविश्वदेव्यावतेश्वात्रास्थरुद्रत्तुरोराधोगू

र्त्ताअमृतस्यपत्नीस्तादेवीर्देवत्रेमंयज्ञंधत्तोपहूँतायुष्माकं॥ १॥ सोमःपिबतु

ताःसोमस्यपिबतोपहू

सं·प्र·४

२९ यत्तेसोम दिविज्योतिर्यत्पृथिव्यांयदुरावंतरिक्षेतेनास्मैयजमाना ४
योरूरायाकृध्यधिदात्रेवोचाधिषणेवीडूसतीवीडयेथामूर्जंदधाथामूर्जंमे
धत्तंमावांहिंसिषंमामाहिंसिष्टंप्रागपागुदगधराक्तास्त्वादिशआधा
वंत्वंबनिष्वर॥ यत्तेसोमादाभ्यन्नामजागृवितस्मैतेसोमसोमायस्वाहा॥१॥
॥२॥युष्माकं:स्वरयत्तेनदत्त्व॥ वाचस्पतयेपवस्ववाजिन्वृषावृष्णोअंः
शुभ्यांगभस्तिपूतोदेवोदेवानांपवित्रमसियेषांभागोसितेभ्यस्त्वास्वांकृतो
सिमधुमतीर्नइषस्कृधिविश्वेभ्यस्त्वेंद्रियेभ्योदिव्येभ्यःपार्थिवेभ्योमन

॥२९॥

सुभवः सूर्याय

स्वाष्टूर्वंतरिक्षमन्विहिस्वाहात्वाऽदेवेभ्यस्त्वामरीचिपेभ्यएषतेयोनिःप्राणाय
त्वा॥१॥वाचःसप्तचत्वारिंशत्॥२॥उपयामगृहीतोस्यंतर्यच्छमघवन्पाहि
सोममुरुष्यरायःसमिषोयजस्वांतस्तेदधामिद्यावापृथिवीअंतरुर्वंतरिक्षं
सजोषादेवैरवरैःपरैश्चांतर्यामेमघवन्मादयस्वस्वांकृतोसिमधुमतीर्नइष
स्कृधिविश्वेभ्यस्त्वेंद्रियेभ्योदिव्येभ्यःपार्थिवेभ्योमनस्त्वाष्टूर्वंतरिक्षमन्विहि
स्वाहात्वासुभवःसूर्यायदेवेभ्यस्त्वामरीचिपेभ्यएषतेयोनिरपानायत्वा॥१॥
देवेभ्यःसप्त च॥२॥आवायोभूषशुचिपाउपनःसहस्रंतेनियुतोविश्ववार॥

३० उपोतेअंधोमद्यमयामियस्यदेवदधिषेपूर्वपेयं॥ उपयामगृहीतोसिवाय
वेत्वेंद्रवायूइमेसुताः॥ उपप्रयोभिरागतमिंदवोवामुशंतिहि॥ उपयामगृही ४
तोसींद्रवायुभ्यांत्वैषतेयोनिःसजोषोभ्यांत्वा॥ आवायोत्रिंचत्वारिंशत्॥ ८
अयंवांमित्रावरुणासुतःसोमऋतावृधा॥ ममेदिहश्रुतंहवं॥ उपयामगृ
सि हीतोमित्रावरुणाभ्यांत्वैषतेयोनिर्ऋतायुभ्यांत्वा॥ १॥ अयंवांविंशतिः॥ ९
यावांकशामधुमत्यश्विनासूनृतावती॥ तयायज्ञंमिमिक्षतं॥ उपयामगृ
हीतोस्यश्विभ्यांत्वैषतेयोनिर्माध्वीभ्यांत्वा॥ १॥ यावांसप्तदश॥ १०॥ प्रातर्यु

जोविमुञ्चेथामश्विनावेहगच्छतं॥ अस्यसोमस्यपीतये॥ उपयामगृहीतोस्यश्वि
भ्यांत्वैषतेयोनिरश्विभ्यांत्वा॥१॥ प्रातर्युजौविकान्नविꣳशतिः॥७॥ अयंवेनश्चो
दयत्पृश्निगर्भाज्योतिर्जरायूरजसोविमाने॥ इममपाꣳसंगमेसूर्यस्यशिशुं
नविप्रामतिभीरिहन्ति॥ उपयामगृहीतोसिशण्डायत्वैषतेयोनिर्वीरतांपाहि॥
अयंवेनःपंचविꣳशतिः॥८॥ तंप्रत्नथापूर्वथाविश्वथेमथाज्येष्ठतातिंबर्हिषदꣳ
सुवर्विदंप्रतीचीनंवृजनंदोहसेगिराशुंजयंतमनुयासुवर्धसे॥ उपयामगृही
तोसिमर्कायत्वैषतेयोनिःप्रजाःपाहि॥१॥ तंप्रत्नथाषड्विꣳशतिः॥९॥ येदेवासोदिव्य शतिः॥

३९ कादशास्थपृथिव्यामध्येकादशास्थाप्सुषदोमहिनैकादशास्थतेदेवायज्ञमि
मंजुषध्वमुपयामगृहीतोस्याग्रयणोसिस्वाग्रयणः।जिन्वयज्ञंजिन्वयज्ञ ४
पतिमभिसवनापाहिविष्णुस्त्वांपातुविशंत्वंपाहीन्द्रियेणैषतेयोनिर्विश्वे
भ्यस्त्वादेवेभ्यः॥ येदेवास्त्रिंचत्वारिंशत्॥१०॥ त्रिंशत्त्रयश्चगणिनोरुजं
तोदिवंरुद्राःपृथिवींचसचन्ते॥एकादशासोअप्सुषदःसुतंसोमंजुषन्ता
ंसवनायविश्वे॥ उपयामगृहीतोस्याग्रयणोसिस्वाग्रयणः।जिन्वयज्ञंजि
न्वयज्ञपतिमभिसवनापाहिविष्णुस्त्वांपातुविशंत्वंपाहीन्द्रियेणैषतेयोनि

विश्वेभ्यस्त्वादेवेभ्यः ॥ त्रिंशद्द्विचत्वारिंशत् ॥ ११ ॥ उपयामगृहीतोसीन्द्रा
यत्वाबृहद्वतेवयस्वतउक्थायुवंयत्तइन्द्रबृहद्वयस्तस्मैत्वाविष्णवेत्वैषतेयो
निरिन्द्रायत्वोक्थायुवे ॥ १ ॥ उपयामगृहीतोद्वाविंशतिः ॥ १२ ॥ मूर्धानंदि
वोअरतिंपृथिव्यावैश्वानरमृतआजातमग्निं ॥ कविंसम्राजमतिथिंजना
नामासन्नापात्रंजनयन्तदेवाः ॥ उपयामगृहीतोसिध्रुवोसि
ध्रुवक्षितिर्ध्रुवाणांध्रुवतमोच्युतानामच्युतक्षित्तमएषतेयोनिर्वै
श्वानराय ॥ १ ॥ मूर्धानंपञ्चविंशतिः ॥ १३ ॥ मधुश्चमाधवश्चशुक्रश्च

32 भुचिश्चनभंश्चनभस्यंश्चेषश्चोर्ज्ज श्चसहंश्चसहस्यंश्चतपंश्चतपस्यं
श्चोपयामगृहीतोसिसंसर्पोस्यंहस्पत्यायत्वा॥१॥ मधुश्चित्रिंःशत्॥ ४
॥१४॥ इंद्राग्नीआगतंसुतंगीर्भिर्नभोवरेण्यं॥ अस्यपातंधियेषिता॥ उप
यामगृहीतोसीन्द्राग्निभ्यांत्वैषतेयोनिरिंद्राग्निभ्यांत्वा॥ इंद्राग्नीविंःशतिः॥
॥१५॥ ओमासश्चर्षणीधृतोविश्वेदेवासआगत॥ दाश्वांसोदाशुषःसु
तं॥ उपयामगृहीतोसिविश्वेभ्यस्त्वादेवेभ्यएषतेयोनिर्विश्वेभ्यस्त्वादेवे
भ्यः॥१॥ ओमासोविंःशतिः॥१६॥ मरुत्वंतंवृषभंवावृधानमकवारिंदि

व्यंः शासमिन्द्रं ॥ विश्वासाहमवसेनूतनायोग्रंः सहोदामिहतंः हुवेम ॥
उपयामगृहीतोसीन्द्रायत्वामरुत्वतएषतेयोनिरिन्द्रायत्वामरुत्वते ॥ १ ॥
॥ मरुत्वन्तः षड्विंःशतिः ॥ १७ ॥ इन्द्रमरुत्वइहपाहिसोमंयथाशार्यातेअ
पिबः सुतस्य ॥ तवप्रणीतीतवशूरशर्मन्नाविवासन्तिकवयः सुयज्ञाः ॥ उ
पयामगृहीतोसीन्द्रायत्वामरुत्वतएषतेयोनिरिन्द्रायत्वामरुत्वते ॥ १ ॥ इ
न्द्रमरुत्वएकान्नत्रिंःशत ॥ १८ ॥ मरुत्वांः इन्द्रवृषभोरणायपिबासोममनु
ष्वधंमदाय ॥ आसिञ्चस्वजठरेमध्वऊर्मिन्त्वंः राजासिप्रदिवः सुतानां ॥

33 उपयामगृहीतोसींद्रायत्वामरुत्वतएषतेयोनिरिंद्रायत्वामरुत्वते॥१॥
मरुत्वानेकांनविंः॥त्रातु॥१९॥महाँ२ इंद्रोयओजसापर्जन्योवृष्टिमाँ२
इव॥स्तोमैर्वत्सस्यवावृधे॥उपयामगृहीतोसिमहेंद्रायत्वैषतेयोनिर्महें
द्रायत्वा॥१॥महानेकान्नविंः॥शतिः॥२०॥महाँ२ इंद्रोनृवदाचर्षणिप्रा उ
तद्विबर्हाअमिनःसहोभिः॥अस्मद्र्यग्वावृधेवीर्यायोरुःपृथुःसुकृतः
कर्तृभिर्भूत्॥उपयामगृहीतोसिमहेंद्रायत्वैषतेयोनिर्महेंद्रायत्वा॥१॥
महांन्नृवत्षड्विंःशतिः॥२१॥कदाचनस्तरीरसिनेंद्रसश्चसिदाशुषे॥उ ४

पोपेन्नुमघवन्भूयइन्नुतेदानंदेवस्यपृच्यते ॥ उपयामगृहीतोस्यादित्येभ्यस्त्वा ॥
कदाचनप्रयुच्छस्युभेनिपासिजन्मनी ॥ तुरीयादित्यसवनंतइंद्रियमातस्था
वमृतंदिवि ॥ यज्ञोदेवानांप्रत्येतिसुम्नमादित्यासोभवतामृडयंतः ॥ आवोर्वा
चीसुमतिर्ववृत्यादंहोश्चिद्यावरिवोवित्तरासत् ॥ विवस्वआदित्यैषतेसोमपी
थस्तेनमंदस्वतेनतृप्यतृप्यास्मतेवयंतर्पयितारोयादिव्यावृष्टिस्तयात्वाश्री
णामि ॥ १ ॥ वःसप्तविंशतिश्च ॥ २२ ॥ वाममद्यसवितर्वाममुश्वोदिवेदिवेवाम
मस्मभ्यंसावीः ॥ वामस्यहिक्षयस्यदेवभूरेरयाधियावामभाजःस्याम ॥ उपया

या

३४ मगृहीतोसिदेवायत्वासवित्रे॥१॥वामंचतुर्विंशतिः॥२३॥अदब्धेभिःसवि
तःपायुभिष्ट्वंशिवेभिरद्यपरिपाहिनोगयं॥हिरण्यजिह्वःसुवितायनव्य ४
सेरक्षामाकिर्नोअघशंसईशत॥उपयामगृहीतोसिदेवायत्वासवित्रे॥
अदब्धेभिस्त्रयोविंशतिः॥२४॥हिरण्यपाणिमूतयेसवितारमुपह्वये॥स
चेत्तादेवतापदं॥उपयामगृहीतोसिदेवायत्वासवित्रे॥१॥हिरण्यपाणिंच
तुर्दश॥२५॥सुशर्मासिसुप्रतिष्ठानोबृहदुक्षेनमएषतेयोनिर्विश्वेभ्यस्त्वा
देवेभ्यः॥१॥सुशर्माद्वादश॥२६॥बृहस्पतिसुतस्यतइंदोइंद्रियावतःपत्नी

७ वंतंग्रहंगृह्णाम्यग्ना३इपत्नीवाः३ सजूर्देवेनत्वष्ट्रासोमंपिबस्वाहा॥३॥ बृह
स्पतिसुतस्यपंचदश॥२७॥ हरिरसिहारियोजनोहर्योस्थातावज्रस्यभर्त्ताप्र
श्नेः प्रेतानस्येतद्दवसोमस्ययजुषस्तुतस्तोमस्यहरिवंतंग्रहंगृह्णामिहरीस्थह
र्योर्धानाः सहसोमाइंद्रायस्वाहा॥३॥ हरिरसिषड्विंशतिः॥२८॥ अग्नआयूं
षिपवसआसुवोर्जमिषंचनः॥ आरेबाधस्वदुच्छुनां॥ उपयामगृहीतोस्यग्नये
त्वातेजस्वतएषतेयोनिरग्नयेत्वातेजस्वते॥ अग्नआयूंषित्रयोविंशतिः॥
॥२९॥ उत्तिष्ठन्नोजसासहपीत्वाशिप्रेअवेपयः॥ सोममिंद्रचमूसुतं॥ उपया

३५ मगृहीतोसींद्रायत्वौजस्वतएषतेयोनिरिंद्रायत्वौजस्वते॥१॥उत्तिष्ठन्नेकविं
शतिः॥२०॥तरणिर्विश्वदर्शतोज्योतिष्कृदसिसूर्य॥विश्वमाभासिरोचनं॥उपया
मगृहीतोसिसूर्यायत्वाभ्राजस्वतएषतेयोनिःसूर्यायत्वाभ्राजस्वते॥१॥त ४
रणिर्विंशतिः॥२१॥आप्यायस्वमदिंतमसोमविश्वाभिरूतिभिः॥भवानःस
प्रथस्तमः॥१॥आप्यायस्वनव॥२२॥ईयुष्टेयेपूर्वतरामपश्यन्व्युच्छंतीमुषसं
मर्त्यासः॥अस्माभिरूनुप्रतिचक्ष्याभूदोतेयंतियेअपरीषुपश्यान्॥१॥ई
युरकान्नविंशतिः॥२३॥ज्योतिष्मतींत्वासादयामिज्योतिष्कृतंत्वासादया

मि ज्योतिर्विदं त्वा सादयामि भास्वतीं त्वा सादयामि ज्वलंतीं त्वा सादयामि मल्म
लाभवंतीं त्वा सादयामि दीप्यमानां त्वा सादयामि रोचमानां त्वा सादयामि अज
स्रां त्वा सादयामि बृहज्ज्योतिषं त्वा सादयामि बोधयंतीं त्वा सादयामि जाग्रतीं
त्वा सादयामि ॥ १ ॥ ज्योतिष्मतीः षड्ऋचः ॥ २४ ॥ प्रयासाय स्वाहा आयासाय
स्वाहा वियासाय स्वाहा संयासाय स्वाहा उद्यासाय स्वाहा अवयासाय स्वाहा शु
चे स्वाहा शोकाय स्वाहा तप्यत्वै स्वाहा तपते स्वाहा ब्रह्महत्यायै स्वाहा सर्व
स्मै स्वाहा ॥ १ ॥ प्रयासाय चतुर्विंशतिः ॥ २५ ॥ चित्तं संतानेन भवं यक्ना

३९ रुद्रंतलिम्नापशुपतिंस्थूलहृदयेनाग्निंहृदयेनरुद्रंलोहितेनशर्वंमतस्ना
भ्यांमहादेवमंतःपार्श्वेनौषिष्ठहनंशिंगीनिकोश्याभ्यां॥९॥ चित्रमष्टादश॥ ४
२६॥ आतिष्ठवृत्रहन्रथंयुक्तातेब्रह्मणाहरी॥ अर्वाचीनंसुतेग्रावाकृणोतु मनो
वग्नुना॥ उपयामगृहीतोसीन्द्रायत्वाषोडशिनएषतेयोनिरिंद्रायत्वाषोडशि
ने॥१॥ आतिष्ठषड्विंशतिः॥२७॥ इंद्रमिद्धरीवहतोप्रतिधृष्टशवसमृषीणां
चस्तुतीरुपयज्ञंचमानुषाणां॥ उपयामगृहीतोसीन्द्रायत्वाषोडशिनएषते
योनिरिंद्रायत्वाषोडशिने॥१॥ इंद्रमिद्धरीविंशतिः॥२८॥ अ सावि सोम इंद्र

तेनाविश्वधृक्ष्मवागहि॥ आलोप्याल्किंद्रियं रजः सूर्यनरश्मिभिः॥ उपयाम
गृहीतोसीद्रायत्वाषोडशिनएषतेयोनिरिंद्रायत्वाषोडशिने॥१॥ असौविस
प्रविंन्नानिः॥ ३९॥ सर्वस्यप्रतिशीवरीभूमिस्त्वोपस्थआधित॥ स्योनास्मै
सुषदाभवयछास्मैशर्मसप्रथाः॥ उपयामगृहीतोसीद्रायत्वाषोडशिनएष
तेयोनिरिंद्रायत्वाषोडशिने॥१॥ सर्वस्यषाडुंन्नानिः॥ ४०॥ महाँइंद्रोवज्र
बाहुःषोडशीशर्मयछतु॥ स्वस्तिनोमघवाकरोतुहंतुपाप्मानंयोस्मान्द्वे
ष्टि॥ उपयामगृहीतोसीद्रायत्वाषोडशिनएषतेयोनिरिंद्रायत्वाषोडशिने॥

३७ ॥३॥ मुहान्सइंद्रं नाति॥ ४१॥ सजोषाइंद्रसगणोमरुद्भिः सोमंपिबवृत्र
हंछूरविद्वान्॥ जहिशत्रूँ रपमृधोनुदस्वाथाभयंकृणुहिविश्वतोनः॥ उ ४
पयामगृहीतोसीद्रायलाषाडग्निनएषतेयोनिरिंद्रायलाषाडग्निने॥ ३॥
सजोषाग्निः नाल॥ ४२॥ उदुत्यंजातवेदसंदेवंवहंतिकेतवः॥ दृशेविश्वा
यसूर्यं॥ चित्रंदेवानामुदगादनीकंचक्षुर्मित्रस्यवरुणस्याग्नेः॥ आप्राद्या
वापृथिवीअंतरिक्षं सूर्यआत्माजगतस्तस्थुषश्च॥ अग्नेनयसुपथारा
येअस्मान्विश्वानिदेववयुनानिविद्वान्॥ युयोध्यस्मज्जुहुराणमेनोभू

यिष्वांतेनमंतुक्तिं विधेमं॥ दिवंगछसुवःपतरूपेण॥१॥ वोरूपमभ्येमिवयसा
वयः॥ तुथोवोविश्ववेदाविभजतुवर्षिष्ठेअधिनाके॥ एतत्तेअग्नेराधऐतिसो
मच्युतंतन्मित्रस्यपथानयर्तस्यपथाप्रेतचंद्रदक्षिणायज्ञस्यपथासुविता
नयंतीब्राह्मणमद्यराध्यासमृषिमार्षेयंपितृमंतंपैतृमत्यंसुधातुदक्षिणं
विसुवःपश्यव्यंतरिक्षंयतस्वसदस्यैरस्मद्दात्रादेवत्रागछतमधुमतीःप्र
ता२ दातारमाविशतानवहायास्मान्देवयानेनपथेतसुकृतांलोकेसीदततन्नःस
ःस्कृतं॥२॥ रूपेणसदस्यैरध्वादश्वाच॥४२॥ धातारातिःसवितेदंजुषंतां

३८ प्रजापतिर्निधिपतिर्नोअग्निः॥ त्वष्टाविष्णुःप्रजयासंरराणोयजमाना
यद्रविणंदधातु॥ समिन्द्रणोमनसानेषिगोभिःसंसूरिभिर्मघवन्संस्व
स्त्या॥ संब्रह्मणादेवकृतंयदस्तिसंदेवानांसुमत्यायज्ञियानां॥ संव
र्चसापयसासंतनूभिरगन्महिमनसासंशिवेन॥ त्वष्टानोअत्रवरिवः
कृणोतु॥३॥ अनुमार्ष्टुतन्वोयद्विलिष्टं॥ यद्यत्वाप्रयतियज्ञेअस्मिन्न
ग्नेहोतारमवृणीमहीह॥ ऋधगयाऋधगुताशमिष्ठाः प्रजानन्यज्ञमुपया
हिविद्वान्॥ स्वगावोदेवाःसदनमकर्मयआजग्मसवनेदंजुषाणाः॥ ज

क्षिवाꣳसःपपिवाꣳसश्चविश्वेस्मेधत्तवसवोवसूनि॥ यानावहउशतोदे
वदेवांस्तान्॥२॥ प्रेरयस्वे अग्नेसधस्थे॥ वहमानाभरमाणाहवीꣳषिव
सुंघर्मंदिवमातिष्ठतानु॥ यज्ञयज्ञंगच्छयज्ञपतिंगच्छस्वांयोनिंगच्छस्वा
हैषतेयज्ञोयज्ञपतेसहसूक्तवाकःसुवीरःस्वाहादेवागातुविदोगातुंवित्वा
गातुमितमनसस्पतइमन्नोदेवदेवेषुयज्ञꣳस्वाहावाचिस्वाहावातेधाः॥
॥३॥ कृणोतुतान्प्राचेतारिꣳनाम्ब॥ ४४॥ उरुꣳहिराजावरुणश्चकारसू
र्यायपंथामन्वेतवाउ॥ अपदेपादाप्रतिधातवेकरुतापवक्ताहृदयाविधे

३९ श्विनं॰॥ शतंतेराजंभिषजः सहस्रंमूर्वीगंभीरासुमतिष्टेअस्तु॥ बाधस्वदू
रेनिर्ऋतिंपराचैः कृतंचिदेनः प्रमुमुग्ध्यस्मत्॥ अपिष्ठितोवरुणस्यपा
शो॰ग्नेरनीकमपआविवेश॥ अपांनपात्प्रतिरक्षंनसुर्यंदमेदमे॥१॥ स
मिधंयक्ष्यग्ने॰॥ प्रतितेजिह्वाघृतमुच्चरण्यत्समुद्रेतेहृदयमप्स्वंतः॥ सं ४
त्वाविशंत्वोषधीरुतापोयज्ञस्यत्वायजपतेहविर्भिः॥ सूक्तवाकेनंमोवा
केनविधेमावभृथनिचंकुणनिचेरुरसिनिचंकुणावदेवैर्देवकृतमेनो
याऽवमर्त्यैर्मर्त्यकृतंसुरारानोदेवरिषस्पाहि सुमित्रानआपओषध

यः॥२॥ संतुदुर्मित्रास्तस्मैभूयासुर्योस्मान्द्वेष्टियंचवयंद्विष्मोदेवीरापएष
वोगर्भस्तंवः सुप्रीतंᳲसुभृतमकर्मदेवेनेःषुसुकृतोब्रूतात्प्रतियुतोवरुण
स्यपाशः प्रत्यस्तोवरुणस्यपाशःएधोस्येधिषीमहिसमिदसितेजोसिते
जोमयिधेह्यपोअन्वचारिषंᳲरसेनसमसृक्ष्महि॥ पयस्वाᳲंअग्नआग
मंतंमासᳲंसृजवर्चसा॥३॥ इमेदमओषधयआषट्च॥४८॥ यस्त्वाहृ
दाकीरिणामन्यमानोमर्त्यंमर्त्योजोहवीमि॥ जातवेदोयशोअस्मासुधे
हिप्रजाभिरग्नेअमृतत्वमश्यां॥ यस्मैत्वंसुकृतेजातवेदउलोकमग्नेकृ

४० पावकस्योतनं॥ अश्विनः सपुत्रिणं वीरवंतं गोमंतः रयिन्नशते स्वस्ति॥ त्वे
सुपुत्र शवसो वृत्रन्कामकातयः॥ न त्वामिंद्रातिरिच्यते॥ उक्थउक्थे सोम ४
इंद्रं ममाद नीथेनीथे मघवानं॥१॥ सुतासः॥ यदीं सबाधः पितरं न पुत्राः
समानदक्षा अवसे हवंते॥ अग्ने रसेन तेजसा जातवेदो विरोचसे॥ रक्षोहा
मीवचातनः॥ अपो अन्वचारिषं रसेन समसृक्ष्महि॥ पयस्वां अग्न आ
गमं तं मा सं सृज वर्चसा॥ वसुर्वसुपतिर्हि कमस्यग्ने विभावसुः॥ स्याम ते
सुमतावपि॥ त्वामग्ने वसुपतिं वसूनामभि प्र मंदे॥२॥ अध्वरेषु राजन्॥ त्व

यावाजेवाजयंनोजयेमाभिष्यामपृत्सुतीर्मर्त्यानां॥ त्वामग्नेवाजसातमंवि
प्रावर्धंतिसुष्टुतं॥ सनोरास्वसुवीर्यं॥ अयंनोअग्निर्वरिवःकृणोत्वयंमृधःपु
रएतुप्रभिंदन्॥ अयंशत्रून्जयतुजर्हृषाणोयंवाजंजयतुवाजसातौ॥ अ
ग्निनाग्निःसमिध्यतेकविर्गृहपतिर्युवा॥ हव्यवाड्जुह्वास्यः॥ त्वंह्यग्नेअ
ग्निनाविप्रोविप्रेणसन्सता॥ सखासख्यासमिध्यसे॥ उदग्नेशुचयस्तववि
ज्योतिषा॥ १०६ २॥ मघवानंमंदेत्वायेन्द्रतुर्द्विञ्च॥ ४६॥ वाचःप्राणायत्वा॥ उप
यामगृहीतोस्यपानायत्वा॥ आवायोवायवेसजोषोभ्यांत्वा॥ अयमृतायु

भ्यांत्वा॥ यावांमश्विभ्यांमाध्वीभ्यांत्वा॥ प्रातर्युजावश्विभ्यांत्वा॥ अयंवेनःशं
डायत्वैषतेयोनिर्वीरतांपाहि॥ तंमर्कायत्वैषतेयोनिःप्रजाःपाहि॥ येदेवा
स्त्रिं॥ त्वादाग्रयणोसिविश्वेभ्यस्त्वादेवेभ्यः॥ उपयामगृहीतोसींद्रायत्वाबृ
धायुवे॥ मूर्धानमग्नयेत्वावैश्वानराय॥ मधुश्चसं॰सर्पः॥ इंद्राग्नीइंद्राग्नि
भ्यांत्वा॥ ओमासोविश्वेभ्यस्त्वादेवेभ्यः॥ मरुत्वंतंचर्षणींद्रायत्वामरुत्वते॥
महांइंद्रमहेंद्रायत्वा॥ कदाचनादित्येभ्यस्त्वा॥ कदाचनस्तरीर्विवस्वआदि
त्य॥ इंद्रं॰शुचिरपः॥ वामंचर्षणिदेवायत्वासवित्रे॥ सुशर्माविश्वेभ्यस्त्वा

देवेभ्यः॥ बृहस्पतिस्त्वष्टासोमंपिबस्वाहा॥ हरिरसिसहसोमाइंद्रायस्वा
हा॥ अग्नआयूंषिअग्नयेत्वातेजस्वते॥ उत्तिष्ठंनिंद्रायत्वौजस्वते॥ तरणिः
सूर्यायत्वाभ्राजस्वते॥ आतिष्ठाद्याः षडिंद्रायत्वाषोडशिने॥ उदुत्यंचित्र
मग्नेनयद्दिवंगछ। उरुमायुष्टयद्देवामुमुग्धि। अग्नाविष्णूसुमुक्तं॥ यस
त्वासुष्टुतं॥ त्वमग्नेसुष्टुतिं॥ परावेपंन्यः॥ देवावयदेवाः पंक्तयो॥ परावेसवा
चं॥ भूमिर्लोकः सलोकः॥ विष्णोरुद्दुत्तममन्नंपतेपुनस्त्वादित्याः॥ आदेवा
नसमतयउपयामगृहीतोस्यावायोअयंवांयावोग्नानर्युजावयंवेनस्तं

४२ मलभुयेदेवास्त्रिः ञादुपयामगृहीतोसिमूर्द्धानंमधुश्चेंद्राग्नीत्र्योमा
सोमरुत्वंतमिंद्रमरुत्वोमरुत्वान्महान्महांन्वक्रदावामभद्रक्यौभिर्हि ४
रण्ययपापिःसुशर्मावृहस्पतिर्हरिरस्यमंतुन्निर्बुलरपितराप्यायस्वयुरे
यज्योतिर्भर्तीमयासायचित्रमातिष्ठचंद्रमसाविसर्वस्यमहान्महोषाद
द्दत्यंधातारुःहियस्तापरूचेलारिःन्नात्॥ ४६॥ आदित्येदेवामहान्
त्रिष्टुप्सर्वस्यसंतुदुर्मित्राश्चतुःपंचाशत्॥ ५४॥ हरिः ओम्॥ श्रीकृष्णा
र्पणमस्तु॥ श्री॥ ७॥ ॥ ७॥ ॥ ७॥ श्रीपरमेश्वरप्रसन्नोभव॥ श्रीराम

हरिः ओं॥ देवासुराः संयत्ता आसन्ते देवा विजयमुपयन्तोऽग्नौ वामं वसु सन्न्य
दधतेदमु नो भविष्यति यदि नो जेष्यन्तीति तदग्निर्न्यकामयत तेनापाक्रा
मत्तद्देवा विजित्यावरुरुत्समाना अन्वायन्तदस्य सहसाऽदित्सन्त सोऽरोदी
द्यदरोदीत्तद्रुद्रस्य रुद्रत्वं यदश्र्वशीयत तत्॥१॥ रजतं हिरण्यमभव
त्तस्माद्रजतं हिरण्यमदक्षिण्यमश्रुजं हि यो बर्हिषि ददाति पुराऽस्य सं
वत्सराद्गृहे रुदन्ति तस्माद्बर्हिषि न देयः सोऽग्निरब्रवीद्भाग्यसान्यथ व इदमिति ग्निर
पुनराधेयं ते केवलमित्यब्रुवन्नृध्नवत्खलु स इत्यब्रवीद्यो मद्देवत्यमग्नि

४३ मादध्याताद्इतितंपूषाधत्ततेन॥२॥पूषार्ध्नोत्तस्मात्पौष्णाःपशवउच्यंतेतं
त्वष्टाधत्ततेनत्वष्टार्ध्नोत्तस्मात्त्वाष्ट्राःपशवउच्यंतेतंमनुराधत्ततेनमनुरा
र्ध्नोत्तस्मान्मानव्यःप्रजाउच्यंतेतंधाताधत्ततेनधातार्ध्नोत्संवत्सरोवैधा
तातस्मात्संवत्सरंप्रजाःपशवोनुप्रजायंतेयएवंपुनराधेयस्यर्धिंवेद
॥३॥ऋध्नोत्येवयोस्यैवंबंधुतांवेदबंधुमान्भवतिभागधेयंवाअग्निरा
हितइच्छमानःप्रजांपशून्यजमानस्योपदोद्रावोद्वास्यपुनरादधीतभा
गधेयेनैवैनंसमर्धयत्यथोशांतिरेवास्यैषापुनर्वस्वोरादधीतैतद्वैपु

नराधेयस्यनक्षत्रंयत्पुनर्वसूस्वायामेवैनंदेवतायामाधायब्रह्मवर्च
सीभवतिदर्भैरादधात्ययातयामत्वायदर्भैरादधात्यद्भ्यएवैनमोषधी
भ्योवरुध्याधत्तेपंचकपालःपुरोडाशोभवतिपंचवाऋतवऋतुभ्यएवैन
मवरुध्याधत्ते॥६॥अन्वीयततेनवर्द्धदर्भैःपंचविंशतिश्च॥३॥परावा
एषयज्ञंपशून्वपतियोग्निमुद्वासयतेपंचकपालःपुरोडाशोभवतिपां
क्तोयज्ञःपांक्ताःपशवोयज्ञमेवपशूनवरुंधेवीरहावाएषदेवानांयोग्नि
मुद्वासयतेनवाएतस्यब्राह्मणाऋतायवःपुरान्नमक्षन्पंक्त्योयाज्या

४४ नुवाक्याभवंतिपांक्तोयज्ञःपांक्तःपुरुषोदेवानेववीरंनिरवदायाग्निंपु
नरा॥१॥धत्तेशताक्षराभवंतिशतायुःपुरुषःशतेंद्रियआयुष्येवेंद्रिये
प्रतितिष्ठतियद्वाअग्निराहितोनर्ध्येतज्यायोभागधेयंनिकामयमानो
यदाग्नेयःसर्वंभवतिसैवास्यर्द्धिःसंवाएतस्यगृहेवाक्सृज्यतेयोग्निमु
द्वासयतेसवाचंसंसृष्टांयजमानईश्वरोनुपराभवितोर्विभक्तयोभ
वंतिवाचोविधृत्यैयजमानस्यापराभावाय॥२॥विभक्तिंकरोतिब्रह्मै
वतदकरुपांशुयजतियथावामंवसुविविदानोगूहतितादृगेवतदग्नि

प्रतिस्विष्टकृतं निराह यथा वामं वसुविविदानः अकामो जिगमिषति ता
दृगेव तद्धिमंक्ति मुक्त्वा प्रयाजेन वषट्करोत्यायतनादेव नैति यजमानो
वै पुरोडाशः पशवो वा एते आहुती यदभितः पुरोडाशमेते आहुती ॥ ७ ॥ जु
होति यजमानमे वोभयतः पशुभिः परिगृह्णाति कृतयजुः संभृतसं
भार इत्याहुर्न संभृत्याः संभारा न यजुः कर्तव्यमित्यथो खलु संभृत्या ए
लं वसंभाराः कर्तव्यं यजुर्यज्ञस्य समृध्यै पुनर्निष्कृतो रथो दक्षिणा पुनरुत्स्यू
तं वासः पुनरुत्सृष्टोऽनड्वान्पुनराधेयस्य समृध्यै सप्त ते अग्ने समिधः स

सं.प्र.५

४५ भाङ्गिद्धाइत्यग्निहोत्रंजुहोतियत्रंयत्रैवास्यन्यक्तंततः॥ ४॥ एवैनमवरुं
वा धेवीरहावाएषदेवानांयोग्निमुद्वासयतेतस्यवरुणएवर्णयादग्निवारु ४
णमेकादशकपालमनुनिर्वपेत्तंचैवहंतियश्चास्यर्णयात्तौभागधेये
नप्रीणातिनार्त्तिमार्च्छतियजमानः॥ ५॥ आपरंभावायपुरोडाशंमेते
आकुतीनतः पट्त्रिंशन्नाम॥ २॥ भूमिर्भूम्नाद्यौर्वरिणांतरिक्षंमहित्वा॥
उपस्थेतेदेव्यदितेग्निमन्नादमन्नाद्यायादधे॥ आयंगौः पृश्निरक्रमीद
सनन्मातरंपुनः॥ पितरंचप्रयन्त्सुवः॥ त्रिंशद्धामविराजतिवाक्पतंगा

॥४५॥

यत्रोग्निये॥ मर्त्यस्यबहुद्युभिः॥ अस्यप्राणादपानत्यंतश्चरतिरोचना॥
व्यख्यन्महिषःसुवः॥ यत्वा॥१॥ क्रुद्धः परोवपमन्युनायदवर्त्या॥ सुक
ल्पमग्नेतत्तवपुनस्त्वोद्दीपयामसि॥ यत्तेमन्युपरोप्तस्यपृथिवीमनुद
ध्वसे॥ आदित्याविश्वेतद्देवावसवश्चसमाभरन्॥ मनोज्योतिर्जुषता
माज्यंविछिन्नंयज्ञंसमिमंदधातु॥ बृहस्पतिस्तनुतामिमन्नोविश्वे
देवाइहमादयंतां॥ सप्ततेअग्नेसमिधःसप्त [illegible] जिह्वाःसप्त॥२॥ ऋ
षयःसप्तधामप्रियाणि॥ सप्तहोत्राःसप्तधात्वायजंतिसप्तयोनीरापृ

४६ पास्याघृतेन॥ पुनरूर्जानिवर्त्तस्व पुनरग्न इषायुषा॥ पुनर्नःपाहिवि
श्वतः॥ सहरय्यानिवर्त्तस्वाग्नेपिन्वस्वधारया॥ विश्वप्स्न्यावि श्वत ५
स्परि॥ लेकःसलेकःसुलेकःस्तेन आदित्या आज्यंजुषाणावियंतु
केतःसकेतःसुकेतस्तेन आदित्या आज्यंजुषाणावियंतुविवस्वाँ
अदितिर्देवजूतिस्तेन आदित्या आज्यंजुषाणावियंतु॥ २॥ स्वाजिह्वाः
सप्तसुकेतस्तेनुरत्रयोदनाच्च॥ ३॥ भूमिर्भूम्नाद्यौर्वरिणास्याहाग्निषु
वैनमाधत्तसर्पविज्ञीयंतोमन्यंतसएतंकसर्णीरिःकाद्रवेयोमंत्रमप

॥५६

न्यक्ततोवैतेजीर्णास्तनूरपाघ्नतसर्पराज्ञियाऋग्भिर्गार्हपत्यमादधा
तिपुनर्नवमेवैनमजरंकृत्वाधत्तेथोपूतमेवपृथिवीमन्नाद्यन्नोपानम
त्सैतं॥१॥मंत्रमपश्यत्ततोवैतामन्नाद्यमुपानमद्यत्सर्पराज्ञियाऋग्भि
र्गार्हपत्यमादधात्यन्नाद्यस्यावरुध्याअथोअस्यामेवैनंप्रतिष्ठितमाधत्ते
यत्वाक्रुद्धःपरोवपेत्याहापह्नुतएवास्मैतत्पुनस्त्वोद्दीपयामसीत्याहसमि
न्धएवैनंयत्तेमन्युपरोप्तस्येत्याहदेवताभिरेव॥२॥एनंसंभरतिविवाए
तस्ययज्ञश्छिद्यतेयोग्निमुद्वासयतेबृहस्पतिवत्यर्चोपतिष्ठतेब्रह्मवैदे

४८ वानांबृहस्पतिर्ब्रह्मणैवयज्ञः संदधातिविछिन्नंयज्ञः समिमंदधात्वि
त्याहसंतत्यैविश्वेदेवाइहमादयंतामित्याहसंतत्यैवयज्ञंदेवेभ्योनुदिश
तिसप्ततेअग्नेसमिधःसप्तजिह्वाः॥२॥इत्याहसप्तसप्तवैसप्तधाग्नेःप्रि
यास्तनुवस्ताएवावरुंधेपुनरूर्जासहरय्येत्यभितःपुरोडाशमाहुतीजुहो
तियजमानमेवोर्जाचरय्याचोभयतःपरिगृह्णात्यादित्यावाअस्माल्लोका
दमुंलोकमायंतेमुष्मिंल्लोकेव्यतृष्यंतइमंलोकंपुनरभ्यवेत्याग्निमाधा
यैतान्होमानजुहवुस्तआर्ध्नुवंतेसुवर्गंलोकमायन्यःपराचीनंपुनराधे ॥४८॥

योग्निमादधीतसएतान्होमांजुहुयाद्यामेवादित्याऋद्धिमार्ध्नुवंस्तामेव
र्ध्नोति ॥ १४ ४ ॥ सैतंदेवताभिरेवजिह्वाएतान्यंदेववित्सु नातिस्म ॥ ५ ॥ उपप्रयन्तो
अध्वरंमन्त्रंवोचेमाग्नये ॥ आरेअस्मेचशृण्वते ॥ अस्यप्रत्नामनुद्युतं शु
क्रंदुदुह्रेअह्रयः ॥ पयः सहस्रसामृषिं ॥ अग्निर्मूर्धादिवः ककुत्पतिः पृथि
व्याअयं ॥ अपांरेतांसिजिन्वति ॥ अयमिहप्रथमोधायिधातृभिर्होता
यजिष्ठोअध्वरेष्वीड्यः ॥ यमप्नवानोभृगवोविरुरुचुर्वनेषुचित्रंविभ्वंवि
शेविशे ॥ उभावामिन्द्राग्नीआहुवध्यै ॥ ३ ॥ उभाराधसः सहमादयध्यै ॥ उ

सं.अ.५

४८ भादातारांविषांरयीणामुभावाजस्यसातयेहुवेवां॥ अयंतेयोनिर्ऋत्वियोय नि

तोजातोअरोचथाः॥ तंजानन्नग्नआरोहाथानोवर्धयारयिं॥ अग्नआयूंषि ५

पवसआसुवोर्जमिषंचनः॥ आरेबाधस्वदुच्छुनां॥ अग्नेपवस्वस्वपाअस्मेव

र्चःसुवीर्यं॥ दधत्पोषंरयिं॥ २॥ मयि॥ अग्नेपावकरोचिषामंद्रयादेवजिह्व

या॥ आदेवान्वक्षियक्षिच॥ सनःपावकदीदिवोग्नेदेवाँइहावह॥ उपयज्ञं

हविश्चनः॥ अग्निःशुचिव्रततमःशुचिर्विप्रःशुचिःकविः॥ शुचीरोचतआहु

तः॥ उदग्नेशुचयस्तवशुक्राभ्राजंतईरते॥ तवज्योतींष्यर्चयः॥ आयुर्दा

॥४८॥

अग्नेस्यायुर्मे॥ २ ॥दीदिहिवर्चोदाअग्नेसिवर्चोमेदेहितनूपाअग्नेसितनुवंमेपाह्य
ग्नेयन्मेतनुवाऊनंतन्मआपृणचित्रावसोस्वस्तितेपारमशीयेंधानास्त्वाशतंꣳ
हिमाद्युमंतःसमिधीमहिवयस्वंतोवयस्कृतंयशस्वंतोयशस्कृतंꣳसुवीरासो
अदाभ्यं।अग्नेसपत्नदंभनंवर्षिष्ठेअधिनाके॥संत्वमग्नेसूर्यस्यवर्चसागथाः
समृषीणांꣳस्तुतेनसंप्रियेणधाम्ना॥त्वमग्नेसूर्यवर्चाअसिसंमामायुषावर्च
साप्रजयासृज॥ ४ ॥आयुर्बध्येपोषंꣳरयिंमेवर्चसासमदंत्वा॥ ५ ॥संपश्या
मिप्रजाअहमिडप्रजसोमानवीः॥सर्वाभवंतुनोगृहे॥अंभस्थांभोवोभक्षीय

सं·प्र·५

४९ महस्स्थमहोवोभक्षीयसहस्स्थसहोवोभक्षीयोर्जस्स्थोर्जंवोभक्षीयरेवतीरम
ध्वमस्मिन्लोकेस्मिन्गोष्ठेस्मिन्क्षयेस्मिन्योनाविहैवस्ततोमापगातबह्वीर्मे ५
भूयास्त॥ ३॥ संहितासिविश्वरूपीरामोर्जाविशागौपत्येनारायस्पोषेणस
हस्रपोषंवः पुष्यासंमयिवोरायश्रयंतां॥ उपत्वाग्नेदिवेदिवेदोषावस्तर्धिया
वयं॥ नमोभरंतएमसि॥ राजंतमध्वराणांगोपामृतस्यदीदिविं॥ वर्द्धमानं
स्वेदमे॥ सनः पितेवसूनवेग्नेसूपायनोभव॥ सचस्वानस्स्वस्तये॥ अग्ने॥ ३॥
त्वंनोअंतमः॥ उतत्राताशिवोभववरूथ्यः॥ तंत्वाशोचिष्ठदीदिवः॥ सुम्ना

॥५२॥

यनूनमीमहेसखिभ्यः॥वसुरग्निर्वसुश्रवाः॥अच्छानक्षिद्युमत्तमोरयिंदाः॥ऊर्जा
वःपश्याम्यूर्जामापश्यतरायस्पोषेणवःपश्यामिरायस्पोषेणमापश्यतेडास्थम
धुकृतस्योनामाविशतेरामदः॥सहस्रपोषंवःपुष्यासं॥२॥मयिवोरायश्रयतां
॥तत्सवितुर्वरेण्यंभर्गोदेवस्यधीमहि॥धियोयोनःप्रचोदयात्॥सोमानंस्वर
णंकृणुहिब्रह्मणस्पते॥कक्षीवन्तंयऔशिजः॥कदाचनस्तरीरसिनेंद्रसश्च
सिदाशुषे॥उपोपेन्नुमघवन्भूयइन्नुतेदानंदेवस्यपृच्यते॥परित्वाग्नेपुरंवयं
विप्रंसहस्यधीमहि॥धृषद्वर्णंदिवेदिवेभेत्तारंभंगुरावतः॥अग्नेगृहपतेसुगृ 22

५० हपतिरहंत्वयागृहपतिनाभूयासꣳसुगृहपतिर्मयात्वंगृहपतिनाभूयाःशतꣳहि
मास्ताम्माशिषमाशासेतन्तवेज्योतिष्मतींतामाशिषमाशासेऽमुष्मैज्योतिष्मतीं॥ ४४
॥४॥भूयास्तत्स्वस्त्ययमेसुष्यासंधृपद्धर्मिकान्तविंशतिश्च॥८॥अयंज्ञा
वाएषयोऽसामोपप्रयंतोऽध्वरमित्याहस्तोममेवास्मैयुनक्त्युपेत्याहप्रजावै
पशवउपेमंलोकंप्रजामेवपशूनिमंलोकमुपैत्यस्यप्रत्नामनुद्युतमित्याह
सुवर्गोवैलोकःप्रत्नःसुवर्गमेवलोकꣳसमारोहत्यग्निर्मूर्धादिवःककुदित्याह
मूर्धानं॥३॥एवैनꣳसमानानांकरोत्यथोदेवलोकादेवमनुष्यलोकेप्रतिति

स्त्ययमिद्रस्य पुमो धायि धात्तृभिरित्याह मुख्यमेवैनं करोत्युभावामिंद्राग्नी आ
हुवध्या इत्याहौजो बलमेवावरुंधे यते यानि ऋक्लियु इत्याह प्रजावोवैरयिः पुश्र
नैवावरुंधे षड्भिरुपतिष्ठते षड्वा ॥ २ ॥ ऋतवः ऋतुष्वेव प्रतितिष्ठति षड्भिरुत्तराभिरु
पतिष्ठते द्वादश संपद्यन्ते द्वादश मासाः संवत्सरः संवत्सर एव प्रतितिष्ठति यथा वै
पुरुषोऽश्वो गौरजीर्यत्येवमग्निराहितोऽजीर्यति संवत्सरस्य परस्तादाग्निपावमानी
भिरुपतिष्ठते पुनर्नवमेवैनमजरं करोत्यथो पुनात्येवोपतिष्ठते योग एवास्यैष
उपतिष्ठते ॥ २ ॥ दम एवास्यैष उपतिष्ठते याच्ञैवास्यैषोपतिष्ठते यथा पापीया

५१ न्धुयं सम्राहत्येनमस्यतितादृगेव तदायुर्दा अग्नेस्यायुर्मेदेहीत्याहायुर्दा
ह्येषवर्चोदा अग्नेसिवर्चोमेदेहीत्याह वर्चोदाह्येषतनूपा अग्नेसितनुवंमेपा
हीत्याह ॥ ४ ॥ तनूपाह्येषोग्नेयन्मेतनुवाऊनंतन्मआपृणेत्याहयन्मेप्रजायै
पशूनामूनंतन्मआपूरयेतिवावैतदाहचित्रावसोस्वस्तितेपारमशीयेत्याहरा
त्रिर्वैचित्रावसुरव्युष्टैवाएतस्यैपुराब्राह्मणाअभैषुर्व्युष्टिमेवावरुंधइंधाना
स्त्वाशतं ॥ ५ ॥ हिमाइत्याहशतायुःपुरुषः शतेंद्रियआयुष्येवेंद्रियेप्रतितिष्ठ
त्येषावैसूर्मीकर्णकावत्येतयाहस्मवैदेवाअसुराणांशततर्हांस्तृंहंतिय

हूतयासमिधमादधातिवज्जेमुवेलछंलग्नीयजमानोभ्रातृव्यायप्रहरतिस्त
त्याअछंबट्कारः संलमम्नेसूर्यस्यवर्चसागथाइत्याहतलमसीदमुःभय्या
समितिवावेलदाहलमम्नेसर्यवर्चाअसीत्याहाग्निषमेवेलामानास्ले॥ ६॥
मूर्द्धानंःषड्वाएषापतिष्ठलेपाहीत्याहन्नालमहःषोडशाच॥ ७॥ संपन्नयामि
प्रजाअहमित्याहयावंलएवग्राम्याःपशवस्तानेवावरुंधेम्भस्छांमोवाभक्षी
सपर्यंतःपुरुप्रियंमित्रंनक्षेत्रसाधसं॥ मक्षूदेववतोरथः॥ ३॥ शूरोवापृत्सुका
सुचित्॥ देवानांयइन्मनोयजमानइयक्षत्यभीदयज्वनोभुवत्॥ नयजमान
रिष्यसिनसुन्वाननदेवयो॥ असदत्रसुवीर्यमुतत्यदाश्वश्व्यं॥ नकिष्टंकर्म
न णानशंनप्रयोषंनयोषति॥ उपक्षरंतिसिंधवोमयोभुवईजानंचयक्ष्यमाणंच
धेनवः॥ पृणंतंचपपुरिंच॥ ४॥ अवस्यवोघृतस्यधाराउपयंतिविश्वतः॥ सो

॥०.८

मारुद्रा विवृहतंविषूचीममीवायानोगयमाविवेश॥ आरेबाधेथांनिर्ऋतिंपरा
चैः कृतंचिदेनः प्रमुमुक्तमस्मत्॥ सोमारुद्रायुवमेतान्यस्मेविश्वातनूषुभेषजा
निधत्तं॥ अवस्यतंमुंचतंयन्नोअस्तितनूषुबद्धंकृतमेनोअस्मत्॥ सोमापू
षणाजननारयीणांजननादिवोजननापृथिव्याः॥ जातौविश्वस्यभुवनस्य
गोपौदेवाअकृण्वन्नमृतस्यनाभिं॥ इमौदेवौजायमानौजुषंतेमौतमां
सिगूहतामजुष्टा॥ आभ्यामिंद्रः पक्वमामास्वंतः सोमापूषभ्यांजनदुस्रिया
४९१ ४६९
सु॥ ६॥ ॥ बृहतः [illegible] शावसारथः पधुरिंचदिवोजननापंचविं॥

त्रातिश्च ॥ ५ ॥ २२ ॥ ५ ॥ अनुमत्या आग्नेयमैन्द्राग्नमग्नये सोमाय प्रतिपू

१०५ रूपमैन्द्राग्नं धात्रे बार्हस्पत्यमग्नये गृहपतये धीनो देवीः सोमस्येंद्रस्य मित्र २ समिधुं

य आग्नेयः सद्य आग्नेमाग्नेयः स्वाहीतानाविष्णू द्वाविंशतिः ॥ २२ ॥ ७ ॥

॥ ७ ॥ अनुमत्यै यथा संविदे देवीशापोमित्रो सिमृतो बाह्वि चत्वारिंशत्

॥ ४२ ॥ ५ ॥ हरिः ओम् ॥ श्रीरुद्रार्पणमस्तु ॥ श्रीगणेशार्पणमस्तु ॥

॥ श्रीगुरुचरणार्पणमस्तु ॥ ८१ ॥ ५ ॥ श्रीगुरुचरणार्पणमस्तु ॥ श्रीसांब ॥

॥१०५

शके १७ सत्राते आद्वा दीसक्षयनामसंवत्सरे कार्तिकशुद्धएकाद
श्यांतिथौभृगुवासरेउत्तराभाद्रपदानक्षत्रेतद्दिनेप्रथमाष्टकसंहिता
या पुस्तकंसमाप्तंजालें॥हे पुस्तकविष्णुकृष्णसाठेयांचेअसे॥इदंय
स्यपुस्तकंतस्यज्येष्ठपुत्रेणलिखितं॥स्वार्थंपरार्थंवा॥यादृशंपुस्तकंदृ
ष्टं तादृशंलिखितंमया॥ यदिशुद्धमशुद्धंवाममदोषोनदीयते॥१॥
तैलाद्रक्षेज्जलाद्रक्षेद्रक्षेच्छिथिलबंधनात्॥मूर्खहस्तेनदातव्यंएवंवदति
पुस्तकं॥श्रीकृष्णार्पणमस्तु॥छ॥ ॥छ॥ ॥छ॥श्रीकृष्णार्पणमस्तु॥छ

१०६ ग्रंथश्लोक॥एकसहस्रतीनशोंआसे॥ ~ ~ एकन्दर पन्ना सा. ३४२

१०६

१०७

१०७

॥ यजुः प्रथमाष्टकसमाप्तिः ॥ श्रीशिवप्रसन्नः ॥ ॥
॥ रामकृष्णवासुदेवभगवान् श्रीकृष्णपरमात्मा ॥

ओ३म

श्री

अथद्वितीयाष्टकसंहितारंभोत्र

।। लेखकपाठकयोः वेदपुरुषप्रसन्नोस्तु ।।

२०५

॥१॥

श्रीगणेशायनमः श्रीसरस्वत्यैनमः श्रीगुरुचरणस्यप्रसादेनसंपूर्णाविघ्नंभव हरिः ॐ॥
वायव्यꣳश्वेतमालभेतभूतिकामोवायुर्वैक्षेपिष्ठादेवतावायुमेवस्वेनभागधेयेनोपधावति
सएवैनंभूतिंगमयतिभवत्येवातिक्षिप्रादेवतेत्याहुःसैनमीश्वराप्रदहइत्येतमेवसंतंवा
यवेनियुत्वतआलभेतनियुद्वाअस्यधृतिर्धृतएवभूतिमुपैत्यप्रदाहायभवत्येव॥१॥वा
यवेनियुत्वतआलभेतग्रामकामोवायुर्वाइमाःप्रजानस्योतानेनीयतेवायुमेवनियुत्वंतꣳ
स्वेनभागधेयेनोपधावतिसएवास्मैप्रजानस्योतानियच्छतिग्राम्येवभवतिनियुत्वतेभव
तिध्रुवाएवास्माअनपगाःकरोतिवायवेनियुत्वतआलभेतप्रजाकामःप्राणोवैवायुरपानो
नियुत्प्राणापानौखलुवाएतस्यप्रजायाः॥२॥अपक्रामतोयोलंप्रजायैसन्प्रजांनविंदते
वायुमेवनियुत्वंतꣳस्वेनभागधेयेनोपधावतिसएवास्मैप्राणापानाभ्यांप्रजांप्रजनयतिवि ॥१॥

द्वतैंप्रज्जांवायव्यंनियुत्वंतआलभेतज्योगामयावीप्राणोवैवायुरपानोनियुत्प्राणापानौख
लुवाएतस्मादपक्रामतोयस्यज्योगामयतिवायुमेवनियुत्वंतꣳस्वेनभागधेयेनोपधा॥३॥धा
वतिसएवास्मिन्प्राणापानौदधात्युतयदीतासुर्भवतिजीवत्येवप्रजापतिर्वाइदमेकआ
सीत्सोकामयतप्रजाःपशून्सृजेयेतिसआत्मनोवपामुदखिदत्तामग्नौप्रागृह्णात्ततोज
स्तूपरःसमभवत्तꣳस्वायैदेवतायाआलभतततोवैसप्रजाःपशूनसृजतयःप्रजाकामः॥४॥
पशुकामस्स्यात्सएतंप्राजापत्यमजंतूपरमालभेतप्रजापतिमेवस्वेनभागधेयेनोपधाव
तिसएवास्मैप्रजांपशून्प्रजनयतियच्छ्मश्रुणस्तत्पुरुषाणाꣳरूपंयत्तूपरस्तदश्वानांय
दन्यतोदंतद्गवांयदव्याइवशफास्तदवीनांयदजस्तदजानामेतावंतोवैग्राम्याःपशवस्ता
न्॥५॥रूपेणैवावरुंधेसोमापौष्णंत्रैतमालभेतपशुकामोद्वौवाअजायैस्तनौनानैवद्वाव

॥ २ ॥

भिजायेत ऊर्जं पुष्टिं तृतीयः सोमापूषणावेव स्वेन भागधेयेनोप धावति तावेवास्मै पशून्प्रजनयतः सोमो वै रेतोधाः पूषा पशूनां प्रजनयिता सोम एवास्मै रेतो दधाति पूषा पशून्प्रजनयत्यौदुंबरो यूपो भवत्यूर्ग्वा उदुंबर ऊर्क्पशव ऊर्जैवास्मा ऊर्जं पशूनव रुंधे ॥ ८ ॥ अग्ने दाहायुभवस्ये त प्रजायो आ मयति वायुमेव नियुत्वन्तं स्वेन भागधेयेनोप प्रजाको मुक्तान्मूपस्त्व योद्दश्चा ॥ १ ॥ प्रजापतिः प्रजा असृजत ता अस्मात्सृष्टाः पराचीरायन्ता वरुणमगच्छन्ता अन्वैत्ताः पुनरयाचत ता अस्मै न पुनरददात्सोऽब्रवीद्वरं वृणीष्वाथ मे पुनर्देहीति तासां वरमालभत स कृष्ण एकशितिपादभवद्यो वरुणगृहीतः स्यात्स एतं वारुणं कृष्णमेकशितिपादमालभेत वरुणं ॥ १ ॥ एव स्वेन भागधेयेनोप धावति स एवैनं वरुणपाशान्मुंचति कृष्ण एकशितिपाद्भवति वारुणो ह्येष देवतया समृद्ध्यै स्वर्भानुरासुरः सूर्यं तमसाविध्यत्तस्मै देवाः प्रायश्चित्ति

॥ २ ॥

मेछन्तस्यायस्य प्रथमं तमोपाघ्नन्त्सारुक्ष्णाविरभवद्यद्द्वितीयं साफल्गुनी यत्तृतीयं साबल
क्षी यदध्यस्थादपाकृन्तन्त्साविर्वशाभवत् ॥ २॥ सर्षभमभवत्ते देवा अब्रुवन्देवपशुर्वा अयं समभूत्त
स्मादृषभमालभ्यामह उत्सृथ वै तर्ह्यल्पा पृथिव्यासीदजाता ओषधयस्तामविंवशामादित्ये
भ्यः कामायालभन्त ततो वा अप्रथत पृथिव्यजायन्तौषधयो यः कामयेत प्रथेय पशुभिः प्र
प्रजया जायेयेति स एतामविंवशामादित्येभ्यः कामाय ॥ ३॥ आलभेतादित्यानेव कामं
स्वेन भागधेयेनोपधावति त एवैनं प्रथयन्ति पशुभिः प्र प्रजया जनयन्त्यसावादित्यो न व्य
रोचत तस्मै देवाः प्रायश्चित्तिमैच्छन्तस्मा एतां मल्हा आलभन्ताग्नेयीं कृष्णग्रीवीं संहि
तामैन्द्रीं श्वेतां बार्हस्पत्यां ताभिरेवास्मिन्रुचमदधुर्यो ब्रह्मवर्चसकामः स्यात्तस्मा एतां म
ल्हा आलभेत ॥ ४॥ आग्नेयीं कृष्णग्रीवीं संहितामैन्द्रीं श्वेतां बार्हस्पत्यां स एता एव देव

तास्वेनभागधेयेनोपधावन्तिताएवास्मिन्ब्रह्मवर्चसंदधतिब्रह्मवर्चस्येवभवतिवसंताप्रातरा
ग्नेयींकृष्णग्रीवीमालभेतग्रीष्मेमध्यंदिनेसꣳहितामैंद्रीꣳशरद्यपराह्णेश्वेतांबार्हस्पत्यांत्रीणि
वाआदित्यस्यतेजाꣳसिवसंताप्रातर्ग्रीष्मेमध्यंदिनेशरद्यपराह्णेयावंत्येवतेजाꣳसितान्येव
अवरुंधेसंवत्सरंपर्यालभ्यंतेसंवत्सरोवैब्रह्मवर्चसस्यप्रदातासंवत्सरएवास्मैब्रह्मवर्चसं
प्रयच्छतिब्रह्मवर्चस्येवभवतिगर्भिणयोभवंतींद्रियंवैगर्भइंद्रियमेवास्मिन्दधतिसारस्वतीं
मेषीमालभेतयईश्वरोवाचोवदितोःसन्वाचंनवदेद्वाग्वैसरस्वतीसरस्वतीमेवस्वेनभागधे
येनोपधावतिसैवास्मिन् ॥ ८ ॥ वाचंदधातिप्रवदितावाचोभवत्यपन्नदतीभवतितस्मान्म
नुष्याःसर्वांवाचंवदंत्याग्नेयंकृष्णग्रीवमालभेतसौम्यंबभ्रुंज्योगामयाव्यग्निंवाएतस्यशरी
रंगच्छतिसोमꣳरसोयस्यज्योगामयत्यग्नेरेवास्यशरीरंनिष्क्रीणातिसोमाद्रसमुतयदि

तास्कुर्मवैनिजीवत्स्येवसौम्यंबभ्रुमालभेतानाग्नेयंकृष्णाग्रीवंप्रजाकामः सोमः ॥ ७ ॥ वैरेतो
धाअग्निः प्रजानांप्रजनयितासोमएवास्मैरेतोदधात्यग्निः प्रजांप्रजनयतिविंदतेप्रजा
माग्नेयंकृष्णाग्रीवमालभेतसौम्यंबभ्रुंयोब्राह्मणोविद्यामनूच्यनविरोचेतयदाग्नेयोभ
वतितेजएवास्मिन्तेनदधातियत्सौम्योब्रह्मवर्चसंतेनकृष्णग्रीवआग्नेयोभवतितमए
वास्मादपहंतिश्वेतोभवति ॥ ८ ॥ रुच्मेवास्मिंदधातिबभ्रुः सौम्योभवतिब्रह्मवर्चसमेवा
स्मिन्त्विषिंदधात्याग्नेयंकृष्णाग्रीवमालभेतसौम्यंबभ्रुमाग्नेयंकृष्णाग्रीवंपुरोधायाᳲस्प
र्धमानआग्नेयोवैब्राह्मणः सौम्योराजन्योभितःसौम्यमाग्नेयौभवतस्तेजसैवब्रह्मणाभ
यतोराष्ट्रंपरिगृह्णात्येकधासमावृंक्तेपुरएनंदधते ॥ ९ ॥ लभेतवरुणंवझोनामविकृआमादि
त्येभ्यः कामायमल्हाआलभेतनान्येवस्वेवास्मिन्सोमश्वेतोभवतित्रिचत्वारिंᳲशाच्च ॥ २ ॥ दे

६॥

वासुराएषुलोकेष्वस्पर्धन्तसएतंविष्णुर्वामनमपश्यत्तꣳस्वायैदेवतायाआलभततोवैसइ
मांल्लोकानभ्यजयद्वैष्णवंवामनमालभेतस्पर्धमानोविष्णुरेवभूत्वेमांल्लोकानभिजयति १
विषमआलभेतविषमाइवहीमेलोकाःसमृध्याइंद्रायमन्युमतेमनस्विनेललामंप्राशृंगमा
लभेतसंग्रामे॥१॥संयत्तइंद्रियेणवैमन्युनामनसासंग्रामंजयतींद्रमेवमन्युमंतंमनस्विं
नꣳस्वेनभागधेयेनोपधावतिसएवास्मिन्निंद्रियंमन्युंमनोदधातिजयतितꣳसंग्राममिं
द्रायमरुत्वतेपृश्निसक्थमालभेतग्रामकामइंद्रमेवमरुत्वंतꣳस्वेनभागधेयेनोपधावति
सएवास्मैसजातान्प्रयच्छतिग्राम्येवभवतियदृषभस्तेन॥२॥ऐंद्रोयत्पृश्निस्तेनमारुतः
समृध्यैपश्चात्पृश्निसक्थोभवतिपश्चादन्ववसायिनीमेवास्मैविशंकरोतिसौम्यंबभ्रु
मालभेतान्नकामःसौम्यंवाअन्नꣳसोममेवस्वेनभागधेयेनोपधावतिसएवास्माअन्नं ॥६॥

प्रयच्छत्यन्नाद एव भवति बभ्रुर्भवत्येतद्धा अन्नस्य रूपं समृध्यै सौम्यं बभ्रुमालभेत यमलं ॥
राज्याय सन्तं राज्यं नोपनमेत्सौम्यं वै राज्यं सोममेव स्वेन भागधेयेनोपधावति स एवास्मै राज्यं
प्रयच्छत्युपैनं राज्यं नमति बभ्रुर्भवत्येतद्वै सोमस्य रूपं समृध्या इन्द्राय वृत्रतुरे ललामं प्राशृं
गमालभेत गतश्रीः प्रतिष्ठाकामः पाप्मानमेव वृत्रं तीर्त्वा प्रतिष्ठां गच्छतीन्द्रायाभिमातिघ्ने ललामं
ग प्राशृंगमा ॥ ४ ॥ लभेत यः पाप्मना गृहीतः स्यात्पाप्मा वा अभिमातिरिन्द्रमेवाभिमातिहनं स्वेन भा
गधेयेनोपधावति स एवास्मात्पाप्मानमभिमातिं प्रणुदत इन्द्राय वज्रिणे ललामं प्राशृंगमालभेत
यमलं राज्याय सन्तं राज्यं नोपनमेदिन्द्रमेव वज्रिणं स्वेन भागधेयेनोपधावति स एवास्मै वज्रं
प्रयच्छति स एनं वज्रो भूत्या इन्ध उपैनं राज्यं नमति ललामः प्राशृंगो भवत्येतद्वै वज्रस्य रूपं स
मृध्यै ॥ ५ ॥ संग्रामे तेनालमभिमातिघ्ने ललामं प्राशृंगं भवेन पंचदश च ॥ ३ ॥ असावादित्यो न व्य

रोचततस्मैदेवाः प्रायश्चित्तिमैच्छन्तस्मा एतांदशर्षभामालभंततयैवास्मिन्रुचमदधुर्योब्रह्म
वर्चसकामःस्यात्तस्मा एतांदशर्षभामालभेतामुमेवादित्यं स्वेनभागधेयेनोपधावतिसएवा १
स्मिन्ब्रह्मवर्चसंदधातिब्रह्मवर्चस्येवभवतिवसंताप्रातस्त्रीन्ललामानालभेतग्रीष्मेमध्यंदि
ने॥१॥त्रीञ्छितिपृष्ठाञ्छरद्यपराह्णेत्रीञ्छितिवारांत्रीणिवा आदित्यस्यतेजांसिवसंताप्रातर्ग्री
ष्मेमध्यंदिनेशरद्यपराह्णेयावंत्येवतेजांसितान्येवावरुंधेत्रयस्त्रय आलभ्यंतेभिपूर्वमेवास्मिं
स्तेजोदधातिसंवत्सरंपर्यालभ्यंतेसंवत्सरोवैब्रह्मवर्चसस्यप्रदातासंवत्सरएवास्मैब्रह्मवर्चसंप्र
यच्छतिब्रह्मवर्चस्येवभवतिसंवत्सरस्यपरस्तात्प्राजापत्यंकद्रुं॥२॥आलभेतप्रजापतिःसर्वा
देवतादेवतास्वेवप्रतितिष्ठतियदिबिभीयाद्दुश्चर्माभविष्यामीतिसोमापौष्णंश्याममालभेतसौ
म्योवैदेवतयापुरुषःपौष्णाःपशवःस्वयैवास्मैदेवतयापशुभिस्त्वचंकरोतिनदुश्चर्माभवतिदेव

भ्र्वैवेयमश्चास्मिन्ल्लोकेस्पर्धन्तसयमोदेवानामिंद्रियंवीर्यमयुवततद्यमस्य॥ ३॥ यमत्वंतेदेवाअ
मन्यंतयमोवाइदमभूद्यद्वयंस्मइतितेप्रजापतिमुपाधावन्त्सएतौप्रजापतिरात्मनउक्षवशौनि
रमिमीततेदेवावैष्णावरुणींवशामालभंतैंद्रमुक्षाणंतंवरुणेनैवग्राहयित्वाविष्णुनायज्ञेनप्राणु
दंतैंद्रेणैवास्येंद्रियमवृंजंतयोभ्रातृव्यवान्त्स्यात्सस्पर्धमानोवैष्णावरुणीं॥ ४॥ वशामालभेतैंद्रमु
क्षाणंवरुणेनैवभ्रातृव्यंग्राहयित्वाविष्णुनायज्ञेनप्रणुदतऐंद्रेणैवास्येंद्रियंवृंक्तेभवत्यात्मनापरा
स्यभ्रातृव्योभवतींद्रोवृत्रमहन्तंवृत्रोहतःषोडशभिर्भोगैरसिनात्तस्यवृत्रस्यशीर्षतोगावउदायंता
वैदेव्योभवंतासामृषभोजघनेनूदैत्तमिंद्रः॥ ५॥ अचायत्सोमन्यतयोवाइममालभेतमुच्येतास्मा
व त्पाप्मनइतिसआग्नेयंकृष्णग्रीवमालभतैंद्रमृषभंतस्याग्निरेवस्वेनभागधेयेनोपसृतःषोडशधा
वृत्रस्यभोगानप्यदहदैंद्रेणेंद्रियमात्मन्नधत्तयःपाप्मनागृहीतःस्यात्सआग्नेयंकृष्णग्रीवमालभेतै

दुर्मंषममग्निरेवास्यस्वेनभागधेयेनोपसृतः ॥ ५ ॥ पाप्मानमपिदहत्यैंद्रंणींद्रियमालंभेतेयस्
च्चैतेपाप्मनोभवंत्येतद्यावापृथिव्यांधेनुमालभेतज्योगपरुद्धोनयोर्हिवाएषोप्रतिष्ठितोथैषज्यो १
गपरुद्धोद्यावापृथिवीएवस्वेनभागधेयेनोपधावतितेएवैनंप्रतिष्ठांगमयतःप्रत्येवतिष्ठतिपर्या
रिणीभवतिपर्यारीवह्येतस्यराष्ट्रंयोज्योगपरुद्धःसमृद्ध्यैवायव्यं ॥ ७ ॥ वत्समालभेतवायुर्वाअ
नयोर्वत्सउमेवाएतस्मैलोकाअपशुष्काविडुपशुष्काथैषज्योगपरुद्धोवायुमेवस्वेनभागधेयेनोप
धावतिसएवास्माउमान्लोकान्विशुंप्रदापयतिप्रास्माउमेलोकास्नुवंतिभुंजत्येनंविडुपतिष्ठते ॥ ८ ॥
मध्यंदिनेकर्द्धुयमस्यस्पर्धमानोवेष्णावरुणींतमिंद्रोस्यस्वेनभागधेयेनोपसृतोवायव्यंछित्वा
रिंगन्न ॥ ९ ॥ इंद्रोवलस्यबिलमपौर्णोत्सयउत्तमःपशुरासीत्तंपृष्ठंप्रतिसंगृह्योदरिखदत्तंसह
स्रंपशवोनूदायन्त्सउन्नतोभवद्यःपशुकामस्यात्सएतमैंद्रमुन्नतमालभेतेंद्रमेवस्वेनभागधेये ॥ ६ ॥

नोपधावति स एवास्मै पशून्प्रयच्छति पशुमानेव भवत्कन्नलः ॥ १ ॥ भवति साहस्री वा एषा लक्ष्मी
यदुन्नतो लक्ष्म्यै वै पशून्वरूं धेयद्दा सहस्रं पशून्प्राप्नुयादथ वैष्णवं वामनमालभेतैतस्मिन्वै तत्स
हस्रमध्यतिष्ठत्तस्मादेष वामनः समीषितः पशुभ्य एव प्रजातेभ्यः प्रतिष्ठां दधाति कोऽर्हति सहस्रं प
शून्प्राप्नुमित्याहुरहोरात्राण्येव सहस्रं संपाद्यालभेत पशवः ॥ २ ॥ वा अहोरात्राणि पशूनेव प्र
जातान्प्रतिष्ठां गमयत्योषधीभ्यो वेहतमालभेत प्रजाकाम ओषधयो वा एतं प्रजायै परिबाधन्ते यो
ऽलं प्रजायै सन्प्रजां न विन्दत ओषधयः खलु वा एतस्यै सूतुमपि घ्नन्ति या वेहद्भवत्योषधीरेव स्वेन भा
गधेयेनोपधावति ता एवास्मै स्वाद्योनेः प्रजां प्रजनयन्ति विन्दते ॥ ३ ॥ प्रजामापो वा ओषधयोऽसत्पु
रुष आप एवास्मा असतः सद्ददति तस्मादाहुर्यश्चैवं वेद यश्च नापस्त्वावासतः सद्ददतीत्यैन्द्रीं सूत
वशामालभेत भूतिकामोऽजातो वा एष योऽलं भूत्यै सन्भूतिं न प्राप्नोतीन्द्रं खलु वा एषा सूत्वा वशाऽभवत् ॥ ४ ॥

स०हि०१

॥७॥

इंद्रमेवस्वेनभागधेयेनोपधावतिसएवैनंभूतिंगमयत्यैवयःसुत्वावज्ञास्यात्तमैंद्रमेवालभेतैतस्माद्वा
वर्तदिंद्रियःसाक्षादेवेंद्रियमवरुंधेऐंद्राग्नंपुनरुत्सृष्टमालभेतयआतृतीयात्पुरुषात्सोमन्नपिबेद्वि १
च्छिन्नोवाएतस्यसोमपीथोयोब्राह्मणःसन्ना ॥ ५ ॥ तृतीयात्पुरुषात्सोमन्नपिबतीन्द्राग्नीएवस्वेनभा
गधेयेनोपधावतितावेवास्मैसोमपीथंप्रयच्छतउपैनंसोमपीथोनमतियदैंद्रोभवतीन्द्रियंवैसोम
पीथइंद्रियमेवसोमपीथमवरुंधेयदाग्नेयोभवत्याग्नेयोवैब्राह्मणःस्वामेवदेवतामनुसंतनोति
पुनरुत्सृष्टोभवतिपुनरुत्सृष्टइवह्येतस्य ॥ ६ ॥ सोमपीथःसमृद्ध्यैब्राह्मणस्पत्यंतूपरमाल
भेताभिचरन्ब्रह्मणस्पतिमेवस्वेनभागधेयेनोपधावतितस्माएवैनमावृश्चतिताजगार्तिमार्छ
तितूपरोभवतिक्षुरपविर्वाएषालक्ष्मीयत्तूपरःसमृद्ध्यैस्फ्योयूपोभवतिवज्रोवैस्फ्योवज्रमेवा
स्मैप्रहरतिशरमयंबर्हिःशृणात्येवैनंवैभीदकइध्मोभिनत्त्येवैनं ॥ ७ ॥ भवत्सुन्नतःपञ्चाशज्जन ॥७॥

यंतिविंदंतेभवत्यसन्नेनैतस्येध्मस्त्रीणिच ॥ ८ ॥ बार्हस्पत्यꣳशितिपृष्ठमालभेतग्रामकामोयःका
मयेतपृष्ठꣳसमानानाꣳस्यामितिबृहस्पतिमेवस्वेनभागधेयेनोपधावतिसएवैनंपृष्ठꣳसमा
नानांकरोतिग्राम्येवभवतिशितिपृष्ठोभवतिबार्हस्पत्योह्येषदेवतयासमृद्ध्यैपौष्णꣳश्याममा
लभेतान्नकामोऽन्नंवैपूषापूषणमेवस्वेनभागधेयेनोपधावतिसएवास्मै ॥ १ ॥ अन्नंप्रयच्छ
त्यन्नादएवभवतिश्यामोभवत्येतद्वाअन्नस्यरूपꣳसमृद्ध्यैमारुतंपृश्निमालभेतान्नका
मोऽन्नंवैमरुतोमरुतएवस्वेनभागधेयेनोपधावतितएवास्माअन्नंप्रयच्छन्त्यन्नादएवभ
वतिपृश्निर्भवत्येतद्वाअन्नस्यरूपꣳसमृद्ध्याऐन्द्रमरुणमालभेतेन्द्रियकामइन्द्रमेव ॥ २ ॥ स्वे
नभागधेयेनोपधावतिसएवास्मिन्निन्द्रियंदधातीन्द्रियाव्येवभवत्यरुणोभ्रूमाभवत्येत
द्वाइन्द्रस्यरूपꣳसमृद्ध्यैसावित्रमुपध्वस्तमालभेतसनिकामःसवितावैप्रसवानामीशेस

विनारमेवस्वेनभागधेयेनोपधावतिसएवास्मैसनिंप्रसुवतिदानकामाअस्मैप्रजाभवंत्यपध्व
स्तोभवतिसावित्रोह्येषः॥ ७॥ देवतयासमृध्यैवैश्वदेवंबहुरूपमालभेतान्नकामोवैश्वदेवंवा
अन्नंविश्वानेवदेवान्त्स्वेनभागधेयेनोपधावतितएवास्माअन्नंप्रयच्छंत्यन्नादएवभवतिबहुरू
पोभवतिबहुरूपंह्यन्नंसमृध्यैवैश्वदेवंबहुरूपमालभेतग्रामकामोवैश्वदेवावैसजाताविश्वा
नेवदेवान्त्स्वेनभागधेयेनोपधावतितएवास्मै॥ ८॥ सजातान्प्रयच्छंतिग्राम्येवभवतिबहुरूपो
भवतिबहुदेवत्यो३ह्येषसमृध्यैप्राजापत्यंतूपरमालभेतयस्यानाज्ञातमिवज्योगामयेत्प्रा
जापत्योवैपुरुषःप्रजापतिःखलुवैतस्यवेदयस्यानाज्ञातमिवज्योगामयतिप्रजापतिमेवस्वे
नभागधेयेनोपधावतिसएवैनंतस्मात्स्रामान्मुंचतितूपरोभवतिप्राजापत्योह्येषदेवतया
समृध्यै॥ ९॥ अस्माइंद्रमेवैषसंजानाविश्वानेवदेवान्त्स्वेनभागधेयेनोपधावतितएवास्मै

प्राजापत्यो हि त्रीणि च॥ ८॥ वषट्कारो वै गायत्रियै शिरोच्छिनत्तस्यै रसः परापतत्तं बृहस्प
तिरुपागृह्णात्सा शितिपृष्ठा वशाभवद्यो द्वितीयः परापतत्तं मित्रावरुणावुपागृह्णीतां सा द्विरू
पा वशाभवद्यस्तृतीयः परापतत्तं विश्वे देवा उपागृह्णन्सा बहुरूपा वशाभवद्यश्चतुर्थः पराप
तत्स पृथिवीं प्राविशत्तं बृहस्पतिरभि॥ १॥ अगृह्णादस्त्वेवायं भोगायेति स उक्षवशः समभव
द्यल्लोहितं परापतत्तं रुद्र उपागृह्णात्सा रौद्री रोहिणी वशाभवद्बार्हस्पत्यां शितिपृष्ठामालभेत
ब्रह्मवर्चसकामो बृहस्पतिमेव स्वेन भागधेयेनोपधावति स एवास्मिन्ब्रह्मवर्चसं दधाति ब्र
ह्मवर्चस्येव भवति छंदसां वा एष रसो यद्वशा रस इव खलु॥ २॥ वै ब्रह्मवर्चसं छंदसामेव रसे
न रसं ब्रह्मवर्चसमवरुंधे मैत्रावरुणीं द्विरूपामालभेत वृष्टिकामो मैत्रं वा अहर्वारुणी रात्रिर
होरात्राभ्यां खलु वै पर्जन्यो वर्षति मित्रावरुणावेव स्वेन भागधेयेनोपधावति तावेवास्मा अहो

रात्राभ्यां पर्जन्यं वर्षयतश्छंदसां वा एष रसो यद्वशा रस इव खलु वै वृष्टिश्छंदसामेव रसेन ॥३॥
रसं वृष्टिमवरुंधे मैत्रावरुणीं द्विरूपामालभेत प्रजाकामो मैत्रं वा अहर्वारुणी रात्रिरहोरात्रा
भ्यां खलु वै प्रजाः प्रजायंते मित्रावरुणावेव स्वेन भागधेयेनोपधावति तावेवास्मा अहोरात्रा
भ्यां प्रजां प्रजनयतश्छंदसां वा एष रसो यद्वशा रस इव खलु वै प्रजा छंदसामेव रसेन रसं प्रजा
मव ॥४॥ रुंधे वैश्वदेवीं बहुरूपामालभेतान्नकामो वैश्वदेवं वा अन्नं विश्वानेव देवान्स्वेन भाग
धेयेनोपधावति त एवास्मा अन्नं प्रयच्छंत्यन्नाद एव भवति छंदसां वा एष रसो यद्वशा रस इव
खलु वा अन्नं छंदसामेव रसेन रसमन्नमवरुंधे वैश्वदेवीं बहुरूपामालभेत ग्रामकामो वैश्व
देवा वै ॥५॥ सजाता विश्वानेव देवान्स्वेन भागधेयेनोपधावति त एवास्मै सजातान्प्रयच्छंति ग्रा
म्येव भवति छंदसां वा एष रसो यद्वशा रस इव खलु वै सजाताश्छंदसामेव रसेन रसंः सजाताना

श्रीरशि व ॥

चरुं धे बार्हस्पत्यमुक्षवशामालभेत ब्रह्मवर्चसकामो बृहस्पतिमेव स्वेन भागधेयेनोपधावति स
एवास्मिन्ब्रह्मवर्चसं ॥ ८ ॥ दधाति ब्रह्मवर्चस्येव भवति वशं वा एष चरति यदुक्षा वशा इव खलु वै
ब्रह्मवर्चसं वशयैवैनद्वशं ब्रह्मवर्चसमवरुंधे रौद्रीं रोहिणीमालभेताभिचरन्रुद्रमेव स्वेन भागधेये
नोपधावति तस्मा एवैनमावृश्चति ताजगार्त्तिमार्छति रोहिणी भवति रौद्री ह्येषा देवतया समृध्यै
स्फ्यो यूपो भवति वज्रो वै स्फ्यो वज्रमेवास्मै प्रहरति शरमयं बर्हिः शृणात्येवैनं वैभीदक इध्मो भिनं
त्त्येवैनं ॥ ९ ॥ अग्निर्खलु वृष्टिमच्छं दसामेव रसेन रसं प्रजामवश्वेम्य देवा वै ब्रह्मवर्चसं संस्वप एकान्नविं
न्तितिभ्र्व ॥ ९ ॥ असावादित्यो न व्यरोचत तस्मै देवाः प्रायश्चित्तिमैच्छन्तस्मा एतां सौरीं श्वेतां व
शामालभन्त तयैवास्मिन्रुचमदधुर्यो ब्रह्मवर्चसकामः स्यात्तस्मा एतां सौरीं श्वेतां वशामालभे
तामुमेवादित्यं स्वेन भागधेयेनोपधावति स एवास्मिन्ब्रह्मवर्चसं दधाति ब्रह्मवर्चस्येव भवति बै

सं० द्वि० १

॥१०॥

ल्वोरूपंभवत्यसौ॥ ३॥ औवादित्योयतोजायततनोबिल्वउदतिष्ठत्सयोन्यैवब्रह्मवर्चसमवरुंधे
ब्राह्मणस्पत्यंबभ्रुकर्णमालभेताभिचरन्वारुणंदशकपालंपुरस्तान्निर्वपेद्वरुणेनैवभ्रातृव्यंग्रा
हयित्वाब्रह्मणास्तृणुतेबभ्रुकर्णोभवत्येतद्वैब्रह्मणोरूपंसमृध्यैस्फ्योयूपोभवतिवज्रोवैस्फ्यो
वज्रमेवास्मैप्रहरतिशरमयंबर्हिःशृणाति॥ २॥ त्येवैनंवैभीदकइध्मोभिनत्त्येवैनंवैष्णवंवामनमा
लभेतयंयज्ञोनोपनमेद्विष्णुर्वैयज्ञोविष्णुमेवस्वेनभागधेयेनोपधावतिसएवास्मैयज्ञंप्रयच्छत्यु
पैनंयज्ञोनमतिवामनोभवतिवैष्णवोह्येषदेवतयासमृध्यैत्वाष्ट्रंवडबमालभेतपशुकामस्त्वष्टावै
पशूनांमिथुनानां॥ ३॥ प्रजनयितात्वष्टारमेवस्वेनभागधेयेनोपधावतिसएवास्मैपशून्मि
थुनान्प्रजनयतिप्रजाहिवाएतस्मिन्पशवःप्रविष्टाअथैषपुमान्सन्वडबःसाक्षादेवप्रजांपशूनव
रुंधेमैत्रंश्वेतमालभेतसंग्रामेसंयत्तेसमयकामोमित्रमेवस्वेनभागधेयेनोपधावतिसएवैनंमि

श्री.

॥१०॥

चेणासंनेयति॥ ४॥ विद्युताल्लोमभवतिव्यवसाययस्यैवैनंप्राजापत्यंकृष्णमालभेतवृष्टिकामःप्र
जापतिर्वैवृष्ट्याईशेप्रजापतिमेवस्वेनभागधेयेनोपधावतिसएवास्मैपर्जन्यंवर्षयतिकृष्णोभ
वत्येतद्वैवृष्ट्यैरूपंरूपेणैववृष्टिमवरुंधेशबलोभवतिविद्युतमेवास्मैजनयित्वावर्षयत्यवाशृंगो
भवतिवृष्टिमेवास्मैनियच्छति॥ ५॥ असौभृणातिमिथुनानीनयतियच्छति॥ ६॥ वरुणंसु
षुवाणमन्नाद्यंनोपानमत्सएतांवारुणींकृष्णांवशामपश्यत्तांस्वायैदेवतायाआलभत
ततोवैतमन्नाद्यमुपानमद्यमलमन्नाद्यायसंतमन्नाद्यंनोपनमेत्सएतांवारुणींकृष्णांवशामा
लभेतवरुणमेवस्वेनभागधेयेनोपधावतिसएवास्माअन्नंप्रयच्छत्यन्नादः॥ ७॥ एवभवति
कृष्णाभवतिवारुणीह्येषादेवतयासमृद्ध्यैमैत्रंश्वेतमालभेतवारुणंकृष्णमपांचौषधीनांच
संधावन्नकामोमैत्रीर्वाओषधयोवारुणीरापोपांचखलुवाओषधीनांचरसमुपजीवामोमि

त्रावरुणावेवस्वेनभागधेयेनोपधावतितावेवास्मा अन्नंप्रयछतोन्नादएवभवति॥ २॥ १
अपांचौषधीनांचसंधावालभेतउभयस्यावरुध्यैविशाखोयूपोभवतिद्वैह्येतेदेवतेसमृध्यै
मैत्रंःश्वेतमालभेतवारुणंकृष्णंज्योगामयावीयन्मैत्रोभवतिमित्रेणैवास्मैवरुणंःशमय
तियद्वारुणःसाक्षादेवैनंवरुणपाशान्मुंचत्युतयदीतासुर्भवतिजीवत्येवदेवावैपुष्टिंनाविंद
न्॥ ३॥ तांमिथुनेपश्यंस्तस्यान्नसमराधयंस्तावश्विनावब्रूतामावयोर्वाएषामेतस्यांवदध्वं
मितिसाश्विनोरेवाभवद्यःपुष्टिकामःस्यात्सएतामाश्विनींयमींवशामालभेताश्विनावेवस्वे
नभागधेयेनोपधावतितावेवास्मिन्पुष्टिंधत्तःपुष्यतिप्रजयापशुभिः॥ ४॥ अन्नादोन्नाद
एवभवत्यविंदन्पंचचत्वारिंशच्च॥ ५॥ आश्विनंधूम्रललाममालभेतयोऽब्राह्मणःसो श्रीः
मंपिपासेदश्विनौवैदेवानामसोमपावास्तांतौपश्चासोमपीथंप्राप्नुतामश्विनावेतस्यदेवता ॥३३॥

यो दुर्ब्राह्मणः सोमं पिपासेत्स्यश्विनावेवस्वेनभागधेयेनोपधावति तावेवास्मै सोमपीथं प्रयच्छ
त उपैनं सोमपीथो नमति यद्धूम्रो भवति धूम्रिमाणमेवास्मादपहन्ति ललामः ॥ १ ॥ भवति मु
खत एवास्मिन्तेजो दधाति वायव्यं गोमृगमालभेत यमजघ्निवांसमभिशंसेयुरपूता वा ए
तं वागृच्छति यमजघ्निवांसमभिशंसन्ति नैष ग्राम्यः पशुर्नारण्यो यद्गोमृगो नेवैष ग्रामे नार
ण्ये यमजघ्निवांसमभिशंसन्ति वायुर्वै देवानां पवित्रं वायुमेव स्वेन भागधेयेनोपधावति
स एवं ॥ २ ॥ एनं पवयन्ति परांचीना एतस्मै व्युच्छंती व्युच्छति तमः पाप्मानं प्रविशन्ति यस्याभि
निम्रास्यमाने सूर्यो नाविर्भवति सौर्यं बहुरूपमालभेतामुमेवादित्यं स्वेन भागधेयेनोपधाव
ति स एवास्मात्तमः पाप्मानमपहन्ति प्रतीच्यस्मै व्युच्छंती व्युच्छत्यप तमः पाप्मानं हते ॥ ३ ॥ ल
लामः स एव षट्चत्वारिंशच्च ॥ १० ॥ इन्द्रं वो विश्वतस्परीन्द्रं नरो मरुतो यद्ध वो दिवो यावन्नामे ॥

सं०६०१

॥१२॥

भरेष्विंद्रं सुहवं हवामहेंहोमुचं सुकृतं दैव्यं जनं॥ अग्निं मित्रं वरुणं सातये भगं द्यावा
पृथिवी मरुतः स्वस्तये॥ ममत्तु नः परिज्मा वसर्हा ममत्तु वातो अपां वृषण्वान्॥ शिशीतमिंद्रापर्
र्वता युवं नस्तन्नो विश्वे वरिवस्यंतु देवाः॥ श्रिया वो नाम॥ १ ॥ हुवे तुराणां॥ आ यत्तृपन्मरुतो
वावशानाः॥ श्रिये कं भानुभिः सं मिमिक्षिरे ते रश्मिभिस्त ऋक्वभिः सुखादयः॥ ते वाशीमंत
इष्मिणो अभीरवो विद्रे प्रियस्य मारुतस्य धाम्नः॥ अग्निः प्रथमो वसुभिर्नो अव्यात्सोमो रुद्रेभिर
भि रक्षतु त्मना॥ इंद्रो मरुद्भिर्ऋतुधा कृणोत्वादित्यैर्नो वरुणः सं शिशातु॥ सन्नो देवो वसुभिर
ग्निः सं॥ २ ॥ सोमस्तनूभी रुद्रियाभिः॥ समिंद्रो मरुद्भिर्यज्ञियैः समादित्यैर्नो वरुणो अजिज्ञिप
त्॥ यथादित्या वसुभिः संबभूवुर्मरुद्भी रुद्राः समजानताभि॥ एवा त्रिणामन्नहृणीयमाना
विश्वे देवाः समनसो भवंतु॥ कुत्राचिद्यस्य समृतौ रण्वा नरो नृषदने॥ अर्हंतश्चिद्यमिंधते सं

ऋ०वे

॥१२॥

जनयंतिज्योतिर्वृः॥ संयदिषोवनामहेसंहव्यामानुषाणां॥ उतद्युम्नस्यशवसः॥ २ ॥ ऋ
तस्यरश्मिमाददे॥ यज्ञोदेवानांप्रत्येतिसुम्नमादित्यासोभवतामृडयंतः॥ आवोर्वाचीसुम
तिर्ववृत्यादंहोश्चिद्यावरिवोवित्तरासत्॥ शुचिरपःसूयवसाअदब्धउपक्षेतिवृद्धवयाःसु
वीरः॥ नकिष्टंघ्नंत्यंतितोनदूराद्यआदित्यानांभवतिप्रणीतौ॥ धारयंतआदित्यासोजगत्स्था
देवाविश्वस्यभुवनस्यगोपाः॥ दीर्घाधियोरक्षमाणाः॥ ४ ॥ असुर्यमृतावानश्चयमाना
ऋणानि॥ तिस्रोभूमीर्धारयंत्रींरुतद्यून्त्रीणिव्रताविदथेअंतरेषां॥ ऋतेनादित्यामहि
वोमहित्वंतदर्यमन्वरुणमित्रचारु॥ त्यान्नुक्षत्रियांअवआदित्यान्याचिषामहे॥ सु
मृडीकांअभिष्टये॥ नदक्षिणाविचिकितेनसव्यानप्राचीनमादित्यानोतपश्चा॥ पाक्या
चिद्वसवोधीर्याचित्॥ ५ ॥ युष्मानीतोअभयंज्योतिरश्यां॥ आदित्यानामवसानूतनेन

नसस्तीमहिम्नामगणाद्धांनेमेन॥ अनागास्त्वेअदितित्वेतुरासइमंयज्ञंदधतुश्रोषमाणाः॥
इमंमेवरुणश्रुधीहवमद्याचमृडय॥ त्वामवस्युराचके॥ तत्वायामिब्रह्मणावंदमानस्त
दाशास्तेयजमानोहविर्भिः॥ अहेडमानोवरुणेहबोध्युरुशंसमानआयुःप्रमोषीः॥ ८॥
नाभाग्निःसंश्रावसोरक्षमाणाधीयोचिदेकान्नपंचाशच्च॥ ११॥ वायव्यंप्रजापतिस्ता
वरुणंदेवासुरास्पर्धसाचादित्योदक्षोर्घंमांमिंद्रोबृहस्पतिर्बाहस्पत्यंवषट्कारोसोमोसौरीवरु
णमाश्विनमिंद्रोनरएकादश॥ ११॥ वायव्यमाग्नेयींकृष्णाग्रीवीमसावादित्योवाअ
होरात्राणिवषट्कारःप्रजननयित्नाकुवेनुराणांपंचपष्टिः॥ ६५॥ हरिःॐ॥ श्रीकृष्णा
र्पणमस्तु॥ न्यूनातिरिक्तं सर्वंसंपूर्णमस्तु॥ यदक्षरपदभ्रष्टंमात्राहीनंचयद्भवेत्॥ त
त्सर्वंक्षम्यतांदेवप्रसीदपरमेश्वर॥ १॥ इतिश्रीसंहितायांद्वितीयाष्टकेप्रथमोध्यायः श्रीः॥

श्रीगजाननायनमः॥ हरिःओं॥ प्रजापतिःप्रजाअसृजतताःसृष्टाइंद्राग्नीअपागूहतां
सोऽचायत्प्रजापतिरिंद्राग्नीवैमेप्रजाअपाघुक्षतामितिसएतमैंद्राग्नमेकादशकपालम
पश्यत्तंनिरवपत्तावस्मैप्रजाःप्रासाधयतामिंद्राग्नीवाएतस्यप्रजामपगूहतोयोलंप्र
जायैसन्प्रजांनविंदतऐंद्राग्नमेकादशकपालंनिर्वपेत्प्रजाकामइंद्राग्नी॥ १ ॥एवस्वेनभा
वा गधेयेनोपधावतितावेवास्मैप्रजांप्रसाधयतोविंदतेप्रजामैंद्राग्नमेकादशकपालंनिर्वपे
त्स्पर्धमानःक्षेत्रेवासजातेषुवेंद्राग्नीएवस्वेनभागधेयेनोपधावतिताभ्यामेवेंद्रियंवीर्यंभ्रा
तृव्यस्यवृंक्तेविपाप्मनाभ्रातृव्येणजयतेपवाएतस्मादिंद्रियंवीर्यंक्रामतियःसंग्राममुप
प्रयात्यैंद्राग्नमेकादशकपालंनिः॥ २ ॥र्वपेत्संग्राममुपप्रयास्यन्निंद्राग्नीएवस्वेनभाग
धेयेनोपधावतितावेवास्मिन्निंद्रियंवीर्यंधत्तःसहेंद्रियेणवीर्येणोपप्रयातिजयतितं

सं॰ द्वि॰ २

॥१४॥ संग्रामं विवा एष इंद्रियेण वीर्येण र्ध्यते यः संग्रामं जयत्यैंद्राग्नमेकादशकपालं निर्वपेत्संग्रामं
जित्वेंद्राग्नी एव स्वेन भागधेयेनोपधावति तावेवास्मिन्निंद्रियं वीर्यं ॥ ३ ॥ धत्तो नेंद्रियेण वीर्ये
ण व्यृध्यतेऽप वा एतस्मादिंद्रियं वीर्यं क्रामति य एति जनतामैंद्राग्नमेकादशकपालं निर्वपेज्ज
नतामेष्यन्निंद्राग्नी एव स्वेन भागधेयेनोपधावति तावेवास्मिन्निंद्रियं वीर्यं धत्तः सहेंद्रियेण वी
र्येणोप जनतामेति पौष्णं चरुमनु निर्वपेत्पूषा वा इंद्रियस्य वीर्यस्यानुप्रदाता पूषणमेव ॥ ४ ॥
स्वेन भागधेयेनोपधावति स एवास्मा इंद्रियं वीर्यमनुप्रयच्छति क्षैत्रपत्यं चरुं निर्वपेज्जनतां
मागत्येयं वै क्षेत्रस्य पतिरस्यामेव प्रतितिष्ठत्यैंद्राग्नमेकादशकपालमुपरिष्टान्निर्वपेद
स्यामेव प्रतिष्ठायेंद्रियं वीर्यमुपरिष्टादात्मन्धत्ते ॥ ५ ॥ प्रजाकाम इंद्राग्नी उपप्रयात्सैंद्राग्न
मेकादशकपालं निर्वीर्यं पूषणमेवैकान्नचत्वारिंशच्च ॥ १ ॥ अग्नये पथिकृते पुरोडाश ॥३॥

मष्टाकपालंनिर्वपेद्योदर्शपूर्णमासयाजीसन्नमावास्यांवापौर्णमासींवातिपादयेत्पथोवाएषो
ध्यपथेनैतियोदर्शपूर्णमासयाजीसंनमावास्यांवापौर्णमासींवातिपादयत्यग्निमेवपथिकृ
तꣳस्वेनभागधेयेनोपधावतिसएवैनमपथात्पंथामपिनयत्यनड्वान्दक्षिणावहीह्येषसमृद्ध्या
अग्नयेव्रतपतये॥ १ ॥ पुरोडाशमष्टाकपालंनिर्वपेद्यआहिताग्निःसंनव्रत्यमिवचरेदग्निमेव
व्रतपतिꣳस्वेनभागधेयेनोपधावतिसएवैनंव्रतमालंभयतिव्रत्योभवत्यग्नयेरक्षोघ्नेपुरो
डाशमष्टाकपालंनिर्वपेद्यꣳरक्षाꣳसिसचेरन्नग्निमेवरक्षोहणꣳस्वेनभागधेयेनोपधावतिस
एवास्माद्रक्षाꣳस्यपहंतिनिशितायांनिर्वपेत्॥ २ ॥ निशितायाꣳहिरक्षाꣳसिप्रेरतेसंप्रेर्णान्ये
वैनानिहंतिपरिश्रितेयाजयेद्रक्षसामनन्ववचारायरक्षोघ्नीयाज्यानुवाक्येभवतोरक्षसाꣳ
स्तृत्याअग्नयेरुद्रवतेपुरोडाशमष्टाकपालंनिर्वपेदभिचरन्नेषावाअस्यघोरातनूर्यद्रुद्रस्तस्मा

एवैनमावृश्चतिताजगार्त्तिमार्छत्यग्नयेसुरभिमतेपुरोडाशमष्टाकपालंनिर्वपेद्यस्यगावो
वापुरुषाः ॥ ३ ॥ वाप्रमीयेरन्योवाबिभीयादेषावाअस्यभेषज्यातनूर्यत्सुरभिमतीतयैवास्मै
भेषजंकरोतिसुरभिमतेभवतिपूतीगंधस्यापहत्याअग्नयेक्षामवतेपुरोडाशमष्टाकपालंनि
र्वपेत्संग्रामेसंयत्तेभागधेयेनैवैनंꣳशमयित्वापरानभिनिर्दिशतियमवरेषांविध्यंतिजीव
तिसयंपरेषांप्रमीयतेतंजयंतितꣳसंग्रामं ॥ ४ ॥ अभिवाएषएतानुच्यतियेषांपूर्वापराअ
न्वंचःप्रमीयंतेपुरुषाहुतिर्ह्यस्यप्रियतमाग्नयेक्षामवतेपुरोडाशमष्टाकपालंनिर्वपेद्भागधे
येनैवैनंꣳशमयतिनैषांपुरायुषोपरःप्रमीयतेभिवाएषएतस्यगृहानुच्यतियस्यगृहान्दह
त्यग्नयेक्षामवतेपुरोडाशमष्टाकपालंनिर्वपेद्भागधेयेनैवैनंꣳशमयतिनास्यापरंगृहान्दह
ति ॥ ५ ॥ अन्नपतयेनिःशितायांनिर्वपेत्सुरूपाःसंग्रामंनवचत्वारिंशच्च ॥ २ ॥ अग्नयेकामायपु

शेडाशमष्टाकपालंनिर्वपेद्यंकामोनोपनमेदग्निमेवकामं स्वेनभागधेयेनोपधावतिसएवै
नंकामेनसमर्धयत्युपैनंकामोनमत्यग्नयेयविष्ठायपुरोडाशमष्टाकपालंनिर्वपेत्स्पर्धमानः
क्षेत्रेवासजातेषुवाग्निमेवयविष्ठं स्वेनभागधेयेनोपधावतितेनैवेंद्रियंवीर्यंभ्रातृव्यस्य॥१॥
युवतेविपाप्मनाभ्रातृव्येणजयतेग्नयेयविष्ठायपुरोडाशमष्टाकपालंनिर्वपेदभिचर्यमाणो
ग्निमेवयविष्ठं स्वेनभागधेयेनोपधावतिसएवास्माद्रक्षांसियवयतिनैनमभिचरन्स्तृणुते
ग्नयआयुष्मतेपुरोडाशमष्टाकपालंनिर्वपेद्यःकामयेतसर्वमायुरियामित्यग्निमेवायुष्मंतं स्वे न
नभागधेयेनोपधावतिसएवास्मिन्न॥ २ ॥आयुर्दधातिसर्वमायुरेत्यग्नयेजातवेदसेपुरोडा
शमष्टाकपालंनिर्वपेद्भूतिकामोग्निमेवजातवेदसं स्वेनभागधेयेनोपधावतिसएवैनंभूतिं
गमयतिभवत्येवाग्नयेरुक्मतेपुरोडाशमष्टाकपालंनिर्वपेद्रुक्कामोग्निमेवरुक्मंतं स्वेनभाग

सं०हि०२
॥१६॥

धेयेनोपधावतिसएवास्मिन्रुचंदधातिरोचतएवाग्नयेतेजस्वतेपुरोडाशं॥ [illegible] ॥अष्टाकपा
लंनिर्वपेत्तेजस्कामोग्निमेवतेजस्वंतंःस्वेनभागधेयेनोपधावतिसएवास्मिन्तेजोदधातिते
जस्व्येवभवत्यग्नयेसाहंत्यायपुरोडाशमष्टाकपालंनिर्वपेत्सीक्षमाणोग्निमेवसाहंत्यंःस्वेन
भागधेयेनोपधावतितेनैवसहतेयंःसीक्षते॥ ५॥ ग्नालव्यस्यास्मिन्तेजस्वतेपुरोडाशम
ष्टाविंःशश्च॥ ३ ॥अग्नयेन्नवतेपुरोडाशमष्टाकपालंनिर्वपेद्यःकामयेतान्नवान्स्यामित्य
ग्निमेवान्नवंतंःस्वेनभागधेयेनोपधावतिसएवैनमन्नवंतंकरोत्यन्नवानेवभवत्यग्नयेन्ना
दायपुरोडाशमष्टाकपालंनिर्वपेद्यःकामयेतान्नादस्यामित्यग्निमेवान्नादंःस्वेनभागधेयेनो
पधावतिसएवैनमन्नादंकरोत्यन्नादः॥ १ ॥ एवभवत्यग्नयेन्नपतयेपुरोडाशमष्टाकपालंनि
र्वपेद्यःकामयेतान्नपतिःस्यामित्यग्निमेवान्नपतिंःस्वेनभागधेयेनोपधावतिसएवैनमन्नप ॥३॥

भपतिंकरोत्य

तिरेवभवत्यग्नयेपवमानायपुरोडाशमष्टाकपालंनिर्वपेदग्नयेपावकायाग्नयेशुचयेज्योगा
मयावीयदग्नयेपवमानायनिर्वपतिप्राणमेवास्मिन्तेनदधातियदग्नये॥ २ ॥पावकाय
वाचमेवास्मिन्तेनदधातियदग्नयेशुचयआयुरेवास्मिन्तेनदधात्युतयदीतासुर्भवतिजी
वत्येवैतामेवनिर्वपेच्चक्षुष्कामोयदग्नयेपवमानायनिर्वपतिप्राणमेवास्मिन्तेनदधातियद
ग्नयेपावकायवाचमेवास्मिन्तेनदधातियदग्नयेशुचयेचक्षुरेवास्मिन्तेनदधाति॥ ३ ॥उतय
स्य द्यंधोभवतिप्रैवपश्यत्यग्नयेपुत्रवतेपुरोडाशमष्टाकपालंनिर्वपेदिंद्रायपुत्रिणेपुरोडाशमेकाद
शकपालंप्रजाकामोऽग्निरेवास्मैप्रजांप्रजनयतिवृद्धामिंद्रःप्रयच्छत्यग्नयेरसवतेऽजक्षीरेच
रुंनिर्वपेद्यःकामयेतरसवान्त्स्यामित्यग्निमेवरसवन्तꣳस्वेनभागधेयेनोपधावतिसएवैनꣳ
रसवन्तंकरोति॥ ४ ॥रसवानेवभवत्यजक्षीरेभवत्याग्नेयीवाएषायदजासाक्षादेवरसमव

रुंधेग्नयेवसुमतेपुरोडाशमष्टाकपालंनिर्वपेद्यः कामयेतवसुमान्स्यामित्यग्निमेववसुमं
तं॑ स्वेनभागधेयेनोपधावतिसएवैनंवसुमंतंकरोतिवसुमानेवभवत्यग्नयेवाजसृतेपुरो २
डाशमष्टाकपालंनिर्वपेत्संग्रामेसंयत्तेवाजं॥ ५ ॥ वाएषसिसीर्षतियः संग्रामंजिगीषत्यग्निः
खलुवैदेवानांवाजसृदग्निमेववाजसृतं॑ स्वेनभागधेयेनोपधावतिधावतिवाजं॑ हंतिवृत्रं
जयतितं॑ संग्राममथोअग्निरिवनप्रतिधृषेभवत्यग्नयेग्निवतेपुरोडाशमष्टाकपालंनिर्वपे
द्यस्याग्नावग्निमभ्युद्धरेयुर्निर्दिष्टभागोवाएतयोरन्योनिर्दिष्टभागोन्यस्तौसंभवंतौयज
मानं॥ ६ ॥ अभिसंभवतः सईश्वरआर्तिमार्तोर्यदग्नयेग्निवतेनिर्वपतिभागधेयेनैवैनौ ह
य शमयतिनार्तिमार्छतियजमानोग्नयेज्योतिष्मतेपुरोडाशमष्टाकपालंनिर्वपेद्यस्याग्निरुद्धृ
तोहुतेग्निहोत्रउद्वायेदपरआदीप्यानूद्धृत्यइत्याहुस्तत्तथानकार्यंयद्भागधेयमभिपूर्वउ

ह्रियतेकिमपरोभ्युत ॥ ७ ॥ ह्रियेतेतिलान्येवावृक्षाणानिसंनिधायमंथेदितःप्रथमंजज्ञेअ
२ ग्निःस्वाद्योनेंधिजातवेदाः ॥ सगायत्रियात्रिष्टुभाजगत्यादेवेभ्योहव्यंवहतुप्रजानन्नि
तिछंदोभिरेवैनंस्वाद्योनेःप्रजनयत्येषवावसोग्निरित्याहुर्ज्योतिस्त्वाअस्यपरापतितमि
तियदग्नयेज्योतिष्मतेनिर्वपतियदेवास्यज्योतिःपराप तितंतदेवावरुंधे ॥ ८ ॥ करोत्यन्ना
दंदधातियदग्नयेशुचयेशुचमेवास्मिन्तेनदधातिकरोतिवाजंयजमानस्यदेवास्यषड्च ॥ ९ ॥
वैश्वानरंद्वादशकपालंनिर्वपेद्वारुणंचरुंदधिक्राव्णेचरुमभिशस्यमानोयद्वैश्वानरोद्वा
दशाकपालोभवतिसंवत्सरोवाअग्निर्वैश्वानरःसंवत्सरेणैवैनंस्वदयत्यपपापंवर्णंहते
वारुणेनैवैनंवरुणपाशान्मुंचतिदधिक्राव्णापुनातिहिरण्यंदक्षिणापवित्रंवैहिरण्यंपु
नात्येवैनमाद्यमस्यान्नंभवत्येतामेवनिर्वपेत्प्रजाकामःसंवत्सरः ॥ १ ॥ वाएतस्याशांतोयो

सं० द्वि० २

॥१९॥

निं प्रजायै पशूनां निर्दहति यो लं प्रजायै सन्प्रजां न विंदते यद्वैश्वानरो द्वादशाकपालो भवति सं
वत्सरो वा अग्निर्वैश्वानरः संवत्सरमेव भागधेयेन शमयति सो ऽस्मै शांतः स्वाद्योनेः प्रजां प्रज
नयति वारुणेनैवैनं वरुणपाशान्मुंचति दधिक्राव्णा पुनाति हिरण्यं दक्षिणा पवित्रं वै हिरण्यं
पुनात्येवैनं ॥ २ ॥ विंदते प्रजां वैश्वानरं द्वादशाकपालं निर्वपेत्पुत्रे जाते यदष्टाकपालो भवति
गायत्रियैवैनं ब्रह्मवर्चसेन पुनाति यन्नवकपालस्त्रिवृतैवास्मिन्तेजो दधाति यद्दशाकपालो
विराजैवास्मिन्नन्नाद्यं दधाति यदेकादशाकपालस्त्रिष्टुभैवास्मिन्निंद्रियं दधाति यद्द्वादशाक
पालो जगत्यैवास्मिन्पशून्दधाति यस्मिन्जात एतामिष्टिं निर्वपति पूतः ॥ ३ ॥ एव तेजस्व्यन्ना
द इंद्रियावी पशुमान्भवत्यव वा एष सुवर्गाल्लोकाच्छिद्यते यो दर्शपूर्णमासयाजी सन्नमावा
स्यां वा पौर्णमासीं वातिपादयति सुवर्गाय हि लोकाय दर्शपूर्णमासाविज्येते वैश्वानरं द्वादशा ॥८॥

कपालं निर्वपेदमावास्यां वा पौर्णमासीं वातिपाद्य संवत्सरो वा अग्निर्वैश्वानरः संवत्सरमेव प्री
णात्यथो संवत्सरमेवास्मा उपदधाति सुवर्गस्य लोकस्य समष्ट्यै ॥ ४ ॥ अथो देवता एवान्वा
रभ्य सुवर्गं लोकमेति वीरहा वा एष देवानां योऽग्निमुद्वासयते न वा एतस्य ब्राह्मणा ऋतायवः
पुरान्नमक्षन्नाग्नेयमष्टाकपालं निर्वपेद्वैश्वानरं द्वादशकपालमग्निमुद्वासयिष्यन्यदष्टा
कपालो भवत्यष्टाक्षरा गायत्री गायत्रोऽग्निर्यावानेवाग्निस्तस्मा आतिथ्यं करोत्यथो यथा ज
नं यतेऽवसं करोति तादृक् ॥ ५ ॥ एव तद्द्वादशकपालो वैश्वानरो भवति द्वादश मासाः संवत्सरः
संवत्सरः खलु वा अग्नेर्योनिः स्वामेवैनं योनिं गमयत्याद्यमस्यान्नं भवति वैश्वानरं द्वादशक
पालं निर्वपेन्मारुतं सप्तकपालं ग्रामकाम आहवनीये मधिश्रयति गार्हपत्ये मारुतं वैश्वान
पापवस्यसस्य विधृत्यै द्वादशकपालो वैश्वानरो भवति द्वादश मासाः संवत्सरः संवत्सरे

स० द्वि० २

॥ १२ ॥

यो वा अस्मै सजाताः श्रावयन्ति मारुतो भवति ॥ ६ ॥ मरुतो वै देवानां विशो देवविशेनैवास्मै
मनुष्यविशमव रुन्धे सप्तकपालो भवति सप्तगणा वै मरुतो गणश एवास्मै सजातानव रुन्धे
अनूच्यमान आ सादयति विशमेवास्मा अनुवर्त्मानं करोति ॥ ७ ॥ प्रजाकामः संवत्सरः
पुनात्येवैनं पूतः संवत्सरस्य स्वदयत्या रुन्धो भवत्येकान्न त्रिंशद्दाश्च ॥ ८ ॥ आदित्यं चरुं निर्वपेत्सं
ग्राममुपप्रयास्यन्नियं वा अदितिरस्यामेव पूर्वे प्रति तिष्ठन्ति वैश्वानरं द्वादशकपालं निर्वपे
दायतनं गत्वा संवत्सरो वा अग्निर्वैश्वानरः संवत्सरः खलु वै देवानामायतनमेतस्माद्वा आ
यतनाद्देवा असुरानजयन्यद्वैश्वानरं द्वादशकपालं निर्वपति देवानामेवायतने यतते जय
ति तं संग्राममेतस्मिन्वा एतौ मृजाते ॥ ९ ॥ यो विद्विषाणयोरन्नमत्ति वैश्वानरं द्वादशकपा
लं निर्वपेद्विद्विषाणयोरन्नं जग्ध्वा संवत्सरो वा अग्निर्वैश्वानरः संवत्सरस्वदितमेवात्ति ॥ ६ ॥

नास्मिन्नृजाते संवत्सरायुवा एतौ सममाते यो सममाने तयोर्यः पूर्वोऽभिद्रुह्यति तं वरुणो
गृह्णाति वैश्वानरं द्वादशकपालं निर्वपेत्सममानयोः पूर्वोऽभिद्रुह्य संवत्सरो वा अग्निर्वैश्वान
रः संवत्सरमेवाप्त्वा निर्वरुणं ॥ २ ॥ परस्तादभिद्रुह्यति नैनं वरुणो गृह्णात्याव्यं वा एष प्रतिगृ
ह्णाति यो विं प्रतिगृह्णाति वैश्वानरं द्वादशकपालं निर्वपेदविं प्रतिगृह्य संवत्सरो वा अग्निर्वै
श्वानरः संवत्सरः स्वदितामेव प्रतिगृह्णाति नाव्यं प्रतिगृह्णात्यात्मनो वा एष मात्रामाप्नोति
य उभयादत्प्रतिगृह्णात्यश्वं वा पुरुषं वा वैश्वानरं द्वादशकपालं निर्वपेदुभयादत्॥ ३ ॥ प्रति
गृह्य संवत्सरो वा अग्निर्वैश्वानरः संवत्सरः स्वदितमेव प्रतिगृह्णाति नात्मनो मात्रामाप्नोति
वैश्वानरं द्वादशकपालं निर्वपेत्सनिमेष्यन्त्संवत्सरो वा अग्निर्वैश्वानरो यदा खलु वै संवत्सरं
जनतायां चरत्यथ स धनार्घो भवति यद्वैश्वानरं द्वादशकपालं निर्वपति संवत्सरसातामेव

सनिमभिप्रच्यवते दानकामा अस्मै प्रजा भवन्ति यो वै संवत्सरं ॥ ४ ॥ प्रयुज्य न विमुञ्चत्य
प्रतिष्ठानो वै स भवत्येतमेव वैश्वानरं पुनरागत्य निर्वपेद्यमेव प्रयुङ्क्ते तं भागधेयेन विमुञ्च
ति प्रतिष्ठित्यै यया रज्ज्वोत्तमां गामाजेत्तां भ्रातृव्याय प्रहिणुयान्निर्ऋतिमेवास्मै प्रहिणोति ॥ ५ ॥
मृज्ञाते निर्वरुणं वपेदुभयाद्यो वै संवत्सरं षट्त्रिंशच्च ॥ ६ ॥ ऐन्द्रं चरुं निर्वपेत्पशुका
म ऐन्द्रा वै पशव इन्द्रमेव स्वेन भागधेयेनोप धावति स एवास्मै पशून्प्र यच्छति पशुमानेव भवति
चरुर्भवति स्वादेवास्मै योनेः पशून्प्र जनयतीन्द्रायेन्द्रियावते पुरोडाशमेकादशकपालं निर्व
पेत्पशुकाम इन्द्रियं वै पशव इन्द्रमेवेन्द्रियावन्तं स्वेन भागधेयेनोप धावति सः ॥ १ ॥ एवास्मा इन्द्रि
यं पशून्प्र यच्छति पशुमानेव भवतीन्द्राय घर्मवते पुरोडाशमेकादशकपालं निर्वपेद्ब्रह्मवर्चस
कामो ब्रह्मवर्चसं वै घर्म इन्द्रमेव घर्मवन्तं स्वेन भागधेयेनोप धावति स एवास्मिन्ब्रह्मवर्च ॥ ७ ॥

संदधातिब्रह्मवर्चस्येवभवतींद्रायार्कवतेपुरोडाशमेकादशकपालंनिर्वपेदन्नकामोर्को
वैदेवानामन्नमिंद्रमेवार्कवंतंस्वेनभागधेयेनोपधावतिसएवास्माअन्नंप्रयच्छत्यन्ना ॥२॥
दएवभवतींद्रायघर्मवतेपुरोडाशमेकादशकपालंनिर्वपेदिंद्रायेंद्रियावतइंद्रायार्कवते
भूतिकामोयदिंद्रायघर्मवतेनिर्वपतिशिरएवास्यतेनकरोतियदिंद्रायेंद्रियावतआत्मा
नमेवास्यतेनकरोतियदिंद्रायार्कवतेभूतएवान्नाद्येप्रतितिष्ठतिभवत्येवेंद्राय॥३॥अं
होमुचेपुरोडाशमेकादशकपालंनिर्वपेद्यःपाप्मनागृहीतःस्यात्पाप्मावाअंहइंद्रमेवां
होमुचंस्वेनभागधेयेनोपधावतिसएवैनंपाप्मनोंहसोमुंचतींद्रायवैमृधायपुरोडा
शमेकादशकपालंनिर्वपेद्यंमृधोभिप्रवेपेरन्राष्ट्राणिवाभिसमियुरिंद्रमेववैमृधंस्वेन
भागधेयेनोपधावतिसएवास्मान्मृधः॥४॥अपहंतींद्रायत्रात्रेपुरोडाशमेकादशकपा

सं॰ द्वि॰ २

॥ २१ ॥

लं निर्वपेद्बद्धो वा परियत्तो वेंद्रमेव त्रातारं स्वेन भागधेयेनोपधावति स एवैनं त्रायत इंद्रायार्
काश्वमेधवते पुरोडाशमेकादशकपालं निर्वपेद्यं महायज्ञो नोपनमेदेते वै महायज्ञस्यांत्ये
तनू यदर्काश्वमेधाविंद्रमेवार्काश्वमेधवंतं स्वेन भागधेयेनोपधावति स एवास्मा अंततो म
हायज्ञं च्यावयत्युपैनं महायज्ञो नमति ॥ ५ ॥ इंद्रियावंतं स्वेन भागधेयेनोपधावति सो
र्कवंतं स्वेन भागधेयेनैवेंद्रायास्मान्मृधोऽसमसृक्त च ॥ ७ ॥ इंद्रायान्वृजवे पुरोडाशमे
कादशकपालं निर्वपेद्ग्रामकाम इंद्रमेवान्वृजुं स्वेन भागधेयेनोपधावति स एवास्मै स
जातानानुकान्करोति ग्राम्येव भवतींद्राण्यै चरुं निर्वपेद्यस्य सेना संशितेव स्यादिंद्राणी
वै सेनायै देवतेंद्राणीमेव स्वेन भागधेयेनोपधावति सैवास्य सेनां संश्यति बल्बजानपि ॥ ३ ॥ ये
इध्मे सन्नह्येद्गौर्यत्राधिष्कन्ना न्यमेहत्ततो बल्बजा उदतिष्ठन्गवामेवैनं न्यायमपिनीय ॥ ८ ॥

गा वैद्रयतींद्राय मन्युमते मनस्वते पुरोडाशमेकादशकपालं निर्वपेत्संग्रामे संयत्त इंद्रिये
णवै मन्युना मनसा संग्रामं जयतींद्रमेव मन्युमंतं मनस्वंतं स्वेन भागधेयेनोपधावति स
एवास्मिन्निंद्रियं मन्युं मनो दधाति जयति तं॥ २॥ संग्राममेतामेव निर्वपेद्यो हतमनाः स्वयं
पापइवस्यादेतानि हि वा एतस्मादपक्रांतान्यथैष हतमनाः स्वयंपाप इंद्रमेव मन्युमंतं मन
स्वंतं स्वेन भागधेयेनोपधावति स एवास्मिन्निंद्रियं मन्युं मनो दधाति न हतमनाः स्वयंपा
पो भवतींद्राय दात्रे पुरोडाशमेकादशकपालं निर्वपेद्यः कामयेत दानकामा मे प्रजाः स्युः॥ ३॥
इतींद्रमेव दातारं स्वेन भागधेयेनोपधावति स एवास्मै दानकामाः प्रजाः करोति दानका
मा अस्मै प्रजा भवंतींद्राय प्रदात्रे पुरोडाशमेकादशकपालं निर्वपेद्यस्मै प्रत्तमिव सन्न प्र
दीयेतेंद्रमेव प्रदातारं स्वेन भागधेयेनोपधावति स एवास्मै प्रदापयतींद्राय सुत्राम्णे पुरो

त्राम्णएकादशकपालंनिर्वपेदपरुद्धोवा॥ ४॥ अपरुध्यमानोवेंद्रमेवसुत्रामाणंस्वेनभा
गधेयेनोपधावतिसएवैनंत्रायतेनपरुध्योभवतीद्रोवैसदृङ्देवताभिरासीत्सनव्यावृत
मगच्छत्सप्रजापतिमुपाधावत्तस्माएतमैंद्रमेकादशकपालंनिरवपत्तेनैवास्मिन्निंद्रियम
दधाच्छक्वरीयाज्यानुवाक्येअकरोद्वज्रोवैशक्वरीसएनंवज्रोभूत्वाऐंध॥ ६॥ सोभवत्सो
बिभेद्धतःप्रमाधक्ष्यतीतिसप्रजापतिंपुनरुपाधावत्सप्रजापतिःशक्वर्याअधिरेवतींनि
रमिमीतशांत्याअप्रदाहाययोलंश्रियैसन्त्सदृङ्समानैःस्यात्तस्माएतमैंद्रमेकादश रव
कपालंनिर्वपेदिंद्रमेवस्वेनभागधेयेनोपधावतिसएवास्मिन्निंद्रियंदधातिरेवतीपुरोनुवा
हा क्याभवतिशांत्याअप्रदाहायशक्वरीयाज्यावज्रोवैशक्वरीसएनंवज्रोभूत्वाइंधेभवत्येव॥ ७॥
अपिनःस्युर्वैधभवतिचतुर्दशच॥ ८॥ आग्नावैष्णवमेकादशकपालंनिर्वपेदभिचरन्त्स

रस्वत्याज्यभागा स्याद्बार्हस्पत्यश्चरुर्यदाग्नावैष्णव एकादशकपालो भवत्यग्निः सर्वा देव
ता विष्णुर्यज्ञो देवताभिश्चैवैनं यज्ञेन चाभि चरति सरस्वत्याज्यभागा भवति वाग्वै सरस्व
ती वाचैवैनमभि चरति बार्हस्पत्यश्चरुर्भवति ब्रह्म वै देवानां बृहस्पतिर्ब्रह्मणैवैनमभि च
रति ॥ १ ॥ प्रति वै परस्तादभि चरन्तमभि चरन्ति द्वेद्वे पुरोनुवाक्ये कुर्यादति प्रयुक्त्या एतयै
व यज्ञेनाभिचर्यमाणो देवताभिरेव देवताः प्रति चरति यज्ञेन यज्ञं वाचा वाचं ब्रह्मणा ब्रह्म स ब्र ५
देवताश्चैव यज्ञं च मध्यतो व्यवसर्पति तस्य न कुतश्चनोपाव्याधो भवति नैनमभिचरन्त्स्तृ
णुत आग्नावैष्णवमेकादशकपालं निर्वपेद्यं यज्ञो न ॥ २ ॥ उपनमेदग्निः सर्वा देवता विष्णुर्य
ज्ञोऽग्निं चैव विष्णुं च स्वेन भागधेयेनोप धावति तावेवास्मै यज्ञं प्रयच्छत उपैनं यज्ञो नमत्याग्ना
वैष्णवं घृते चरुं निर्वपेच्चक्षुष्कामोऽग्नेर्वै चक्षुषा मनुष्या वि पश्यन्ति यज्ञस्य देवा अग्निं चैव वि

ष्णुंचस्वेनभागधेयेनोपधावतितावेव॥ ३॥ अस्मिंचरुर्धत्तन्भ्वस्कृ ब्धानेवभवतिधुन्नैवा
एलद्धेतोयद्राज्यमनडुहस्तंडुलामिथुनादेवास्मैचरुः प्रजनयतिघृतेभवतिरेतोवैघृतंन
अभ्वस्कृ स्तेजसैवास्मैतेजभ्वस्कुरवरुंधइंद्रियंवैवीर्यंवृंक्तेभ्रातृव्योयजमानोयजमान
स्याध्वरकल्पांप्रतिनिर्वपेद्भ्रातृव्येयजमानेनास्येंद्रियं॥ ४॥ वीर्यंवृंक्तेपुरावाचःप्रवदि
तोर्निर्वपेद्यावंत्येवंवाक्कामप्रोरितांभ्रातृव्यस्यवृंक्तेतामस्यवाचंप्रवदंतीमन्यावाचोनुप्र
वदंतितानाइंद्रियंवीर्यंयजमानेदधत्याग्नावैष्णवमष्टाकपालंनिर्वपेत्प्रातःसवनस्याकाले
सर्रंस्थुत्याज्यभागास्याद्बार्हस्पत्यश्चरुर्यदष्टाकपालोभवत्यष्टाक्षरागायत्रीगायत्रंप्रातः
सवनंप्रातःसवनमेवतेनाप्नोति॥ ५॥ आग्नावैष्णवमेकादशकपालंनिर्वपेन्माध्यंदिनस्य
सवनस्याकालेसर्रंस्थुत्याज्यभागास्याद्बार्हस्पत्यश्चरुर्यदेकादशकपालोभवत्येकादशाक्षरा
को

त्रिष्टुभं माध्यंदिनꣳ सवनं माध्यंदिनमेव सवनं तेनाप्नोत्याग्नावैष्णवमेकादशकपालं
निर्वपेत्तृतीयसवनस्याकाले सरस्वत्याज्यभागा स्याद्बार्हस्पत्यश्चरुर्यद्द्वादशकपालो भव
ति द्वादशाक्षरा जगती जागतं तृतीयसवनं तृतीयसवनमेव तेनाप्नोति देवताभिरेव देवताः ॥ ६ ॥
प्रति चरति यज्ञेन यज्ञं वाचा वाचं ब्रह्मणा ब्रह्म स कपालैरेव छंदाꣳस्याप्नोति पुरोडाशैः सवना
नि मैत्रावरुणमेककपालं निर्वपेद्वशायै काले यैवासौ भ्रातृव्यस्य वशानूबंध्या सो एवैषैतस्यै
ककपालो भवति न हि कपालैः पशुमर्हत्याप्तुं ॥ ७ ॥ ब्रह्मणे वैनमभिचरति यज्ञो न ता वेवास्यैंद्रि
यमाप्नोति देवताः सप्तत्रिꣳशच्च ॥ ८ ॥ असावादित्यो न व्यरोचत तस्मै देवाः प्रायश्चित्तिमैच्छ
न्तस्मा एतꣳ सौमारौद्रं चरुं निरवपं तेनैवास्मिन्रुचमदधुर्यो ब्रह्मवर्चसकामः स्यात्तस्मा एतꣳ
सौमारौद्रं चरुं निर्वपेत्सोमं चैव रुद्रं च स्वेन भागधेयेनोपधावति तावेवास्मिन्ब्रह्मवर्चसं धत्तो

स० द्वि० २

॥२४॥

ब्रह्मवर्चस्येवभवतितिष्यापूर्णमासेनिर्वपेद्रुद्रः॥ १॥ वैतिष्यः सोमः पूर्णमासः साक्षादेवब्रह्म
वर्चसमवरुंधेपरिश्रितेयाजयतिब्रह्मवर्चसस्यपरिगृहीत्यैश्वेतायैश्वेतवत्सायैदुग्धंमथित
माज्यंभवत्याज्यंप्रोक्षणमाज्येनमार्जयंतेयावदेवब्रह्मवर्चसंतत्सर्वंकरोत्यतिब्रह्मवर्चसंक्रि
यतइत्याहुरीश्वरोदुश्चर्माभवितोरितिमानवीऋचौधाय्येकुर्याद्यद्वैकिंचमनुरवदत्तद्भेषजं॥२॥
भेषजमेवास्मैकरोतियदिबिभीयाद्दुश्चर्माभविष्यामीतिसोमापौष्णंचरुंनिर्वपेत्सौम्योवैदेव
तयापुरुषः पौष्णाः पशवः स्वयैवास्मैदेवतयापशुभिस्त्वचंकरोतिनदुश्चर्माभवतिसोमारौ
द्रंचरुंनिर्वपेत्प्रजाकामः सोमोवैरेतोधाअग्निः प्रजानांप्रजनयितासोमएवास्मैरेतोदधात्य
ग्निः प्रजांप्रजनयतिविंदते॥ ३॥ प्रजांसोमारौद्रंचरुंनिर्वपेदभिचरन्त्सौम्योवैदेवतयापु
रुषएषरुद्रोयदग्निः स्वायाएवैनंदेवतायैनिष्क्रीयरुद्रायापिदधातिताजगार्तिमार्छतिसोमा ॥११॥

रौद्रंचरुंनिर्वपेज्ज्योगामयावीसोमंवाएतस्यरसोगच्छत्यग्निंशरीरंयस्यज्योगामयति
सोमादेवास्यरसंनिष्क्रीणात्यग्नेःशरीरमुतयदि॥ ८॥ इतासुर्भवतिजीवत्येवसोमारुद्र
योर्वाएतंग्रसितंहोतानिष्खिदतिसईश्वरआर्तिमार्तोरनड्वान्होत्रादेयोवह्निर्वाअनड्वा
न्वह्निर्होतावह्निनैववह्निमात्मानंस्पृणोतिसोमारौद्रंचरुंनिर्वपेद्यःकामयेतस्वेस्माआ
यतनेभ्रातृव्यंजनयेयमितिवेदिंपरिगृह्यार्धमुद्धन्यादर्धंनार्धंबर्हिषस्तृणीयादर्धंनार्ध
मिध्मस्याभ्यादध्यादर्धंनस्वएवास्माआयतनेभ्रातृव्यंजनयति॥ ९॥ रुद्रोभेषजंविंद
ग्रा॰ २ तेयदिस्तृणीयादर्धंहादर्धंच॥ १०॥ ऐंद्रमेकादशकपालंनिर्वपेन्मारुतंसप्तकपालंग्रामे
कामइंद्रंचैवमरुतश्चस्वेनभागधेयेनोपधावतितएवास्मैसजातान्प्रयच्छंतिग्राम्येवभव
त्याहवनीयऐंद्रमधिश्रयतिगार्हपत्येमारुतंपापवस्यसस्यविधृत्यैसप्तकपालोमारुतो

सं०द्वि०२

।२५।।

भवतिसप्तगणावैमरुतोगणशएवास्मैसजातानवरुंधेनूच्यमानआसादयतिविशमे
व।।१।।अस्माअनुवर्त्मानंकरोत्येतामेवनिर्वपेद्यःकामयेतक्षत्रायचविशेचसमदंदध्या
मित्यैंद्रस्यावद्यन्ब्रूयादिंद्रायानुब्रूहीत्याश्राव्यब्रूयान्मरुतोयजेतिमारुतस्यावद्यन्ब्रूया
न्मरुद्भ्योनुब्रूहीत्याश्राव्यब्रूयादिंद्रंयजेतिस्वएवैभ्योभागधेयेसमदंदधातिवितृंहाणा
स्तिष्ठंत्येतामेव।।२।।निर्वपेद्यःकामयेतकल्पेरन्नितियथादेवतमवदाययथादेवतंयजेद्भा व
गधेयेनैवैनान्यथायथंकल्पयतिकल्पंतएवैंद्रमेकादशकपालंनिर्वपेद्वैश्वदेवंद्वादशक
पालंग्रामकामइंद्रंचैवविश्वांश्चदेवान्त्स्वेनभागधेयेनोपधावतितएवास्मैसजातान्प्रय
च्छंतिग्राम्येवभवत्यैंद्रस्यावदायवैश्वदेवस्यावद्येदथैंद्रस्य।।३।।उपरिष्टादिंद्रियेणैवास्मा
उभयतःसजातान्परिगृह्णात्युपाधाय्यपूर्वयंवासोदक्षिणासजातानामुपहित्यैपृश्निये ।।१२।।

दुग्धे पृश्नियै गवं चरुं निर्वपेन्मरुद्भ्यो ग्रामकामः पृश्नियै वै पयसो मरुतो जाताः पृश्नियै प्रियं
गावो मारुताः खलु वै देवतया सजाता मरुत एव स्वेन भागधेयेनोप धावति त एवास्मै सजा
तान्प्र यच्छंति ग्राम्येव भवति प्रियवती याज्यानुवाक्ये ॥ ६ ॥ भवतः प्रियमेवैनं समाना
नां करोति द्विपदा पुरोनुवाक्या भवति द्विपद एवाव रुंधे चतुष्पदा याज्या चतुष्पद एव पशून
व रुंधे देवासुराः संयत्ता आसन्ते देवा मिथो विप्रिया आसन्ते १ न्यो न्यस्मै ज्यैष्ठ्यायातिष्ठ
मानाश्चतुर्धा व्यक्रामन्नग्निर्वसुभिः सोमो रुद्रैरिंद्रो मरुद्भिर्वरुण आदित्यैः स इंद्रः प्रजा
पतिमुपाधावत्तं ॥ ७ ॥ एतया संज्ञान्यायाजयदग्नये वसुमते पुरोडाशमष्टाकपालं निरवप जय
त्सोमाय रुद्रवते चरुमिंद्राय मरुत्वते पुरोडाशमेकादशकपालं वरुणायादित्यवते चरुं त
तो वा इंद्रं देवा ज्यैष्ठ्यायाभि समजानत यः समानैर्मिथो विप्रियः स्यात्तमेतया संज्ञान्या या

जयेदग्नये वस्कमते पुरोडाशमष्टाकपालं निर्वपेत्सोमाय रुद्रवते चरुमिंद्राय मरुत्वते पुरोडा
शमेकादशकपालं वरुणायादित्यवते चरुमिंद्रमेवैनं भूतं ज्यैष्ठ्याय समाना अभिसंजानते
भवति वसिष्ठः समानानां ॥ ९ ॥ विशमेवतिष्ठत्यैतामेवायैंद्रस्य याज्यानुवाक्ये नं वरुणा युक्त
द्राच ॥ ११ ॥ हिरण्यगर्भ आपो ह यत्प्रजापते ॥ स वेद पुत्रः पितरं स मातरं स सूनुर्भुव
स भुवत्पुनर्मघः ॥ स द्यामौर्णोदंतरिक्षं स स्वः स विश्वा भुवो अभवत्स आभवत् ॥ उदु त्यं
चित्रं ॥ स प्रत्नवन्नवीयसाग्ने द्युम्नेन संयता ॥ बृहत्ततंथ भानुना ॥ नि काव्या वेधसः शश्व
तस्कर्हस्ते दधानः ॥ १ ॥ नर्या पुरूणि ॥ अग्निर्भुवद्रयिपती रयीणां सत्रा चक्राणो अमृ
तानि विश्वा ॥ हिरण्यपाणिमूतये सवितारमुपह्वये ॥ स चेत्ता देवता पदं ॥ वाममद्य सवित
र्वाममु श्वो दिवेदिवे वाममस्मभ्यं सावीः ॥ वामस्य हि क्षयस्य देव भूरेरया धिया वामभाज ॥२२॥

स्याम॥ बळित्था पर्वतानां खिद्रं बिभर्षि पृथिवि॥ प्रया भूमिं प्रवत्वति मह्ना जिनोषि॥ २॥ म
हिनि॥ स्तोमासस्त्वा विचारिणि प्रति ष्टोभंत्यक्तुभिः॥ प्र या वाजं न हेषंतं पेरुमस्यस्यर्जुनि॥
ऋदूदरेण सख्या सचेय यो मा न रिष्येद्धर्यश्व पीतः॥ अयं यः सोमो न्यधाय्यस्मे तस्मा इंद्रं
प्रतिरमेम्यच्छ॥ आपांतमन्युस्तृपलप्रभर्मा धुनिः शिमीवाञ्छरुमाँ ऋजीषी॥ सोमो वि
श्वान्यतसा वनानि नार्वागिंद्रं प्रतिमानानि देभुः॥ प्र॥ २॥ स्वानः सोमकृत सुश्विकेते॥ ं
यब्रह्मसज्जमदग्निरर्चन्॥ वृषायुंतासि शवसस्तुरस्यांतर्यच्छ गृणते धर्त्रं दृंह॥ सबाधस्ते म
स्त दं च शुष्मयं च ब्रह्म नरो ब्रह्मकृतः सपर्यन्॥ अर्को वा यत्तुरते सोमचक्षास्तत्रेदिंद्रो दधते पृत्स
तुर्यां॥ वषट् ते विष्णवास आ कृणोमि तन्मे जुषस्व शिपिविष्ट हव्यं॥ वर्धंतु त्वा सुष्टुतयो गिरो
मे यूयं पात स्वस्तिभिः सदा नः॥ प्र तत्ते अद्य शिपिविष्ट नामार्यः शंसामि वयुनानि विद्वान्॥

॥२७॥ तं त्वा गृणामि तवसमतव्यान्क्षयंतमस्य रजसः पराके । किमित्ते विष्णो परिचक्ष्यं भू
त्प्र यद्ववक्षे शिपिविष्टो अस्मि ॥ मा वर्पो अस्मदप गूह एतद्यदन्यरूपः समिथे बभूथ । ५ ॥
दा नो अग्ने [illegible]नो दाद्दाशुषे रयिं वीरवंतं परीणसं ॥ शिशीहि नः सूनुमतः । दा नो अग्ने
बृहतो दाः सहस्रिणो दुरो न वाजं श्रुत्या अपा वृधि । प्राची द्यावापृथिवी ब्रह्मणा कृधि
स्वर्ण शुक्रमुषसो विदिद्युतः । अग्निर्दाद्द्रविणं वीरपेशा अग्निरृषिं यः सहस्रा सनोति ॥
अग्निर्दिवि हव्यमाततानाग्नेर्धामानि विभृता पुरुत्रा । मा ॥ ५२ ॥ नो मर्धीरा तू भर ।
तं न पूर्तं तनूरेपाः शुचि हिरण्ययं ॥ तत्ते रुक्मो न रोचत स्वधावः ॥ उभे सुश्चंद्र सर्पिषो दर्वी
श्रीणीष आसनि । उतो न उत्पुपूर्या उक्थेषु शवसस्पत इषं स्तोतृभ्य आ भर । वायो शत
तं हरीणां युवस्व पोष्याणां ॥ उत वा ते सहस्रिणो रथ आ यातु पाजसा । प्रयाभिः ॥ ७ ॥ ॥१४॥

यासिदाश्वाः समछानियुङ्क्ष्वीयविष्वयेदुरोणे॥ निनोरयिंः सुभोजसंयुवेहनिवीरव
द्गव्यमश्वियंचराधः॥ रेवतीर्नः सधमादइंद्रेसंतुतुविवाजाः॥ क्षुमंतोयाभिर्मदेम॥ रे
वाः इंद्रेवतस्तोतास्यात्वावतोमघोनः॥ प्रेदुहरिवः श्रुतस्य॥ ३८ ८ ॥ इथ्यानोजिनो
षिदेभुः प्रहव्यंबभूथमायाभिश्चत्वारिंशच्च॥ १२ ॥ प्रजापतिस्ताः सृष्टाअग्नये
पथिकृतेग्नयेकामाययाग्नयेन्नवतेवैश्वानरमादित्यंचरुमैंद्रंचरुमिंद्रायान्नवतेव
व आग्नावैष्णवमसौमौ सौमारौद्रमैंद्रमेकादशाकपालः हिरण्यगर्भोद्वादश॥ १२ ॥ प्र
जापतिरग्नयेकामाययाभिसंभवतोयोविद्विषाणयोरिध्मेसन्नेत्वेदाग्नावैष्णवमुप
रिष्टाद्यासिंदाश्वाः समेकसप्ततिः॥ ॥ ७१॥ हरिः ॥ ओंम्॥ ॥ श्रीकृष्णार्पणमस्तु॥ ६॥
इतिश्रीसंहितायांद्वितीयाष्टकेद्वितीयप्रश्नः॥ ७॥ न्यूनातिरिक्तं संपूर्णमस्तु॥ ६॥

२८

२

२८

श्रीगजाननप्रसन्न॥ हरिः ओम्॥ आदित्येभ्योभुवद्वद्भ्यश्चरुंनिर्वपेद्भूतिकामआदि
त्यावाएतंभूत्यैप्रतिनुदंतेयोलंभूत्यैसन्भूतिंनप्राप्नोत्यादित्यानेवभुवद्वतःस्वेनभा
गधेयेनोपधावतितएवैनंभूतिंगमयंतिभवत्येवादित्येभ्योधारयद्वद्भ्यश्चरुंनिर्वपे
दपरुद्धोवापरुध्यमानोवादित्यावाअपरोद्धारआदित्याअवगमयितारआदित्या
नेवधारयद्वतः॥ १ ॥ स्वेनभागधेयेनोपधावतितएवैनंविशिदाध्रत्यनपरुध्योभ
वत्यदितेनुमन्यस्वेत्यपरुध्यमानोस्यपदमाददीतेयंवाअदितिरियमेवास्मैराज्य
मनुमन्यतेसत्याशीरित्याहसत्यामेवाशिषंकुरुतइहमनइत्याहप्रजाएवास्मैसम
नसःकरोत्युपप्रेतमरुतः॥ २ ॥ सुदानवएनाविश्पतिनाभ्यमुंराजानमित्याहमा
रुतीवैविड्ज्येष्ठोविश्पतिर्विशैवैनंराष्ट्रेणसमर्धयतियःपरस्ताद्ग्राम्यवादीस्यात्त

सं० द्वि० २

॥२१॥

स्यगृहाद्व्रीहीनाहरेच्छुक्लांश्चकृष्णांश्चविचिनुयाद्येशुक्लाःस्युस्तमादित्यंचरुंनिर्वपेदादि
त्यावैदेवतयाविड्विशमेवावगच्छति ॥ ३ ॥ अवगतोस्यविडनवगतः राष्ट्रमित्याहुर्येकृष्णाःस्यु
स्तंवारुणंचरुंनिर्वपेद्वारुणंवैराष्ट्रमुभेएवविशंचराष्ट्रंचावगच्छतियदिनावगच्छेदिममहमा
दित्येभ्योभागंनिर्वपाम्यामुष्मादमुष्यैविशोवगंतोरितिनिर्वपेदादित्याएवैनंभागधेयमुपप्र
तोविशमव ॥ ४ ॥ गमयंतियदिनावगच्छेदाश्वत्थान्मयूखान्सप्तमध्यमेषायामुपहन्यादि
दमहमादित्यान्बध्नाम्यामुष्मादमुष्यैविशोवगंतोरित्यादित्याएवैनंबद्धवीराविशमवगम
यंतियदिनावगच्छेदेतमेवादित्यंचरुंनिर्वपेदिध्मेपिमयूखान्संनह्येदनपरुध्यमेवावग
च्छत्याश्वत्थाभवंतिमरुतांवाएतदोजोयदश्वत्थओजसैवविशमवगच्छतिसप्तभवंतिसप्त
गणावैमरुतोगणशएवविशमवगच्छति ॥ ५ ॥ धारयद्वतोमरुतोगच्छन्तिविशमेवेतदष्टा ॥३॥

स्त्वाच॥ १॥ देवा वै मृत्योर्बिभ्यतस्ते प्रजापतिमुपाधावन्तेभ्य एतां प्राजापत्याꣳ शतकृष्ण
लां निरवपत्तयैवैष्वमृतमदधाद्यो मृत्योर्बिभीयात्तस्मा एतां प्राजापत्याꣳ शतकृष्णलां नि
र्वपेत्प्रजापतिमेव स्वेन भागधेयेनोपधावति स एवास्मिन्नायुर्दधाति सर्वमायुरेति शतकृष्ण
ला भवति शतायुः पुरुषः शतेन्द्रिय आयुष्येवेन्द्रिये॥ १॥ प्रतितिष्ठति घृते भवत्यायुर्वै घृतम
मृतꣳ हिरण्यमायुश्चैवास्मा अमृतं च समीची दधाति चत्वारि चत्वारि कृष्णलान्यव द्यति च
तुरवत्तस्याप्त्या एकधा ब्रह्मण उप हरत्येकधैव यजमान आयुर्दधात्यसावादित्यो न व्यरोच
त तस्मै देवाः प्रायश्चित्तिमैच्छन्तस्मा एतꣳ सौर्यं चरुं निरवपन्तेनैवास्मिन्॥ २॥ रुचमदधुर्यो
ब्रह्मवर्चसकामः स्यात्तस्मा एतꣳ सौर्यं चरुं निर्वपेदमुमेवादित्यꣳ स्वेन भागधेयेनोपधाँति व
स एवास्मिन्ब्रह्मवर्चसं दधाति ब्रह्मवर्चस्येव भवत्युभयतो रुक्मौ भवत उभयत एवास्मिन्रु

चेंद्रधाति प्रयाजेप्रयाजे कृष्णलंजुहोति दिग्भ्यएवास्मै ब्रह्मवर्चसमवरुंधआग्नेयमष्टाकपा
लंनिर्वपेत्सावित्रंद्वादशकपालंभूम्यै ॥ ३ ॥ चरुंयः कामयेतहिरण्यंविंदेयहिरण्यंमोपन
मेदितियदाग्नेयोभवत्याग्नेयंवैहिरण्यंयस्यैवहिरण्यंतेनैवैनद्विंदतेसावित्रोभवतिसवि
तृप्रसूतएवैनद्विंदतेभूम्यैचरुर्भवत्यस्यामेवैनद्विंदतउपैनंहिरण्यंनमतिविवाएषइंद्रि
येणवीर्येणर्ध्यतेयोहिरण्यंविंदतएतां ॥ ४ ॥ एवनिर्वपेद्धिरण्यंवित्वानेंद्रियेणवीर्येणव्यृ
ध्यतएतामेवनिर्वपेद्यस्यहिरण्यंनश्येद्यदाग्नेयोभवत्याग्नेयंवैहिरण्यंतेनैवैनद्विंदतिसा
वित्रोभवतिसवितृप्रसूतएवैनद्विंदतिभूम्यैचरुर्भवत्यस्यांवाएतन्नश्यतियन्नश्यत्यस्या
मेवैनद्विंदतींद्रः ॥ ५ ॥ त्वष्टुः सोममभीषहापिबत्सविष्वङ्व्यार्छत्सइंद्रियेणसोमपीथेन
व्यार्ध्यतसयदूर्ध्वमुदवमीत्तेश्यामाकाअभवन्सप्रजापतिमुपाधावत्तस्माएतं सोमेंद्रं ॥ २ ॥

यस्यैव हिरण्यं ४

श्यामाकं चरुं निर्वपेत्तेनैवास्मिन्निंद्रियं सोमपीथं दधाति वि वा एष इंद्रियेण सोमपीथेनर्ध्यं
ते यः सोमं वमिति यः सोमवामी स्यात्तस्मै ॥ ६ ॥ एतं सोमेंद्रं श्यामाकं चरुं निर्वपेत्सोमं चै
वेंद्रं च स्वेन भागधेयेनोप धावति तावेवास्मिन्निंद्रियं सोमपीथं धत्तो नेंद्रियेण सोमपीथेन
व्यृध्यते यत्सौम्यो भवति सोमपीथमेवावरुंधे यदैंद्रो भवतींद्रियं वै सोमपीथ इंद्रियमेव सोम
पीथमवरुंधे श्यामाको भवत्येष वाव स सोमः ॥ ७ ॥ साक्षादेव सोमपीथमवरुंधे अग्नये दात्रे पु
रोडाशमष्टाकपालं निर्वपेदिंद्राय प्रदात्रे पुरोडाशमेकादशकपालं पशुकामोऽग्निरेवास्मै पशू
न्प्रजनयति वृद्धानिंद्रः प्रयच्छति दधि मधु घृतमापो धाना भवंत्येतद्वै पशूनां रूपं रूपेणै
व पशूनवरुंधे पंचगृहीतं भवति पांक्ता हि पशवो बहुरूपं भवति बहुरूपा हि पशवः ॥ ८ ॥ समृ
ध्यै प्राजापत्यं भवति प्राजापत्या वै पशवः प्रजापतिरेवास्मै पशून्प्रजनयत्यात्मा वै पुरुषस्य

सं॰ द्वि॰ ३

२१॥

मधुष्यन्मधुष्ट्वो जुहोत्यात्मानमेव तद्यजमानोऽग्नौ प्र दधाति पंक्त्यौ याज्यानुवाक्ये भवतः पाँ
क्तः पुरुषः पांक्ताः पशव आत्मानमेव मृत्योर्निष्क्रीय पशूनव रुंधे ॥ ९ ॥ इन्द्रियेऽस्मि भेऽम्याए 3
तामिंद्रस्यानस्मै सोमो वङ्कुरूपाहि पशावुपरुक्ते चलातिं त्राम्वा ॥ २ ॥ देवा वै सुत्रर्मोसुलंडुपार
मितं यन्नास्कामास्तेषां सोमः राजानं यश आच्छंत्स गिरिमुदेत्तमग्निरनूदेत्तावग्नीषोमौ स
मभवन्तांताविंद्रो यज्ञविभ्रष्टोऽनुपरैत्तावब्रवीद्याजयतं मेति तस्मा एतामिष्टिं निरवपतामा
ग्नेयमष्टाकपालमैंद्रमेकादशकपालं सौम्यं चरुं तयैवास्मिन्तेजः ॥ १ ॥ इंद्रियं ब्रह्मव
र्चसमेधत्तां यो यज्ञविभ्रष्टः स्यात्तस्मा एतामिष्टिं निर्वपेदाग्नेयमष्टाकपालमैंद्रमेकादशक
पालं सौम्यं चरुं यदाग्नेयो भवति तेज एवास्मिन्तेन दधाति यदैंद्रो भवतींद्रियमेवास्मिन्तेन
दधाति यत्सौम्यो ब्रह्मवर्चसं तेनाग्नेयस्य च सौम्यस्य चैंद्रं समालम्भयेत्तेजश्चैवास्मिन्ब्रह्म ॥२॥

वर्चसंचसमीची ॥ २ ॥ दधात्यग्नीषोमीयमेकादशकपालंनिर्वपेद्यंकामोनोपनमेदाग्ने
योवैब्राह्मणःससोमंपिबतिस्वामेवदेवतांस्वेनभागधेयेनोपधावतिसैवैनंकामेनसम ये
र्धयत्युपैनंकामोनमत्यग्नीषोमीयमष्टाकपालंनिर्वपेद्ब्रह्मवर्चसकामोग्नीषोमावेवस्वे
नभागधेयेनोपधावतितावेवास्मिन्ब्रह्मवर्चसंधत्तोब्रह्मवर्चस्येव ॥ ३ ॥ भवतियदष्टा
कपालस्तेनाग्नेयोयच्छ्यामाकस्तेनसौम्यःसोमायवाजिनेश्यामाकंचरुंनिर्वपेद्यःक्लैब्या समंध्ये
द्बिभीयाद्रेतोहिवाएतस्माद्वाजिनमपक्रामत्यथैषक्लैब्याद्बिभायसोममेववाजिनंस्वेन
भागधेयेनोपधावतिसएवास्मिन्रेतोवाजिनंदधातिनक्लीबोभवतिब्राह्मणस्पत्यमेका
दशकपालंनिर्वपेद्ग्रामकामः ॥ ४ ॥ ब्रह्मणस्पतिमेवस्वेनभागधेयेनोपधावतिसए
वास्मैसजातान्प्रयच्छतिग्राम्येवभवतिगणवतीयाज्यानुवाक्येभवतःसजातैरेवैनंगण

सं० द्वि० ३
॥ ३२ ॥

वेनंकरोत्येतामेवनिर्वपेद्यःकामयेतब्रह्मन्विशंविनाशयेयमितिमारुतीयाज्यानुवाक्ये
ने कुर्याद्ब्रह्मन्नेवविशंविनाशयति ॥ ८ ॥ तेजःसमीचींब्रह्मवर्चसस्यैवयामेकामुक्तिंचत्वारिं 3
शच्च ॥ २ ॥ अर्यम्णेचरुंनिर्वपेत्सुवर्गकामोऽसौवाआदित्योऽर्यमार्यमणमेवस्वेनभागु
धेयेनोपधावतिसएवैनंसुवर्गंलोकंगमयत्यर्यम्णेचरुंनिर्वपेद्यःकामयेतदानकामा
मेप्रजाःस्युरित्यसौवाआदित्योऽर्यमायःखलुवैददातिसोऽर्यमार्यमणमेवस्वेनभागधेये
नोपधावतिसएवा ॥ १ ॥ अस्मैदानकामाःप्रजाःकरोतिदानकामाअस्मैप्रजाभवन्त्यर्य
म्णेचरुंनिर्वपेद्यःकामयेतस्वस्तिजनतामियामित्यसौवाआदित्योऽर्यमार्यमणमेवस्वे
नभागधेयेनोपधावतिसएवैनंतद्गमयतियत्रजिगमिषतीन्द्रोवैदेवानामानुजावरआसी
त्सप्रजापतिमुपाधावत्तस्मादेतमैन्द्रमानुषूकमेकादशकपालंनिः ॥ २ ॥ अवपत्तेनैवै ॥ ३ ॥

नमग्रंदेवतानांपर्यणयद्ब्रध्नवतीअग्रवतीयाज्यानुवाक्येअकरोद्ब्रध्नादेवैनमग्रंपर्यैण
यद्योराजन्यआनुजावरस्यात्तस्माएतमैन्द्रमानुष्टुभमेकादशकपालंनिर्वपेदिन्द्रमेवस्वेन
भागधेयेनोपधावतिसएवैनमग्रंसमानानांपरिणयतिब्रध्नवतीअग्रवतीयाज्यानुवाक्ये
भवतोब्रध्नादेवैनमग्रे॥ ३ ॥ परिणयत्यानुष्टुभोभवत्येषावैतस्यदेवतायआनुजावरःस
मृध्यैयोब्राह्मणआनुजावरस्यात्तस्माएतंबार्हस्पत्यमानुष्टुभंचरुंनिर्वपेद्बृहस्पतिमेवस्वे
नभागधेयेनोपधावतिसएवैनमग्रंसमानानांपरिणयतिब्रध्नवतीअग्रवतीयाज्यानु
वाक्येभवतोब्रध्नादेवैनमग्रंपरिणयत्यानुष्टुभोभवत्येषावैतस्यदेवतायआनुजावरःस
मृध्यै॥ ४ ॥ एवनिरवमितस्यचत्वारिंच॥ ४॥ प्रजापतेस्त्रयस्त्रिंशद्दुहितरआसन्ताः
सोमायराज्ञेददात्तासांरोहिणीमुपैत्ताईर्ष्यन्तीःपुनरगच्छन्ताअन्वैत्ताःपुनरयाचतताअ

सं॰द्वि॰२

१२३॥

स्मैनपुनरददात्तौब्रवीदृतंममीष्वयथासमावच्छउपैष्याम्यथतेपुनर्दास्यामीतिसकृत

मोमीत्ताऽअस्मैपुनरददात्तासांरोहिणीमेवोपै॥ १ ॥ तंयक्ष्मआर्छद्राजानंयक्ष्मआ

रदितितद्राजयक्ष्मस्यजन्मयत्पापीयानभवत्तत्पापयक्ष्मस्ययज्जायाभ्योविंदत्तज्जाये

न्यस्ययएवमेतेषांयक्ष्माणांजन्मवेदनैनंतेयक्ष्माविंदंतिसएताएवनमस्यन्नुपाधाव मे

त्ताऽअब्रुवन्वरंवृणामहैसमावच्छएवनउपायइतितस्माऽएतं॥ २ ॥ आदित्यंचरुंनिरव

ने पन्तेनैवैनंपापात्स्रामादमुञ्चन्यःपापयक्ष्मगृहीतस्यात्तस्माऽएतमादित्यंचरुंनिर्वपेदा

दित्यानेवस्वेनभागधेयेनोपधावतितएवैनंपापात्स्रामान्मुञ्चन्त्यमावास्यायांनिर्वपेदमु

मुमेवैनमाप्यायमानमन्वाप्याययतिनवोनवोभवतिजायमानइतिपुरोनुवाक्याभव

त्यायुष्टेवासिन्नत्यादधातियमादित्याअंशुमाप्याययंतीतियाज्यैवैनमेतयाप्याय ॥८॥

यतिं॥ ३॥ एवोपेत्तमस्मिन्न्ययोदनाच॥ ८॥ प्रजापतिर्देवेभ्योन्नाद्यं व्यादिशत्सो
ब्रवीद्यदिमाँल्लोकानभ्यतिरिच्यातै तन्ममासदिति तदिमाँल्लोकानभ्यत्यरिच्यत तेंद्रंरा
जानमिंद्रमधिराजमिंद्रंः स्वराजानं ततो वै स इमाँल्लोकांः स्त्रेधादुहत्तत्त्रेधानोस्त्रेधा
तुत्वं यं कामयेतान्नादस्यादिति तस्मा एतं त्रिधातुं निर्वपेदिंद्राय राज्ञे पुरोडाशं॥ १॥ एका
दशकपालमिंद्रायाधिराजायेंद्राय स्वराज्ञे यं वा इंद्रो राजाय मिंद्रोधिराजोसाविंद्रः स्वरा
डिमानेव लोकान्त्स्वेन भागधेयेनोपधावति त एवास्मा अन्नं प्रयच्छंत्यन्नाद एव भवति
यथा वत्सेन प्रत्तां गां दुह एवमेवेमाँल्लोकान्प्रत्तान्काममन्नाद्यं दुह उत्तानेषु कपालेष्वधि
श्रयत्ययातयामत्वाय त्रयः पुरोडाशा भवंति त्रय इमे लोका एषां लोकानामाप्त्या उत्तर
उत्तरो ज्यायान्भवत्येवमिव हीमे लोकाः समृध्यै सर्वेषामभिगमयन्नवद्यत्यछंबट्कारं

अथोपाणुश्थः

व्यृत्या समन्वाहार्य निर्दहाय ॥ २ ॥ पुरोडाशां त्रयः षड्विंशतिश्च ॥ ५ ॥ देवासुराः संय
त्ता आसन्ते देवानसुरा अजयन्ते देवाः पराजिग्याना असुराणां वैश्यमुपायन्तेभ्य
इन्द्रियं वीर्यमपाक्रामत्तदिन्द्रोऽचायत्तदन्वपाक्रामत्तदवरुधं नाशक्नोत्तदस्मादभ्युद्धो
चरत्स प्रजापतिमुपाधावत्तमेतया सर्वपृष्ठयायाजयत्तयैवास्मिन्निन्द्रियं वीर्यमदधा
इन्द्रुपाणुश्थः द्य इन्द्रियकामः ॥ १ ॥ वीर्यकामस्यात्तमेतया सर्वपृष्ठया याजयेदेता एव देवताः स्वेन भा ५८
गधेयेनोपधावति ता एवास्मिन्निन्द्रियं वीर्यं दधति यदिन्द्राय राथन्तराय निर्वपति यदेवा
ग्नेस्तेजस्तदेवावरुन्धे यदिन्द्राय बार्हताय यदेवेन्द्रस्य तेजस्तदेवावरुन्धे यदिन्द्राय वैरूपा
य यदेव सवितुस्तेजस्तत् ॥ २ ॥ एवावरुन्धे यदिन्द्राय वैराजाय यदेव धातुस्तेजस्तदेवा
वरुन्धे यदिन्द्राय शाक्वराय यदेव मरुतां तेजस्तदेवावरुन्धे यदिन्द्राय रैवताय यदेव बृह ॥ द्वि०

स्मनुस्तेजस्तदेवावरुंधएतावंतिर्वैतेजांःसितान्येवावरुंधउत्तानेषुकपालेष्वधिश्रयत्य
यातयामत्वायद्वादशकपालः पुरोडाशः ॥ २ ॥ भवतिवैश्वदेवत्वायसमंतंपर्यवद्यतिस
वीर्यं मंतमेवेंद्रियँयजमानेदधातिव्युत्सासमन्वाहार्यनिर्हाहोयाभ्वर्कऋषभोवृक्षिर्वैस्तःसादक्षिणा
वृषत्वायैतयैवयजेताभिचर्यमाणएताश्वैहाअस्यदेवताअन्नमदंत्यदत्कैवास्यमनु
ष्याः ॥ ६ ॥ इंद्रियकामःसवितुस्तेजस्वपुरोडाशोष्टाविंःशाच्च ॥ ७ ॥ रजेनोवैकोणि
यःकश्चित्तंजानन्किंचक्षुर्वन्यमयात्तस्माएतामिष्टिंनिर्वपदग्नयेभ्राजस्वतेपुरोडा
शमष्टाकपालंःसौर्यंचरुमग्नयेभ्राजस्वतेपुरोडाशमष्टाकपालंतयैवास्मिन्चक्षुरद
श्च धायश्चक्षुष्कामस्यात्तस्माएतामिष्टिंनिर्वपेदग्नयेभ्राजस्वतेपुरोडाशमष्टाकपालंःसौर्यं
चरुमग्नयेभ्राजस्वतेपुरोडाशमष्टाकपालमग्नेर्वैचक्षुषामनुष्यावि ॥ ३ ॥ पश्यंतिसूर्य

स्यदेवा अग्निं चैव सूर्यं च स्वेन भागधेयेनोपधावन्तिनावेवास्मिन्चक्षुर्धत्तश्चक्षुष्मानेव
भवति यदग्नये भवति चक्षुषी एवास्मिन्तत्प्रतिदधाति यत्सौर्यो नासिकां तेनाभितः सौ
र्यमाग्नेयौ भवतस्तस्मादभितो नासिकां चक्षुषी तस्मान्नासिकया चक्षुषी विधृते समा
नी याज्यानुवाक्ये भवतः समानं हि चक्षुः समृध्या उदुत्यं जातवेदसं सप्त त्वा हरितो र
थे चित्रं देवानामुदगादनीकमिति पिण्डान्प्रयच्छति चक्षुरेवास्मै प्रयच्छति यदेव तस्य
तत् ॥ २ ॥ विस्वशार्ङ्गः नालिम्ब ॥ ८ ॥ ध्रुवोसि ध्रुवोहं सजातेषु भूयासं धीरश्चेत्ता वसु
विद्ध्रुवोसि ध्रुवोहं सजातेषु भूयासमुग्रश्चेत्ता वसुविद्ध्रुवोसि ध्रुवो हं सजातेषु भूया
समभिभूश्चेत्ता वसुविदामनमस्यामनस्य देवा ये सजाताः कुमाराः समनसस्तानहं का
मये हृदा ते मां कामयन्तां हृदा तान्म आमनसः कृधि स्वाहामनमसि ॥ १ ॥ आमनस्य दे ॥७॥

वायाश्च्रियःसमनसस्कृताअहंकामयेत्रुद्राणांमांकामयंतांरुद्राणामुआमनसःरुधिस्त्वा
होवैभ्यदेवीःसांग्रहणीनिर्वपेद्ग्रामकामोवैश्वदेवावैसंज्ञानाविश्वानेवदेवान्त्स्वेनभागधे
येनोपधावतितएवास्मैसंज्ञानान्नयच्छंतिग्राम्येवभवतिसांग्रहणीभवतिमनोग्रहणंवै
संग्रहणंमनएवसंज्ञानानां॥ २॥ गृह्णातिध्रुवोसिध्रुवोहंसंज्ञातेषुभूयासमितिपरि
धीन्परिदध्यात्याशिषमेवैतामाशास्तेथोएतदेवसर्वंसंज्ञानेष्वधिभवतियस्यैवंविदुषए
तेपरिधयःपरिधीयंतआमनमस्यामनस्यदेवाइतितिस्रआहुतीर्जुहोत्येतावंतोवैसंज्ञा
नायेमहांतोयेक्षुल्लकायायाश्च्रियस्तानेवावरुंधेतएनमवरुद्धाउपतिष्ठंते॥ ३॥ स्वाहा
मनमसिसंज्ञानानांरुंधेपंचच॥ १॥ यन्नवमैत्तंनवनीतमभवद्यदसर्पत्तत्सर्पिरभवद्
यदध्रियततद्घृतमभवदश्विनोःप्राणोसितस्यतेदत्तांययोःप्राणोसिस्वाहेंद्रस्यप्राणो

सं० द्वि० ३

॥ १४५ ॥

सि तस्यै ते ददातु यस्य प्राणोसि स्वाहा मित्रावरुणयोः प्राणोसि तस्यै ते दत्तां ययोः प्राणोसि
स्वाहा विश्वेषां देवानां प्राणोसि ॥ १ ॥ तस्यै ते ददतु येषां प्राणोसि स्वाहा घृतस्य धारामसृत 3
स्य पंथामिंद्रेण दत्तां प्रयतां मरुद्भिः ॥ तत्त्वा विष्णुः पर्यपश्यत्तत्त्वेडा गव्यैरयत् ॥ पावमानेन त्वा
स्तोमेन गायत्रस्य वर्तन्योपांशोर्वीर्येण देव त्वा सवितोत्सृजतु जीवातवे जीवनस्यायै बृह
द्रथंतरयोस्त्वा स्तोमेन त्रिष्टुभो वर्तन्या शुक्रस्य वीर्येण देव त्वा सवितोत्सृजतु ॥ २ ॥ सृजतु जी
वातवे जीवनस्याया अग्नेस्त्वा मात्रया जगत्यै वर्तन्याग्रयणवीर्येण देव त्वा सवितोत्सृजतु स्य
जीवातवे जीवनस्याया इमम्मग्न आयुषे वर्चसे कृधि प्रियं रेतो वरुण सोम राजन् ॥ माते
वास्मा अदिते शर्म यच्छ विश्वे देवा जरदष्टिर्यथा सत् ॥ अग्निरायुष्मान्त्स वनस्पतिभिरायु
ष्मान्तेन त्वायुषायुष्मन्तं करोमि सोम आयुष्मान्त्स ओषधीभिर्यज्ञ आयुष्मान्त्स दक्षिणाभिर्ब्र ॥ ३ ॥

त्वामायुष्मन्तद्ब्राह्मणैरायुष्मद्देवाआयुष्मंतन्त्वेमरुतेनपितरआयुष्मंतन्त्वेस्वधयायुष्मंतन्त्वेन
त्वायुषायुष्मंतंकरोमि ॥ ९ ॥ विश्वेषांदेवानांप्राणोसित्रिष्टुभोवर्तन्याशुक्रस्यवीर्येणदेव
स्त्वासवितोत्सोम आयुष्मान्पंचविंशतिश्च ॥ १० ॥ अग्निर्वाएतस्यशरीरंगच्छतिसोमः
रसोवरुणएनंवरुणपाशेनगृह्णातिसरस्वतीवागग्नाविष्णू आत्मायस्यज्योगामयतियो
ज्योगामयावीस्याद्योवाकामयेतसर्वमायुरियामितितस्माएतामिष्टिंनिर्वपेदाग्नेयमष्टा
कपालंसौम्यंचरुंवारुणंदशकपालंसारस्वतंचरुमाग्नावैष्णवमेकादशकपालमग्नेरे
वास्यशरीरंनिष्क्रीणातिसोमाद्रसं ॥ १ ॥ वारुणेनैवैनंवरुणपाशान्मुंचतिसारस्वतेनवा
चंदधात्यग्निःसर्वादेवताविष्णुर्यज्ञोदेवताभिश्चैवैनंयज्ञेनचभिषज्यत्युतयदीतासुर्भव
तिजीवत्येवयन्नवमैत्तन्नवनीतमभवद्यदित्याज्यमवैतस्ततेरूपमेवास्यैतन्महिमानंव्याचष्टे

सं०द्वि०३

॥३८॥

श्विनौःप्राणोसीत्याहाश्विनौवैदेवानां॥ २ ॥भिषजौताभ्यामेवास्मैभेषजंकरोतीन्द्रस्यप्रा
णोसीत्याहेन्द्रियमेवास्मिन्तेनदधातिमित्रावरुणयोःप्राणोसीत्याहप्राणापानावेवास्मि
न्तेनदधातिविश्वेषांदेवानांप्राणोसीत्याहवीर्यमेवास्मिन्तेनदधातिघृतस्यधाराममृ
तस्यपन्थामित्याहयथायजुरेवैतत्पावमानेनत्वास्तोमेनेति॥ ३ ॥आहप्राणमेवास्मिन्
तेनदधातिबृहद्रथन्तरयोस्त्वास्तोमेनेत्याहौजएवास्मिन्तेनदधात्यग्नेस्त्वामात्रयेत्याहा
त्मानमेवास्मिन्तेनदधात्यृत्विजःपर्याहुर्यावन्तएवर्त्विजस्तएनंभिषज्यन्तिब्रह्मणोहस्त
मन्वारभ्यपर्याहुरेकधैवयजमानआयुर्दधातियदेवतस्यतद्धिरण्यान्॥ ४ ॥घृतंनिष्पि
बत्यायुर्वैघृतममृतंहिरण्यममृतादेवायुर्निष्पिबतिशतमानंभवतिशतायुःपुरुषःश
तेन्द्रियआयुष्येवेन्द्रियेप्रतितिष्ठत्यथोखलुयावतीःसमाएष्यन्मन्येततावन्मानंस्यात्स ॥१०॥

मंध्या इ मममग्न आयुषे वर्चसे कृधीत्याहायुरेवास्मिन्वर्चो दधाति विश्वे देवा जरदष्टिर्यथा
सदित्याह जरदष्टिमेवैनं करोत्यग्निरायुष्मानिति हस्तं गृह्णात्येते वै देवा आयुष्मन्तस्त एवा
स्मिन्नायुर्दधति सर्वमायुरेति ॥ ८ ॥ रस्यदेवानां स्तोमेनेति हिरण्याद्दसादिति ह्वाविं स्व
तिश्च ॥ ११ ॥ प्रजापतिर्वरुणायाश्वमनयत्स स्वां देवतामार्छत्स पर्यदीर्यत स एतं वारु
णं चतुष्कपालमपश्यत्तं निरवपत्ततो वै स वरुणपाशादमुच्यत वरुणो वा एतं गृह्णाति यो
ऽश्वं प्रतिगृह्णाति यावतोऽश्वान्प्रतिगृह्णीयात्तावतो वारुणांश्चतुष्कपालान्निर्वपेद्वरुणमेव स्वे
न भागधेयेनोपधावति स एवैनं वरुणपाशान्मुञ्चति ॥ ९ ॥ चतुष्कपाला भवन्ति चतुष्पा
द्ध्यश्वः समृद्ध्या एकमतिरिक्तं निर्वपेद्यमेव प्रतिग्राही भवति यं वा नाध्येति तस्मादेव वरु
णपाशान्मुच्यते यद्यपरं प्रतिग्राही स्यात्सौर्यमेककपालमनुनिर्वपेदमुमेवादित्यमुच्चा

सं० द्वि०७

॥३८॥

रंकुरुतेपोवभृथमवैत्युपक्क्वैवरुणः साक्षादेववरुणमवयजतेपोनप्त्रीयंचरुंपुनरेत्युनिर्व
पेदप्सुयोनिर्वाअप्वः स्वामेवैनं योनिंगमयतिसएनंशान्तउपतिष्ठते॥ २॥ मुंचतींचरुंस
मदेग्नाच॥ १२॥ यावामिंद्रावरुणायतव्यातन्स्तयेममः हंसोमुंचतंयावामिंद्रावरुणास
हस्यारक्षस्यातेजस्यातन्स्तयेममः हंसोमुंचतंयोवामिंद्रावरुणावग्नोस्त्रामुस्तंवामेतेना
वयजेयोवामिंद्रावरुणाद्विपात्सुपशुषुचतुष्पात्सुगोष्ठेगृहेष्वप्स्वोषधीषुवनस्पतिषुस्त्राम
स्तंवामेतेनावयजइंद्रोवाएतस्य॥ १॥ इंद्रियेणापक्रामतिवरुणएनंवरुणपाशेनगृह्णा
तियः पाप्मनागृहीतो [illegible] भवतियः पाप्मनागृहीतस्यात्तस्माएतामैंद्रावरुणींपयस्यांनि
र्वपेदिंद्रएवास्मिन्निंद्रियंदधातिवरुणएनंवरुणपाशान्मुंचतिपयस्याभवतिपयोहिवा
एतस्मादेतस्मादपक्रामत्यथैषपाप्मनागृहीतोयत्पयस्याभवतिपयएवास्मिन्तयोदधा ॥१०॥

3

लिपयस्यायां॥ २॥ पुरोडाशमवदधात्यात्मन्वंतमेवैनं करोत्यथो आयतनवंतमेव त्वै लु
र्ब्रूहति निर्दिष्टैव प्रतितिष्ठति पुनः समूहति दिग्भ्य एवास्मै भेषजं करोति समूह्यावेद्या निय
थाविद्धं निष्कृंतति तादृगेव तद्यो वां मित्रावरुणा वृष्णौ स्थाम स्तं वामेतेनावयज इत्याह दुरि
ष्ट्या एवैनं पाति यो वां मित्रावरुणा द्विपात्सु पशुषु स्थाम स्तं वामेतेनावयज इत्याह तावती
ध र्वा आप ओषधयो वनस्पतयः प्रजाः पशव उपजीवनीया स्ता एवास्मै वरुणपाशान्मुंच
ति॥ १८ ३॥ एतस्य पयस्यायां पाति षड्विंशतिश्च॥ १३॥ स प्रत्नवन्नि काव्येंद्रं वो विश्वत
स्परींद्रं नरः॥ त्वन्नः सोम विश्वतो रक्षा राजन्नघायतः॥ न रिष्येत्वावतः सखा॥ याते
धामानि दिवि या पृथिव्यां या पर्वतेष्वोषधीष्वप्सु॥ तेभिर्नो विश्वैः सुमना अहेडन्राजं
न्सोम प्रति हव्या गृभाय॥ अग्नीषोमा सवेदसा सहूती वनतं गिरः॥ सं देवत्रा बभूवथुः॥ यु

सं० हि० २

॥ ३१ ॥

वं ॥ १ ॥ एतानि दिवि रोचनान्यग्निश्च सोम सक्रतू अधत्तं ॥ युवं सिंधूंरभिशस्तेरव
द्याद्ग्नीषोमावमुंचतं गृभीतान् ॥ अग्नीषोमाविमं सु मे शृणुतं वृषणा हवं ॥ प्रति सूक्तानि
हर्यतं भवतं दाशुषे मयः ॥ आन्यं दिवो मातरिश्वा जभारामथ्नादन्यं परि श्येनो अद्रेः ॥ अग्नी
षोमा ब्रह्मणा वावृधानोरुं यज्ञाय चक्रथुरु लोकं ॥ अग्नीषोमा हविषः प्रस्थितस्य वीतं ॥ २ ॥
हर्यतं वृषणा जुषेथां ॥ सुशर्माणा स्ववसा हि भूतमथा धत्तं यजमानाय शंयोः ॥ आप्याय
स्व सं ते ॥ गणानां त्वा गणपतिं हवामहे कविं कवीनामुपमश्रवस्तमं ॥ ज्येष्ठराजं ब्रह्म
णां ब्रह्मणस्पत आ नः शृण्वन्नूतिभिः सीद सादनं ॥ स इज्जनेन स विशा स जन्मना स पु
त्रैर्वाजं भरते धना नृभिः ॥ देवानां यः पितरमाविवासति श्रद्धामना हविषा ब्रह्मणस्पतिं ॥ ॥ २ ॥
स सुष्टुभा स ऋक्वता गणेन वलं रुरोज फलिगं रवेण ॥ बृहस्पतिरुस्रिया हव्यसूदः ॥ ३१ ॥

कनिक्रदद्वृषभो वर्तनीरुद्राजन्नु॥ मरुतो यद्वो दिवो यावः शर्म॥ अर्यमायाति वृषभस्तुवि
ष्मान्दाता वसूनां पुरुहूतो अर्हन्॥ सहस्राक्षो गोत्रभिद्वज्रबाहुरस्मासु देवो द्रविणं दधा
तु॥ ये ते अर्यमन्बहवो देवयानाः पंथानः॥ ६ ॥ राजन्दिव आचरंति॥ तेभिर्नो देवमहिश
र्मयच्छ शन्न एधि द्विपदे शं चतुष्पदे॥ बुध्नादग्रमंगिरोभिर्गृणानो विपर्वतस्य दृंहितान्यै
रत्॥ रुजद्रोधांसि कृत्रिमाण्येषां सोमस्य ता मद इंद्रश्चकार॥ बुध्नादग्रेण विमिमाय
मानैर्वज्रेण खान्यतृणन्नदीनां॥ वृथासृजत्पथिभिर्दीर्घयाथैः सोमस्य ता मद इंद्रश्चका
र॥ ७ ॥ प्रयो जज्ञे विद्वाँ अस्य बंधुं विश्वानि देवो जनिमा विवक्ति॥ ब्रह्म ब्रह्मण उज्ज
भार मध्यान्नीचादुच्चा स्वधया अभि प्रतस्थौ॥ महान्मही अस्तभायद्विजातो द्यां सद्म पा
र्थिवं च रजः॥ स बुध्नादाष्ट जनुषाभ्यग्रं बृहस्पतिर्देवता यस्य सम्राट्॥ बुध्नाद्यो अग्रम

सं०द्वि०३

॥ ५० ॥

भ्यस्त्वोज्जेसाबृहस्पतिमाविंवासंतिदेवाः ॥ भिनद्वलंविपुरोदर्दरीतिकनिक्रदत्स्ववेरपोजि
गाया ॥ ५ ॥ सुवंवीलमाविवासंतिपंथ्यांनोदीर्घयाधेः सोमस्यनामदइंद्रस्यकारदेवानवे
च ॥ १४ ॥ आदित्येभ्योदेवावैमृत्योर्देवावैसुंतार्यमणोप्रजापतेस्त्वयंत्स्विंः त्वाप्रजापति त्वमोस
र्देवेभ्योन्नायदेवासुरास्लान्वजनोहुवोसियन्नदुमेदग्निवैप्रजापतिर्वरुणायुयावामिं
द्रावरुणासप्रत्नवच्चक्षुर्दत्ता ॥ १४ ॥ आदित्येभ्यस्त्वष्टुरस्मैदानेकामाएवावरुंधेग्निं
वैसप्रत्नवत्सदूपेत्वाज्ञान ॥ ५७ ॥ श्रीकृष्णार्पणमस्तु ॥ ॥ ५७ ॥ ॥ न्यूनातिरिक्तंः स
र्वसंपूर्णमस्तु ॥ ॥ इतिश्रीसंहितायांद्वितीयाष्टकेतृतीयप्रश्नः ॥ ५ ॥ शाके स
त्रोशे ॥ २० ॥ विभवनामसंवत्सरे ॥ ७ ॥ श्रीकृष्णावेण्यैनमोनमः ॥ ७ ॥ श्रीकाशी
विश्वेश्वरायनमः ॥ श्रीसांबसदाशिवायनमः ॥ ६ ॥ श्रीउमाकांतायनमः ॥ ओं ॥ ५ ॥ हरिः ॥ १२ ॥

3

श्रीगणेशायनमः ॥ ॐ हरिः ओं ॥ देवामनुष्याःपितरस्तेऽन्यतआसन्नसुरारक्षाꣳसिपि
शाचास्तेऽन्यतस्तेषांदेवानामुतयदल्पंलोहितमकुर्वन्तद्रक्षाꣳसिरात्रीभिरसुभ्नन्ता
न्सुब्धान्मृतानभिव्यौच्छन्तेदेवाअविदुर्योवैनोऽयंम्रियतेरक्षाꣳसिवाइमंघ्नन्तीतितेरक्षाꣳ
स्युपामन्त्रयन्ततान्यब्रुवन्वरंवृणामहैयदसुरान्जयामतन्नःसहासदिति
ततोवैदेवाअसुरानजयन्तेऽसुरान्जित्वारक्षाꣳस्यपानुदन्ततानिरक्षाꣳस्यनृतमकर्तेति
तिसमन्तंदेवान्पर्यविशन्तेदेवाअग्नावनाथन्ततेऽग्नयेप्रवतेपुरोडाशमष्टाकपालंनिरव
पन्नग्नयेविबाधवतेऽग्नयेप्रतीकवतेयदग्नयेप्रवतेनिरवपन्यान्येवपुरस्ताद्रक्षाꣳसि ॥ २ ॥
आसन्तानितेनप्राणुदन्तयदग्नयेविबाधवतेयान्येवाभितोरक्षाꣳस्यासन्तानितेनव्य
बाधन्तयदग्नयेप्रतीकवतेयान्येवपश्चाद्रक्षाꣳस्यासन्तानितेनापानुदन्ततत्तोदेवाअ

भवन्त्यसुरा यो भ्रातृव्यवान्त्स्यात्स स्पर्धमान एतयेष्ट्या यजेताग्नये प्रवते पुरोडाशम
ष्टाकपालं निर्वपेदग्नये विबाधवते ॥ ३ ॥ अग्नये प्रतीकवते यदग्नये प्रवते निर्वपति य ए
वास्माच्छ्रेयान्भ्रातृव्यस्तं तेन प्रणुदते यदग्नये विबाधवते य एवैनेन सदृङ् तं तेन विबा
धते यदग्नये प्रतीकवते य एवास्मात्पापीयान्तं तेनापनुदते प्र श्रेयांसं भ्रातृव्यं नुद
तेऽति समं क्रामति नैनं पापीयानाप्नोति य एवं विद्वानेतयेष्ट्या यजते ॥ ४ ॥ त्वपामहे
यसुरस्ताद्धस्ताः सिवपेदग्नये विबाधवत एवं चत्वारि च ॥ १ ॥ देवासुराः संयत्ता आस
न्ते देवा अब्रुवन्यो नो वीर्यावत्तमस्तमनु समारभामहा इति त इन्द्रमब्रुवन्त्वं वै नो वीर्या
वत्तमोऽसि त्वामनु समारभामहा इति सोऽब्रवीत्तिस्रो म इमास्तनुवो वीर्यावतीस्ताः प्री
णीताथासुरानभि भविष्यथेति ता वै ब्रूहीत्यब्रुवन्नियमंहोमुगियं विमृधेयमिन्द्रि

॥३॥

यावती॥ १ ॥ इत्यब्रवीत्त इंद्रायांहोमुचे पुरोडाशमेकादशकपालं निरवपन्निंद्राय वै मृधा
येंद्रायेंद्रियावते यदिंद्रायांहोमुचे निरवपन्नंहस एव तेनामुच्यंत यदिंद्राय वै मृधाय मृ
ध एव तेनापाघ्नत यदिंद्रायेंद्रियावत इंद्रियमेव तेनात्मन्नदधत त्रयस्त्रिंशत्कपालं पु
रोडाशन्निरवपन्त्रयस्त्रिंशद्धि देवतास्ता इंद्र आत्मन्ननु समारंभयत भूत्यै॥ २ ॥ तां वा
व देवा विजितिमुत्तमामसृजंत यो भ्रातृव्यवान्त्स्यात्स स्पर्ध एतयेष्ट्या यजेतेंद्राया॰ मान॰
ंहोमुचे पुरोडाशमेकादशकपालं निर्वपेदिंद्राय वै मृधायेंद्रायेंद्रियावते ंहसा वा एष गृ
हीतो यस्माच्छ्रेयान्भ्रातृव्यो यदिंद्रायांहोमुचे निर्वपत्यंहस एव तेन मुच्यते मृधा वा ए
षोऽभिषण्णो यस्मात्समानेष्वन्यः श्रेयानुत॥ ३ ॥ भ्रातृव्यो यदिंद्राय वै मृधाय मृध एव ते
नापहते यदिंद्रायेंद्रियावत इंद्रियमेव तेनात्मन्धत्ते त्रयस्त्रिंशत्कपालं पुरोडाशं निर्वप

सं० द्वि० ४
॥ ४२ ॥
य०

न्निश्चाँ स्त्रिँः ग्नौहै देवतास्ता एव यजमान आत्मन्ननुसमारंभयते भूत्यै सा वा एषा विजि
तिर्नामेष्टिर्य एवं विद्वानेतयेष्ट्या यजते तुन्नु मामेव विजितिं भ्रातृव्येण विजयते ॥ ४ ॥ इंद्रि ४
वतीभिस्त्वा उतैकान्न पंचाशच्च ॥ २ ॥ देवासुराः संयत्ता आसंस्तेषां गायत्र्योजो बलमि
न्द्रियं वीर्यं प्रजां पशून्त्संगृह्यादायापक्रम्यातिष्ठत्तेऽमन्यंत यतरान्वा इयमुपावर्त्स्यति
त इदं भविष्यंतीति तां व्यह्वयंत विश्वकर्मन्निति देवा दाभीत्यसुराः सा नान्यतरांश्च
नोपावर्तत ते देवा एतद्यजुरपश्यन्नोजोऽसि सहोऽसि बलमसि ॥ १ ॥ भ्राजोऽसि देवानां
धाम नामासि विश्वमसि विश्वायुः सर्वमसि सर्वायुरभिभूरिति वाव देवा असुराणामो
जो बलमिंद्रियं वीर्यं प्रजां पशून्वृंजत यज्ञायत्र्यपक्रम्यातिष्ठत्तस्मादेतां गायत्रीती
ष्टिमाहुः संवत्सरो वै गायत्री संवत्सरो वै तदपक्रम्यातिष्ठद्यदेतया देवा असुराणामो

॥ २ ॥

ज्ञोबलमिंद्रियंवीर्यं॥ २॥ प्रजांपशूनवृंजत तस्माद्देवाः संवर्गइतीष्टिमाहुर्योभ्रातृव्यवा
न्स्यात्सस्पर्धमानएतयेष्ट्यायजेताग्नयेसंवर्गायपुरोडाशमष्टाकपालंनिर्वपेत्॥ श्रृतमास
न्नमेतेनयजुषाभिमृशेदोजएवबलमिंद्रियंवीर्यंप्रजांपशून्भ्रातृव्यस्यवृंक्तेभवत्यात्मना
परास्यभ्रातृव्योभवति॥ ३॥ बलमस्युत्तयादेवाअसुराणामोजोबलमिंद्रियंवीर्यंपंचचत्वा
रिंशच्च॥ २॥ प्रजापतिःप्रजाअसृजततास्मात्सृष्टाःपराचीरायन्तायत्रावसन्ततो
गर्मुदुदतिष्ठत्ताबृहस्पतिश्चान्ववैत्ताः सोब्रवीद्बृहस्पतिरनयात्वाप्रतिष्ठान्यथत्वाप्रजाउ
पावर्त्स्यंतीतितंप्रातिष्ठत्ततोवैप्रजापतिंप्रजाउपावर्त्तंतयःप्रजाकामःस्यात्तस्माएतंप्राजा
पत्यंगार्मुतंचरुंनिर्वपेत्प्रजापतिं॥ १॥ एवस्वेनभागधेयेनोपधावतिसएवास्मैप्रजांप्रज
नयतिप्रजापतिःपशूनसृजततेस्मात्सृष्टाःपरांचआयन्तेयत्रावसन्ततोगर्मुदुदतिष्ठत्ता

सं०ब्रा०४

॥ ६३ ॥

मु प्राचान्वैनां सोऽब्रवीत्पूषान यो मा प्रतिष्ठायै त्वा पशव उपावर्त्स्यन्तीति मां प्रतिष्ठेति
सोमोऽब्रवीन्मम वै ॥ २ ॥ अकृष्टपच्यमित्युभौ वां प्रतिष्ठानीत्यब्रवीत्तौ प्रातिष्ठतां तौ वै प्र
जापतिं पशव उपावर्त्तन्त यः पशुकामस्यात्तस्मा एतं सौमापौष्णं गार्मुतं चरुं निर्वपेत्सो
मापूषणावेव स्वेन भागधेयेनोपधावति तावेवास्मै पशून्प्रजनयतः सोमो वै रेतोधाः पू
षा पशूनां प्रजनयिता सोम एवास्मै रेतो दधाति पूषा पशून्प्रजनयति ॥ ३ ॥ वपे प्रजापतिं
वेदधाति पूषा त्रीणि च ॥ ४ ॥ अग्ने गोभिर्न आगहीन्दो पुष्ट्या जुषस्व नः ॥ इन्द्रो धर्ता गृहेषु
नः ॥ सविता यः सहस्रियः स नो गृहेषु रारणत् ॥ आ पूषा एत्वा वसु ॥ धाता ददातु नो रयि
मीशानो जगतस्पतिः ॥ स नः पूर्णेन वावनत् ॥ त्वष्टा यो वृषभो वृषा स नो गृहेषु रारणत् ॥ स
हस्रेणायुतेन च ॥ येन देवा अमृतं ॥ १ ॥ दीर्घं श्रवो दिव्यैरयन्त ॥ रायस्पोष त्वमस्मभ्यं गवां ॥ २ ॥

कुल्मिं जीवस आयुर्वस्वा॥ अग्निर्गृहपतिः सोमो विश्ववनिः सविता सुमेधा स्वाहा॥ अग्ने
गृहपते यस्ते घृत्यो भागस्तेन सह ओज आक्रममाणाय धेहि श्रैष्ठ्यात्पथो मा योषं मूर्धा भू
यासं स्वाहा॥ २॥ अमन्तेमष्टाविंशश्च॥ ५॥ चित्रया यजेत पशुकाम इयं वै चित्रा य
द्वा अस्यां विश्वं भूतमधि प्रजायते तेनेयं चित्रा य एवं विद्वांश्चित्रया पशुकामो यजते प्र
प्रजया पशुभिर्मिथुनैर्जायते प्रैवाग्नेयेन वापयति रेतः सौम्येन दधाति रेत एव हितं त्वष्टा रू
पाणि विकरोति सारस्वतो भवत एतद्वै दैव्यं मिथुनं दैव्यमेवास्मै॥ ३॥ मिथुनं मध्यतो दधाति
पुष्ट्यै प्रजननाय सिनीवाल्यै चरुर्भवति वाग्वै सिनीवाली पुष्टिः खलु वै वाक्पुष्टिमेव वाच
मुपैत्यैन्द्र उत्तमो भवति तेनैव तन्मिथुनं सप्तैतानि हवींषि भवन्ति सप्त ग्राम्याः पशवः सप्ता
रण्याः सप्त छन्दांस्युभयस्यावरुध्या अथैता आहुतीर्जुहोत्येते वै देवाः पुष्टिपतयस्त एव

वास्मिन्पुष्टिंदधन्निपुष्यतिप्रजयापशुभिरथोयदेताआहुतीर्जुहोतिप्रतिष्ठित्यै ॥ २ ॥ अ
स्मैलएवह्रास्मैच ॥ ८ ॥ मारुतमसिमरुतामोजोपांधारांभिंधिरमयतमरुतःश्येनमा
यिनंमनोजवसंवृषणंसुवृक्तिं ॥ येनशर्द्धउग्रमवसृष्टमेतितदश्विनापरिधत्तंस्वस्ति ॥
पुरोवातोवर्षन्जिन्वरावृत्स्वाहावातावद्वर्षन्नुग्ररावृत्स्वाहास्तनयन्वर्षन्भीमरावृत्स्वा
हानशन्यवस्फूर्जन्दिद्युद्वर्षन्त्वेषरावृत्स्वाहातिरात्रंवर्षन्पूर्तिरावृत् ॥ ३ ॥ स्वाहाबहु
हायमवृषादितिश्रुतरावृत्स्वाहातपतिवर्षन्विराडावृत्स्वाहावस्फूर्जन्दिद्युद्वर्षन्भूत
रावृत्स्वाहामांदावाशाःशुंध्यूरजिराः ॥ ज्योतिष्मतीस्तमस्वरीरुंदतीःसुफेनाः ॥ मि
त्रभृतःक्षत्रभृतःसुराष्ट्राइहमावत ॥ वृष्णोअश्वस्यसंदानमसिवृष्ट्यैत्वोपनह्यामि ॥ १० ॥ २ ॥
पूर्तिरावृद्द्वेचत्वारिंशच्च ॥ ७ ॥ देवावसव्याअग्नेसोमसूर्य ॥ देवाःशर्मण्यामित्रा ॥ ४ ॥

पर्जन्य २ सूक्त २

वरुणार्यमन्॥ देवाः सपीतयोऽपां नपादाशुहेमन्॥ उद्नो दत्तोदधिं भिन्त दिवः पर्जन्यादन्तरि-
क्षात्पृथिव्यास्ततो नो वृष्ट्यावत॥ दिवा चित्तमः कृण्वन्ति पर्जन्येनोदवाहेन॥ पृथिवीं यद्व्युन्द-
न्ति॥ आ यन्नरः सुदानवो ददाशुषे दिवः कोशमचुच्यवुः॥ वि पर्जन्याः सृजन्ति रोदसी अनु
धन्वना यन्ति॥ १॥ वृष्टयः॥ उदीरयथा मरुतः समुद्रतो यूयं वृष्टिं वर्षयथा पुरीषिणः॥
न वो दस्रा उप दस्यन्ति धेनवः शुभं यातामनु रथा अवृत्सत॥ सृजा वृष्टिं दिव आद्भिः समु-
द्रं पृण॥ अब्जा असि प्रथमजा बलमसि समुद्रियम्॥ उन्नम्भय पृथिवीं भिन्धीदं दिव्यं नभः॥
उद्नो दिव्यस्य नो देहीशानो विसृजा दृतिम्॥ ये देवा दिविभागा येऽन्तरिक्षभागा ये पृथिविभागाः॥
त इमं यज्ञमवन्तु त इदं क्षेत्रमा विशन्तु त इदं क्षेत्रमनु वि विशन्तु॥ २॥ यन्ति देवा यंगानिम्ब॥ ८॥
मारुतमसि मरुतामोज इति कृष्णं वासः कृष्णतूषं परिधत्त एतद्वै वृष्ट्यै रूपं सरूप एव भू-

त्वा पर्जन्यं वर्षयति रमयत मरुतः श्येनमायिनमिति पश्चाद्वातं प्रतिमीवति पुरोवातमेव
जनयति वर्षस्यावरुध्यै वातनामानि जुहोति वायुर्वै वृष्ट्या ईशे वायुमेव स्वेन भागधेयेनोप
धावति स एवास्मै पर्जन्यं वर्षयत्यष्टौ ॥ ३ ॥ जुहोति चतस्रो वै दिशश्चतस्रोवान्तरदिशा दिग्भ्य
एव वृष्टिꣳ सं प्र च्यावयति कृष्णाजिने सं यौति हविरेवाकरन्तर्वेदि सं यौत्यवरुध्यै यतीना
मद्यमानानाꣳ शीर्षाणि परापतन्ते खर्जूरा अभवन्तेषाꣳ रस ऊर्ध्वोपतत्तानि करीराण्यभ
वन्त्सौम्यानि वै करीराणि सौम्या खलु वा आहुतिर्दिवो वृष्टिं च्यावयति यत्करीराणि भवन्ति ॥ २ ॥
सौम्ययैवाहुत्या दिवो वृष्टिमवरुन्धे मधुषा सं यौत्यपां वा एष ओषधीनाꣳ रसो यन्मध्वद्भ्य ए
वौषधीभ्यो वर्षत्यथो अद्भ्य एवौषधीभ्यो वृष्टिं नि नयति मान्दा वाशा इति सं यौति नामधेयैरे
वैना अच्छैत्यथो यथा ब्रूयादसावेहीत्येवमेवैना नामधेयैरा ॥ ३ ॥ च्यावयति वृष्णो अश्वस्य

संतानेमसि वृष्ट्यै त्वोपनह्यामीत्याह वृषा वा अश्वो वृषा पर्जन्यः कृष्ण इव खलु वै भूत्वा वर्ष
ति रूपेणैवैनं समर्धयति वर्षस्यावरुध्यै ॥ ४ ॥ अष्टौ भवन्ति नामधेयैरेकान्नत्रिंशच्च ॥ ९ ॥
देवा वसव्या देवाः शर्मण्या देवाः सपीतय इत्याबध्नाति देवताभिरेवान्वहं वृष्टिमिच्छति य
दि वर्षेत्तावत्येव होतव्यं यदि न वर्षेच्छ्वोभूते हविर्निर्वपेदहोरात्रे वै मित्रावरुणावहोरात्रा
भ्यां खलु वै पर्जन्यो वर्षति नक्तं वा हि दिवा वा वर्षति मित्रावरुणावेव स्वेन भागधेयेनोप
धावति तावेवास्मै ॥ १ ॥ अहोरात्राभ्यां पर्जन्यं वर्षयतोऽग्नये धामच्छदे पुरोडाशमष्टाक
पालं निर्वपेन्मारुतं सप्तकपालं सौर्यमेककपालमग्निर्वा इतो वृष्टिमुदीरयति मरुतः
सृष्टां नयन्ति यदा खलु वा असावादित्यो न्यङ् रश्मिभिः पर्यावर्ततेऽथ वर्षति धामच्छदि
व खलु वै भूत्वा वर्षत्येता वै देवता वृष्ट्या ईशते ता एव स्वेन भागधेयेनोपधावति ताः ॥ २ ॥ ए

वास्मै पर्जन्यं वर्षयं स्तनावर्षिष्यन्वर्षत्येवस्य जावृष्टिं दिव आद्भिः समुद्रं पृणोत्याहे माश्चे
वामृस्वाप: समर्धयत्यथो अभिरेवामृत ह्यैन्त्य स्त्रा असि प्रथमजा बलमसि समुद्रियमि
त्याह यथायजुरेवैनदुन्नेभय पृथिवीमिति वर्षाङ्कांजुहोत्येषा वा ओषधीनां वृष्टिर्वा नस्त
यैव वृष्टिमाच्यावयति ये देवा दिविभागा इति कृष्णाजिनमवधूनोती म एवास्मै लोकाः
प्रीता अभीष्टा भवन्ति॥२॥अस्मै धावतिनाना वा एते वि: शान्तिश्च॥१०॥सर्वाणि छन्दांसि
नस्या मिष्टामनूच्या नीत्याह त्रिष्टुभो वा एतद्वीर्यं यत्ककुदुष्णिहा जगत्यै यदुष्णिह
ककुभावन्वाह तेनैव सर्वाणि छन्दांसि स्यवरुन्धे गायत्री वा एषा यदुष्णिहा यानि चत्वार्यध्य
क्षराणि चतुष्पाद एव तेन पशवो यथापुरोडाशे पुरोडाशो ऽध्येवमेव तद्यदृच्यध्यक्षराणि य
ज्जगत्या॥३॥परिदध्यादन्तं यज्ञं गमयेत्त्रिष्टुभा परिदधातीन्द्रियं वै वीर्यं त्रिष्टुगिन्द्रिय एव ॥६१॥

वीर्ये यज्ञं प्रतिष्ठापयति नांतं गमयत्यस्मै त्रीन्वाजिनात्रीषुधस्थेति त्रिवत्स्यापरि दधाति
सरूपत्वाय सर्वो वा एष यज्ञो यत्त्रैधातवीयं कामायकामाय प्रयुज्यते सर्वेभ्यो हि कामेभ्यो
यज्ञः प्रयुज्यते त्रैधातवीयेन यज्ञेनाभिरंचन्सर्वो वै ॥ २ ॥ एष यज्ञो यत्त्रैधातवीयं सर्वेणै
वैनं यज्ञेनाभिचरति स्तृणुत एवैनमेतेनैव यज्ञेनाभिचर्यमाणः सर्वो वा एष यज्ञो यत्त्रैधात
वीयं सर्वेणैव यज्ञेन यजते नैनमभिचरन्स्तृणुत एतेनैव यज्ञेन सहस्रेण यक्ष्यमाणः प्र
जातमेवैनं दूरास्यन्त्येतेनैव यज्ञेन सहस्रेणेजानोऽन्तं वा एष पशूनां गच्छति ॥ ३ ॥ यः सहस्रेण य
जते प्रजापतिः खलु वै पशूनसृजत तांस्त्रैधातवीयेनैवासृजत य एवं विद्वांस्त्रैधातवी
येन पशुकामो यजते यस्माद्देवयोनेः प्रजापतिः पशूनसृजत तस्माद्देवेनान्वसृजत उपैनमु
त्तरं सहस्रं नमति देवताभ्यो वा एष आवृश्च्यते यो यक्ष्य इत्युक्त्वा न यजते त्रैधातवीयेन य

सं०द्वि०४

॥४७॥

ज्ञेनसर्वोवाएषयज्ञः॥६॥यत्त्रैधातवीयः सर्वेणैवयज्ञेनेयजतेनदेवताभ्यआरभ्यतेद्वा
दशाकपालःपुरोडाशोभवतितेत्रयश्चतुष्कपालास्त्रिःषमृद्धत्वायत्रयःपुरोडाशाभवन्ति ४
त्रयइमेलोकाएषांलोकानामाप्त्याउत्तरउत्तरोज्यायान्भवत्येवमिवहीमेलोकायवमयो
मध्यएतद्वाअन्तरिक्षस्यरूपंसमृद्ध्यैसर्वेषामभिगमयन्नवद्यत्यछम्बट्कारंहिरण्यंद
दातितेजएव॥८॥अवरुन्धेतार्प्यंददातिपशूनेवावरुन्धेधेनुंददात्याशिषएवावरुन्धेसा
म्नोवाएषवर्णोयद्धिरण्यंयजुषांतार्प्यमुक्थामदानांधेनुरेतानेवसर्वान्वर्णानवरुन्धे॥९॥
जगत्याभिचरन्त्सर्वोवैगच्छतियज्ञस्तेजएवत्रिवृद्ब्राह्म॥१०॥त्वष्टाहतपुत्रोवीन्द्रंसोममा
हरत्तस्मिन्निन्द्रउपहवमैच्छततंनोपाह्वयतपुत्रंमेवधीरितिसयज्ञवेशसंकृत्वाप्रासहा
सोममपिबत्तस्ययदत्यशिष्यततत्त्वष्टाहवनीयमुपप्रावर्तयत्स्वाहेन्द्रशत्रुर्वर्धस्वेतिस

॥७॥

यावद्दूर्ध्वः पराविध्येत्तावदेनिस्स्वयमेव व्यरमनु यद्दिवानावेत्स्यवणं॥१॥ आसीद्यद्दिवान्ता
वद्ध्युग्नेरासीत्संभेसंवन्नग्नीषोमावभिसमभवत्सइषुमात्रमिषुमात्रं विष्वङ्ङ्वर्धत स
इमान्लोकानवृणोद्यदिमान्लोकानवृणोत्तद्वृत्रस्य वृत्रत्वं तस्मादिन्द्रो बिभेदपि त्वष्टात
स्मैत्वष्टा वज्रमसिंचत्तपो वै स वज्र आसीत्तमुद्यंतुं नाशक्नोदथ वै तर्हि विष्णुः॥२॥ अन्या
देवतासीत्सोऽब्रवीद्विष्णवेहीदमाहरिष्यावो येनायमिदमिति स विष्णुस्त्रेधात्मानं वि
न्यधत्त पृथिव्यां तृतीयमन्तरिक्षे तृतीयं दिवि तृतीयमभिपर्यावर्ताद्ध्यबिभेद्यत्पृथि
द्रो ३ व्यां तृतीयमासीत्तेनेनं वज्रमुदयच्छद्विष्णवनुस्थितः सोऽब्रवीन्मा मे प्रहारस्ति वा इदं॥३॥
मयि वीर्यं तत्ते प्रदास्यामीति तदस्मै प्रायच्छत्तमस्य गृहाण दध्यामेति तद्विष्णावति प्राय
च्छत्तद्विष्णुः प्रत्यगृह्णादस्मास्विन्द्र इन्द्रियं दधात्विति यदन्तरिक्षे तृतीयमासीत्तेनेन्द्रो व

ज्रमुद्यच्छद्विष्णवनुस्थितः सोऽब्रवीन्मा मे प्रहारस्ति वा इदं ॥ ४ ॥ मयि वीर्यं तत्ते प्रदास्यामी
ति तदस्मै प्रायच्छत्तत्प्रत्यगृह्णाद्द्विर्मा धा इति तद्विष्णवेऽति प्रायच्छत्तद्विष्णुः प्रत्यगृह्णादस्मा
स्विन्द्र इन्द्रियं दधात्विति यद्द्वितीयमासीत्तेनेन्द्रो वज्रमुद्यच्छद्विष्णवनुस्थितः सोऽब्रवीन्मा
मे प्रहार्यैनाहं ॥ ५ ॥ इदमस्मिन्तत्ते प्रदास्यामीति त्रीः इत्यब्रवीत्संधां तु संदधावहै त्वामे
व प्रविशानीति यन्मां प्रविशेः किं मा भुंज्या इत्यब्रवीत्त्वामेवेन्धीय तव भोगाय त्वां प्रविशेय
मित्यब्रवीत्तं वृत्रः प्राविशदुदरं वै वृत्रः क्षुत्खलु वै मनुष्यस्य भ्रातृव्यो य ॥ ६ ॥ एवं वेद
हन्ति क्षुधं भ्रातृव्यं तदस्मै प्रायच्छत्तत्प्रत्यगृह्णात्त्रिर्मा धा इति तद्विष्णवेऽति प्रायच्छत्तद्विष्णुः
प्रत्यगृह्णादस्मास्विन्द्र इन्द्रियं दधात्विति यत्त्रिः प्रायच्छत्त्रिः प्रत्यगृह्णात्तत्त्रिधातोस्त्रिधा
तुत्वं यद्विष्णुरन्वतिष्ठत विष्णवेऽति प्रायच्छत्तस्मादैन्द्रावैष्णवं हविर्भवति यद्वा इदं किं च त

दस्मेनत्वायच्छद्दचः सामानियजूंषि सहस्रं॰ अस्मेनत्वायच्छत्तस्मात्सहस्रंदक्षिणां॥ ७॥
प्रवणंविष्णुर्वाउदमिदंमहंयोअभवल्लोककृविः इतिश्च॥ १४॥ देवावैराजन्याज्जायमानादवि
भयुस्तमंतरेवसंतंदाम्नापोंभन्तसवाएषोपोब्धोजायतेयद्राजन्योयद्वाएषोनपोब्धोजा
येतवृत्रान्घ्नः श्वरद्धंकामयेतराजन्यमनपोब्धोजायेतवृत्रान्घ्नः श्वरद्दितितस्माएत
मैंद्राबार्हस्पत्यंचरुंनिर्वपेदैंद्रोवैराजन्योब्रह्मबृहस्पतिर्ब्रह्मणैवैनंदाम्नोपोंभनान्मु
३०
चतिहिरण्मयंदामदक्षिणासाक्षादेवैनंदाम्नोपोंभनान्मुंचति॥ ३॥ एतंद्वादशोच॥ १२॥
नवोनवोभवतिजायमानोन्हांकेतुरुषसामेत्यग्रे॥ भागंदेवेभ्योविदधात्यायन्प्रचंद्रमा
स्तिरतिदीर्घमायुः॥ यमादित्याअंशुमाप्याययंतियमक्षितमक्षितयः पिबंति॥ तेनेनो
राजावरुणोबृहस्पतिराप्याययंतुभुवनस्यगोपाः॥ प्राच्यांदिशित्वमिंद्रासिराजोतोदी

स०द्वि०४

॥४१॥

र्य्यांवृत्रहन्नुहासि॥ यत्रयंतिस्त्रोत्यासन्त॥ १॥ जितंतेदक्षिणतोवृषभएधिहव्यः॥ इं
द्रोजयातिनपराजयाता अधिराजोराजसुराजयाति॥ विश्वाहिभूयाः पृतनाअभिष्टी
रुपसद्योनमस्योयथासत्॥ अस्येदेवप्ररिरिचेमहित्वं दिवस्पृथि [illegible] व्याः पर्यंत
रिक्षात्॥ स्वराडिंद्रोदमआविश्वगूर्त्तः स्वरिरमत्रोववक्षेरणाय॥ अभित्वाशूरनोनुमोदु
ग्धाइवधेनवः॥ ईशानं॥ २॥ अस्यजगतः स्वर्दृशमीशानमिंद्रतस्थुषः॥ त्वामिद्धिह
वामहेसातावाजस्यकारवः॥ त्वांवृत्रेष्विंद्रसत्पतिंनरस्त्वांकाष्ठास्ववंतः॥ यद्यावइंद्रतेश
तंशतंभूमीरुतस्युः॥ नत्वावज्रिन्सहस्रंसूर्याअनुनजातमष्टरोदसी॥ पिबासोम
मिंद्रमंदतुत्वायंतेसुषावहर्यश्वाद्रिः॥ सोतुर्बाहुभ्यांसुयतोनार्वा॥ रेवतीर्नः सधमाद
इंद्रेसंतुतुविवाजाः॥ क्षुमंतोयाभिर्मदेम॥ उदग्नेशुचयस्तवविज्योतिषोदुत्यंजातवे ॥९॥

दसः सप्तला हरितो रथे वहंति देव सूर्यं। शोचिष्केशं विचक्षणं॥ चित्रं देवानामुदगादनी
कं चक्षुर्मित्रस्य वरुणस्याग्नेः॥ आप्रा द्यावा पृथिवी अंतरिक्षꣳ सूर्य आत्मा जगतस्तस्थु
षः॥ ४९॥ च॥ विश्वेदेवा ऋतावृध ऋतुभिर्हवनश्रुतः॥ जुषंतां युज्यं पयः॥ विश्वेदेवाः शृ
णुतेमꣳ हवं मे ये अंतरिक्षे य उप द्यविष्ठ॥ ये अग्निजिह्वा उत वा यजत्रा आसद्यास्मि
न्बर्हिषि मादयध्वं॥ ५० ॥ नदीशानुमद्भिस्तस्थुषंस्विः शाश्वं॥ १४॥ देवा मनुष्या देवा
सुरा अब्रुवन्देवासुरास्तेषां गायत्री प्रजापतिरग्ने गोभिश्चित्रयां मारुतं देवावस
व्या अग्ने मारुतमिति देवावसव्या देवाः शर्मण्याः सर्वाणि त्वष्टा देवा वै राजन्यान्नवो
नवश्चतुर्दश ॥ १६ ॥ देवा मनुष्याः प्रजापतयो देवावसव्याः परिदध्याद्दिमस्यश्च
त्वारिꣳशात॥ ४८ ॥ हरिः ओम्॥ श्रीकृष्णार्पणमस्तु॥ न्यूनातिरिक्तं संपूर्णमस्तु॥

श्रीशिवसांबश्रीकृष्णायनमोनमः श्रीउमाकांतायनमोनमः॥श्रीरामचंद्रायनमोनमः॥
प्रजापतयेनमोनमः॥ ५ ॥श्रीः॥ ॐ॥गिरिजापतयेनमोनमः॥ ॥५॥ ॥श्री॥ ॥शिव॥

श्रीगणेशायनमः॥ हरिः ओं॥ विश्वरूपोवैत्वाष्ट्रः पुरोहितोदेवानामासीत्स्वस्रीयोऽसुरा
णांतस्यत्रीणिशीर्षाण्यासन्त्सोमपानंꣳ सुरापानमन्नादनंꣳ सप्रत्यक्षंदेवेभ्योभागम
वदत्परोक्षमसुरेभ्यः सर्वस्मैवैप्रत्यक्षंभागंवदंतियस्माएवपरोक्षंवदंतितस्यभागउदित
स्तस्मादिंद्रोबिभेदीदृङ्वैराष्ट्रंविपर्यावर्तयतीतितस्यवज्रमादायशीर्षाण्यछिनद्यत्सो
मपानं॥१॥आसीत्सकपिंजलोभवद्यत्सुरापानंꣳ सकलविंकोयदन्नादनंꣳ सतित्ति
रिस्तस्यांजलिनाब्रह्महत्यामुपागृह्णात्तांꣳ संवत्सरमबिभस्तंभूतान्यभ्यक्रोशन्ब्रह्मह
न्नितिसपृथिवीमुपासीददस्यैब्रह्महत्यायैतृतीयंप्रतिगृहाणेतिसाब्रवीद्वरंवृणैखा
तात्पराभविष्यंतीमन्येततोमापराभूवमितिपुराते॥२॥संवत्सरादपिरोहादित्यब्रवीत्त
स्मात्पुरासंवत्सरात्पृथिव्यैखातमपिरोहतिवारेवृतंꣳ ह्यस्यैतृतीयंब्रह्महत्यायैप्रत्यगृ

हात्तत्स्वकृतमिरिणमभवत्तस्मादाहिताग्निः श्रद्धादेवः स्वकृत इरिणेनावस्येद्ब्रह्महत्या
यै ह्येष वर्णः स वनस्पतीनुपासीदस्यै ब्रह्महत्यायै तृतीयं प्रतिगृह्णीतेति तेऽब्रुवन्वरं वृ
णामहै वृक्णात् ॥ २ ॥ पराभविष्यन्तो मन्यामहे ततो मा पराभूमेत्याव्रश्चनाद्वो भूयांꣳस मा० २
उत्तिष्ठानित्यब्रवीत्तस्मादाव्रश्चनाद्वृक्षाणां भूयांꣳस उत्तिष्ठन्ति वारेवृतꣳ ह्येषां तृतीयं
ब्रह्महत्यायै प्रत्यगृह्णन्त्स निर्यासोऽभवत्तस्मान्निर्यासस्य नाश्यं ब्रह्महत्यायै ह्येष वर्णो
ऽथो खलु य एव लोहितो यो वाव्रश्चनान्निर्येषति तस्य नाश्यं ॥ ३ ॥ काममन्यस्य स स्त्रीषꣳ
सादमुपासीददस्यै ब्रह्महत्यायै तृतीयं प्रतिगृह्णीतेति ता अब्रुवन्वरं वृणामहा ऋत्वि
यात्प्रजां विन्दामहे काममा विजनितोः संभवामेति तस्मादृत्वियात्स्त्रियः प्रजां विन्दन्ते का
ममा विजनितोः संभवन्ति वारेवृतꣳ ह्यासां तृतीयं ब्रह्महत्यायै प्रत्यगृह्णन्त्सा मलवद्वा ॥ ३ ॥

सा अभवत्तस्मान्मलवद्वाससा न संवदेत ॥ ९ ॥ न सहासीत नास्या अन्नमद्याद्ब्रह्महत्यायै
ह्येषा वर्णं प्रतिमुच्यास्तेथो खल्वाहुरभ्यंजनं वाव स्त्रिया अन्नमभ्यंजनमेव प्रतिगृह्यं का न
मम् अन्यदिति यां मलवद्वाससः संभवंति यस्ततो जायते सोभिशस्तो यामरण्ये तस्यै स्तेनो
यां पराचीं तस्यै ह्रीतमुख्यपगल्भो या स्नाति तस्या अप्सु मारुको या ॥ ८ ॥ अभ्यंक्ते त
स्यै दुश्चर्मा या प्रलिखते तस्यै खलतिरपमारी यांक्ते तस्यै काणो या दतो धावते तस्यै श्या
वदन्या नखानि निकृंतते तस्यै कुनखी या कृणत्ति तस्यै क्लीबो या रज्जुं सृजति तस्या
उद्बंधुको या पर्णेन पिबति तस्या उन्मादुको या खर्वेण पिबति तस्यै खर्वस्तिस्रो रात्रीर्व्र
तं चरेदंजलिना वा पिबेदखर्वेण वा पात्रेण प्रजायै गोपीथाय ॥ ७ ॥ यत्सोमुपानंतेव
क्यान्तस्य नात्वयं वदेत मारुको या खर्वेण वात्रीपिच ॥ १ ॥ लस्त्वाहुनपुत्रोवीद्रूः सोमम्मा

सं० द्वि० ८

॥ ८२ ॥

हरत्तस्मिन्निंद्र उपहवमैच्छत तन्नोपाह्वयत पुत्रं मेवधीरिति स यज्ञवेशसं कृत्वा प्रास
हा सोममपिबत्तस्य यदत्यशिष्यत तत्त्वष्टाहवनीयमुप प्रावर्त्तयत्स्वाहेंद्रशत्रुर्वर्धस्वे
ति यदवर्त्तयत्तद्वृत्रस्य वृत्रत्वं यदब्रवीत्स्वाहेंद्रशत्रुर्वर्धस्वेति तस्मादस्य ॥ १ ॥ इंद्रः शत्रु
रभवत्स संभवन्नग्नीषोमावभि समभवत्स इषुमात्रमिषुमात्रं विष्वङ्ङवर्धत स इमाल्लो
कानावृणोद्यदिमाल्लोकानावृणोत्तद्वृत्रस्य वृत्रत्वं तस्मादिंद्रोबिभेत्स प्रजापतिमुपा
धावच्छत्रुर्मेजनीति तस्मै वज्रं सिक्त्वा प्रायच्छदेतेन जहीति तेनाभ्यायत तावब्रूताम
ग्नीषोमौ मा ॥ २ ॥ प्रहार्षीरावमंतः स्व इति मम वै युवं स्थ इत्यब्रवीन्मामभ्येतमिति तौ भा
गधेयमैच्छेतां ताभ्यामेतमग्नीषोमीयमेकादशकपालं पूर्णमासे प्रायच्छत्तावब्रूताम
भिसंदष्टौ वै स्वो न शक्नुव ऐतुमिति स इंद्र आत्मनः शीतरूरावजनयत्तच्छीतरूरयोर्ज

॥ २ ॥

९॰ न्मयैवं शीनरूरयोर्जन्मवेद ॥ ३ ॥ नैनं शीनरूरौहंतस्साभ्यामिनमुभ्यनयन्तस्माज्जंज
भ्यमानादग्नीषोमौ निरक्रामतां प्राणापानौ वा एनं तदजहितां प्राणो वै दक्षोपानः क्रतुस्त
स्माज्जंजभ्यमानो ब्रूयान्मयि दक्षक्रतू इति प्राणापानावेवात्मन्धत्ते सर्वमायुरेति स देवता
वृत्रान्निर्हूय वार्त्रघ्नं हविः पूर्णमासे निरवपद्घ्नंति वा एनं पूर्णमास आ ॥ ४ ॥ अमावा
स्यायां प्याययंति तस्माद्वार्त्रघ्नी पूर्णमासेनूच्येते वृधन्वती अमावास्यायां तत्संस्था
प्य वार्त्रघ्नं हविर्वज्रमादाय पुनरभ्यायत ते अब्रूतां द्यावापृथिवी मा प्रहारावयोर्वै श्रि
त इति ते अब्रूतां वरं वृणावहै नक्षत्रविहिताहमसानीत्यसावब्रवीच्चित्रविहिताहमिती
यं तस्मान्नक्षत्रविहितासौ चित्रविहितेयं य एवं द्यावापृथिव्योः ॥ ५ ॥ वरं वेदैनं वरो गच्छति वं
स आभ्यामेव प्रसूत इंद्रो वृत्रमहन्ते देवा वृत्रं हत्वाग्नीषोमावब्रुवन्हव्यं नो वहतमिति

सं०द्वि०५

॥५३॥

नार्धुकातामपनिधासौवेत्यो रुत्रैवेत्ययोस्तेजइतितेब्रुवन्कइदमच्छैतीतिगौरित्यब्रुवन्गौ
र्वावसर्वस्यमित्रमितिसाब्रवीत् ॥ ५ ॥ वरंवृणैमय्येवसतोभयेनभुनजाथाइतितदभ्या ५
हरन्तस्माऋविसतोभयेनभुंजतएतद्वाअग्नेस्तेजोयद्घृतमेतत्सोमस्ययत्पयोयएवम
अ ग्नीषोमयोस्तेजोवेदतेजस्व्येवभवतिब्रह्मवादिनोवदन्तिकिंदेवत्यंपौर्णमासमितिप्राजाप
त्यमितिब्रूयात्तेनेन्द्रंज्येष्ठंपुत्रंनिरवासाययदितितस्माज्ज्येष्ठंपुत्रंधनेननिरवसाययं
ति ॥ ७ ॥ अस्यमावेदाद्यावापृथिव्योरब्रवीदितितस्माच्चत्वारिच ॥ २ ॥ इन्द्रंवृत्रंजघ्निवां
संमृधोभिप्रावेपंतसएतंवैमृधंपूर्णमासेनुनिर्वाप्यमपश्यत्तंनिरवपत्तेनवैसमृधोप
हतयद्वैमृधःपूर्णमासेनुनिर्वाप्योभवतिमृधएवतेनयजमानोपहतेइन्द्रोवृत्रंहत्वादे
वताभिरिन्द्रियेणव्यार्ध्यतसएतमष्टाकपालममावास्यायामपश्यदैन्द्रंदधि ॥ १ ॥ नंति मांमेय

॥२॥

रेवपत्तेनवैसदेवतानामिंद्रियंचावावारुंधुयदग्नयोऽष्टाकपालोमावास्यायांभवत्यैंद्रंदधिदेवता
भ्यैवतेनेंद्रियंचयजमानोवरुंधइंद्रस्यवृत्रंजघ्नुषइंद्रियंवीर्यंपृथिवीमनुव्यार्छत्तदोष
धयोवीरुधोभवन्त्सप्रजापतिमुपाधावद्वृत्रंमेजघ्नुषइंद्रियंवीर्यं॥ २॥ पृथिवीमनुव्या
रत्तदोषधयोवीरुधोभूवन्नितिसप्रजापतिः पशुभ्योब्रवीदेतदस्मैसन्नयतेतितत्पश
व ओषधीभ्योध्यात्मन्त्समनयन्तत्प्रत्यदुहन्यत्समनयन्तत्सान्नाय्यस्यसान्नाय्य
त्वंयत्प्रत्यदुहन्तत्प्रतिधुषः प्रतिधुक्त्वं समनैषुः प्रत्यधुक्षन्नतुमेयिश्रयन्तइत्यब्र
वीदेतदस्मै॥ ३॥ शृतंकुरुतेत्यब्रवीत्तदस्मैशृतमकुर्वन्निंद्रियंवावास्मिन्वीर्यंतदश्र
यन्तच्छृतस्यशृतत्वं समनैषुः प्रत्यधुक्षन्शृतमक्रन्नतुमाधिनोतीत्यब्रवीदेतदस्मै
दधिकुरुतेत्यब्रवीत्तदस्मैदध्यकुर्वन्तदेनमधिनोत्तद्दध्नोदधित्वंब्रह्मवादिनोवदंति

सं०द्वि०५

॥५४॥

द्भ्यः पूर्वस्यां वेद्यां ॥ ४ ॥ दधि हि पूर्वं क्रियत इत्यनादृत्य तत्त्वेतत्सैव पूर्वस्यां वेद्यां यद्दक्षि-
णमेवास्मिन्वीर्यं ॥ छिन्द्याद् ध्रोपरिशिष्टाद्धिनोति यथापूर्वमुपैति यस्तु लौकिके वा पर्णवल्केन वा
तं च्यावास्सोम्यं तद्यत्सकले राक्षसं तद्यत्तण्डुले वैश्वदेवं तद्यदास्तं चनेन मानुषं तद्यदृश्यान्तस्मै
दृश्यान्तेन जुहोति ॥ ५ ॥ सेयं स्वायाग्निहोत्रोच्छेषणमभ्यातनं क्रियते यज्ञस्य संतत्या उद्धोरुद्रः
इत्वा परां परावतमगच्छदपाराध्नुमिति मन्यमानस्तं देवताः प्रैषमैच्छंस्तमोऽब्रवीत्प्रजाप-
तिर्यः प्रथमोऽनुविन्दति तस्य प्रथमं भागधेयमिति तं पितरोऽन्वविन्दंस्तस्मात्पितृभ्यः पूर्वे-
द्युः क्रियते सोऽमावास्यामस्तं गच्छत्तं देवा अभिसमगच्छन्तामा वै नः ॥ ६ ॥ अथ यद्वसुं वसु
नीतीदृप्तो हि देवानां वसु देवेतमावास्याया अमावास्यत्वं ब्रह्मवादिनो वदन्ति किंदेवत्यं सा
न्नाय्यमिति वैश्वदेवमिति ब्रूयाद्विश्वे हि तद्देवा भागधेयमभिसमगच्छन्तेत्यथो खल्वैन्द्र- ॥६॥

मित्युवज्रंयादिंद्रंवाववेतेनद्धिषुज्यंतेभिसमगच्छंतेति॥ ७॥ इंधिमेअग्नुपइंद्रियंवीर्यमित्यग्न
वीर्येलतस्माअवृद्धेयतेनन्द्धेनोद्धिचत्वारिंशच्च॥ २॥ ब्रह्मवादिनोवदंतिसलेदर्शपूर्णमासौ
यजेतयएनौसद्वौयजेतेतिवैमृधःपूर्णमासमनुनिर्वाप्याभवंतितेनपूर्णमासःसंद्वएंद्रंदध्य
मावास्यायांतेनामावास्यासंद्वायएवंविद्वान्दर्शपूर्णमासौयजतेसंद्वावेवेनौयजतेभ्वम्बौ
स्माईज्ञानायुवसीयोभवतिदेवावैयद्यज्ञेकुर्वतनदसुराअकुर्वतनतेदेवाएतां॥ ३॥ इष्टिम
पश्यन्नाग्नावैष्णवमेकादशकपालःसरस्वत्यैचरुंसरस्वतेचरुंतांपौर्णमासःसंस्था
प्याग्नुनिरवपन्ततोदेवाअभवन्परासुरायोभ्रातृव्यवान्त्स्यात्सपौर्णमासःसंस्थाप्यैता
मिष्टिमनुनिर्वपेत्सौर्णमासेनैववज्रंभ्रातृव्यायप्रहृत्याग्नावैष्णवेनदेवताभ्वयज्ञंचभ्रातृव्य, ष्णावे
स्यवृंक्तेमिथुनान्पशून्त्सरस्वताभ्यांयावदेवास्यास्तितदत॥ २॥ सर्ववृंक्तेपौर्णमासीमेवय

जेत भ्रातृव्यवान्नामावास्यां हत्वा भ्रातृव्यं नाप्याययति साकंप्रस्थायीयेन यजेत पशु
कामो यस्मै वा अल्पेनाहरन्ति नात्मना तृप्यति नान्यस्मै ददाति यस्मै महता तृप्यत्यात्मना
ददात्यन्यस्मै महता पूर्णं होतव्यं तृप्त एवैनमिन्द्रः प्रजया पशुभिस्तर्पयति दारुपात्रेण
जुहोति न हि मृन्मयमाहुतिमानश औदुम्बरं ॥ ३ ॥ भवत्यूर्ग्वा उदुम्बर ऊर्क्पशव ऊर्जैवास्मा
ऊर्जं पशूनवरुन्धे नागतश्रीर्महेन्द्रं यजेत त्रयो वै गतश्रियः शुश्रुवान् ग्रामणी राजन्यस्तेषां
महेन्द्रो देवता यो वै स्वां देवतामतियजते प्र स्वायै देवतायै च्यवते न परां प्राप्नोति पापी
यान् भवति संवत्सरमिन्द्रं यजेत संवत्सरं हि व्रतं नातिस्वा ॥ ४ ॥ एवैनं देवता दुह्यमाना
भूत्या इन्धे वसीयान् भवति संवत्सरस्य परस्तादग्नये व्रतपतये पुरोडाशमष्टाकपालं नि
र्वपेत्संवत्सरमेवैनं वृत्रं जघ्निवांसमग्निर्व्रतपतिर्व्रतमालम्भयति ततोऽधि कामं यजेत ॥ ५ ॥ ॥ ५ ॥

एतांतदौदुंबरःस्वाद्विःशाखं ॥ ४ ॥ नासोमयाजीसन्नयेदुनागतंवाएतस्यपयोयोसो
मयाजीयदसोमयाजीसंनयेत्परिमोषएवसोन्नेतंकरोत्यथोपरैवसिच्यतेसोमयाज्ये
वसंनयेत्पयोवैसोमःपयःसान्नाय्यंपयसैवपयआत्मन्धत्तेविवाएतंप्रजयापशुभिर
र्द्धयतिवर्द्धयत्यस्यप्रियंभ्रातृव्यंयस्यैहविर्निरुप्तंपुरस्ताच्चंद्रमाः ॥ ५ ॥ अभ्युदेतित्रेधातंडु
लान्विभजेद्येमध्यमाःस्युस्तानग्नयेदात्रेपुरोडाशमष्टाकपालंकुर्याद्येस्थविष्ठास्ता
निंद्रायप्रदात्रेदधंश्चरुंयेणिष्ठास्तान्विष्णवेशिपिविष्टायशृतेचरुमग्निरेवास्मैप्र
जांप्रजनयतिवृद्धामिंद्रःप्रयच्छतियज्ञोवैविष्णुःपशवःशिपिर्यज्ञएवपशुषुप्रतिति
ष्ठतिनद्वे ॥ ६ ॥ यजेतयत्स्वैयासंप्रतियजेतोत्तरयाछंबट्कुर्याद्यदुत्तरयासंप्रतियजे
तपूर्वयाछंबट्कुर्योन्नेष्टिर्भवतिनयज्ञस्तदनुकीनमुख्यपगल्भोजायतएकामेव

यजेत प्रगल्भोऽस्य जायते नो हृत्स्य तद्ध एव यजेत यज्ञमुखमेव पूर्वयालभन्ते यजन्त उत्तर
या देवता एव पूर्वयावरुन्धत इन्द्रियमुत्तरया देवलोकमेव ॥ २ ॥ पूर्वयाभिजयन्ति मनुष्य
लोकमुत्तरया भूयसो यज्ञक्रतूनुपैत्येषा वै सूमना नामेष्टिर्यमद्येजानं पश्चाच्चन्द्रमा
अभ्युदेत्यस्मिन्नेवास्मै लोके र्धुकं भवति दाक्षायणयज्ञेन सुवर्गकामो यजेत पूर्णमासे
सन्नयेन्मैत्रावरुण्यामिक्षयामावास्यायां यजेत पूर्णमासे वै देवानां सुतस्तेषामेतम
र्धमासं प्रसुतस्तेषां मैत्रावरुणी वशामावास्यायामनूबन्ध्यायन्त ॥ ४ ॥ पूर्वेद्युर्यजन्ते वे
दिमेव तत्करोति यद्वत्सानपाकरोति सदोहविर्धाने एव संमिनोति यद्यजते देवैर्वसु
त्याः संपादयति स एतमर्धमासः सधमादं देवैः सोमं पिबति यन्मैत्रावरुण्यामिक्षया
मावास्यायां यजते या एवासौ देवानां वशानूबन्ध्या सो एवैषैतस्य साक्षाद्वा एष देवानामया ॥६॥

रोहन्ति य एषां यज्ञं ॥ ५ ॥ अभ्यारोहन्ति यथा खलु वै श्रेयानभ्यारूढः कामयते तथा क
रोति यद्यवविध्यति पापीया भवन्ति यदि नावविध्यति सदृङ्ङ् ॥ तत्काम एवैतेन यज्ञेन
यजेत स्फुरपेदितिस्तस्यैष यज्ञस्तस्माज्जनः पुण्यो वा भवति प्र वा मीयते तस्यै तद्व्रतं नानृतं वदेन्न
मांसमश्नीयान्न स्त्रियमुपेयान्नास्य पल्पूलनेन वासः पल्पूलयेयुरेतद्धि देवाः स
र्वं न कुर्वन्ति ॥ ५ ॥ चन्द्रमा ह देवलोकमेवयज्ञं पल्पूलयेयुः षट् च ॥ ५ ॥ एष वै देवर
थो यद्दर्शपूर्णमासौ यो दर्शपूर्णमासाविष्ट्वा सोमेन यजते रथस्पष्ट एवावसाने वरे
देवानामवस्यत्येतानि वा अङ्गापरूंषि संवत्सरस्य यद्दर्शपूर्णमासौ य एवं विद्वान्दर्श
पूर्णमासौ यजतेऽङ्गापरूंष्येव संवत्सरस्य प्रतिदधात्येते वै संवत्सरस्य चक्षुषी यद्दर्श
पूर्णमासौ य एवं विद्वान्दर्शपूर्णमासौ यजते ताभ्यामेव स्वर्गं लोकमनुपश्यति ॥ ३ ॥

सं॰ हि॰ ५
५७॥

एषा वै देवानां विक्रान्तिर्यद्दर्शपूर्णमासौ य एवं विद्वान्दर्शपूर्णमासौ यजते देवानामेव
विक्रान्तिमनु विक्रमत एष वै देवयानः पन्था यद्दर्शपूर्णमासौ य एवं विद्वान्दर्शपूर्णमासौ
यजते य एव देवयानः पन्थास्तꣳ समारोहत्येतौ वै देवानाꣳ हरी यद्दर्शपूर्णमासौ य ए
वं विद्वान्दर्शपूर्णमासौ यजते यावेव देवानाꣳ हरी ताभ्याम् ॥ २ ॥ एतेभ्यो हव्यं वहत्येतद्दे
देवानामास्यं यद्दर्शपूर्णमासौ य एवं विद्वान्दर्शपूर्णमासौ यजते साक्षादेव देवानामा
स्ये जुहोत्येष वै हविर्धानी यो दर्शपूर्णमासयाजी सायंप्रातरग्निहोत्रं जुहोति यजते
दर्शपूर्णमासावहरहर्हविर्धानिनाꣳ सुतो य एवं विद्वान्दर्शपूर्णमासौ यजते हविर्धा
न्यस्मीति सर्वमेवास्य बर्हिष्यं दत्तं भवति देवा वा अहः ॥ ३ ॥ यज्ञियं नाविन्दन्ते दर्शपूर्ण
मासावपुनन्तौ वा एतौ पूतौ मेध्यौ यद्दर्शपूर्णमासौ य एवं विद्वान्दर्शपूर्णमासौ यजते ॥ ७ ॥

पूर्तावैवैनोमेध्योयजतेनामावास्यायांचपौर्णमास्यांचस्त्रियमुपेयाद्यदुपेयान्निरिंद्रि
यस्यात्सोमस्यवैराज्ञोर्द्धमासस्यरात्रयः पत्नयआसन्तासांमिमावास्याचपौर्णमासी
चनोपैत्॥ ४ ॥ तेएनमभिसमनह्येतांतंयक्ष्मआर्छद्राजानंयक्ष्मआरदितितद्राजय
क्ष्मस्यजन्मयत्पापीयानभवत्तस्मात्पापयक्ष्मस्ययज्जायाभ्यामविंदत्तज्जायेन्यस्ययए
वमेतेषांयक्ष्माणांजन्मवेदनैनमेतेयक्ष्माविंदंतिसएतेएवनमस्यन्नुपोधावत्तेअब्रू
तांवरंवृणावहाआवंदेवानांभागधेअसाव॥ ५ ॥ आवदधिदेवाइज्यांताइतितस्मात्व
द्दशीनांᳲराञीणाममावास्यायांचपौर्णमास्यांचेदेवाइज्यंतएतेहिदेवानांभागधे
भागधाअसैमनुष्याभवंतियएवंवेदभूतानिक्षुधंमघ्नन्सद्योमनुष्याअर्द्धमासेदे
वामासिपितरःसंवत्सरेवनस्पतयस्तस्मादहरहर्मनुष्याअशनमिच्छंतेर्द्धमासेदेवाइ

संं०ह्रि०५

१५८॥

ज्यंतेमासिपितृभ्यःक्रियतेसंवत्सरेवनस्पतयःफलंगृह्णंतियएवंवेदहंतिक्षुधंभ्रातृव्यं॥ ५ ॥प
शुयंतिताभ्यामहरहरेदसावुफलंःसमर्च॥ ६ ॥देवावैनर्चेनयजुष्याश्रयंततेसामन्नेवाश्रयं
तहिंकरोतिसामैवाकुर्हिंकरोतियत्रैवदेवाअश्रयंततत एवैनान्प्रयुंक्तेहिंकरोतिवाच एवैषयो
गोहिंकरोतिप्रजा एवतद्यजमानःसृजतेत्रिःप्रथमामन्वाहत्रिरुत्तमांयज्ञस्यैवतद्बर्सौ॥ १ ॥न
ह्यत्यप्रस्रंसायसंततमन्वाहप्राणानामन्नाद्यस्यसंतत्याअथोरक्षसामपहत्यैराथंतरीं
प्रथमामन्वाहराथंतरोवाअयंलोकइममेवलोकमभिजयतित्रिर्विगृह्णातित्रयइमेलोका
इमानेवलोकानभिजयतिबार्हतीमुत्तमामन्वाहबार्हतोवाअसौलोकोमुमेवलोकमभि
जयतिप्रवः॥ २ ॥वाजाइत्यनिरुक्तांप्राजापत्यामन्वाहयज्ञोवैप्रजापतिर्यज्ञमेवप्रजाप
तिमारभंतेप्रवोवाजाइत्यन्वाहान्नंवैवाजोन्नमेवावरुंधेप्रवोवाजाइत्यन्वाहतस्मात्प्राची ॥ ६ ॥

नःरेतोधीयतेअग्नआयाहिवीतयइत्याहतस्मात्प्रतीचीः प्रजाजायन्तेप्रवोवाजाः॥ ३ ॥इत्यन्वाह
मासावैवाजाअर्धमासाअभिद्यवोदेवाहविष्मन्तोगौर्घृताचीयज्ञोदेवाञ्जिगातियजमानः
सुम्नयुरिदमसीदमसीत्येवयज्ञस्यप्रियंधामावरुन्धेयंकामयेतसर्वमायुरियादितिप्रवोवा
जाइतितस्यानूच्याग्नआयाहिवीतयइतिसंततमुत्तरमर्धर्चमालभेत॥ ४ ॥प्राणेनैवास्या
पानंदाधारसर्वमायुरेतियोवाअरत्निःसामिधेनीनांवेदारत्नावेवभ्रातृव्यंकुरुतेऽर्धर्चौसं
दधात्येषवाअरत्निःसामिधेनीनांयएवंवेदारत्नावेवभ्रातृव्यंकुरुतऋषेर्ऋषेर्वाएतानि
र्मितायत्सामिधेन्यस्तायदसंयुक्ताःस्युः प्रजयापशुभिर्यजमानस्यवितिष्ठेरन्नर्धर्चौसं
दधातिसंयुनक्त्येवैनाअस्मैसंयुक्ताअवरुद्धाःसर्वामाशिषंदुह्रे॥ ५ ॥बुसंवोजायन्तेप्र
वोवाजालभेनदधातिसंस्त्वाच्च॥ ७ ॥अयंज्ञोवाएषयोसामामग्नआयाहिवीतयइत्याहर

स॰ह्नि॰८

॥१८२॥

थंतरस्यैष वर्णस्तंत्वा समिद्भिरंगिर इत्याह वामदेव्यस्यैष वर्णो बृहदग्ने सुवीर्यमित्याह बृहत
एष वर्णो यदेतं तृचमन्वाह यज्ञमेव तत्सामन्वन्तं करोत्यग्निरमुष्मिँल्लोक आसीदादित्यो
ऽस्मिन्ताविमौ लोकावशान्तौ ॥ ३ ॥ आस्तां ते देवा अब्रुवन्नेतेमौ विपर्यूहामेत्यग्न आयाहि वी
तय इत्यस्मिँल्लोकेऽग्निमदधुर्बृहदग्ने सुवीर्यमित्यमुष्मिँल्लोक आदित्यं ततो वा इमौ लो
कावशाम्यतां यदेवमन्वाहानयोर्लोकयोः शान्त्यै शाम्यतोऽस्मा इमौ लोकौ य एवं वेद पञ्च
दश सामिधेनीरन्वाह पञ्चदश ॥ २ ॥ वा अर्धमासस्य रात्रयोऽर्धमासशः संवत्सर आप्यते
तासां त्रीणि च शतानि षष्टिश्चाक्षराणि तावतीः संवत्सरस्य रात्रयोऽक्षरश एव संवत्सरमा
प्नोति नृमेधश्च परुच्छेपश्च ब्रह्मण्यवादमवदेतामस्मिन्दारावार्द्रेऽग्निं जनयाव यतरो नौ ब्रह्मी
यानिति नृमेधोऽभ्यवदत्स धूममजनयत्परुच्छेपोऽभ्यवदत्सोऽग्निमजनयदृष इत्यब्रवीत् ॥२॥

॥२॥

यत्समावेद्धिद्दृक्थात्मग्निमजीजनो नाहमिति सामिधेनीनामेवाहं वर्णं वेदेत्याह ब्रवी
द्यद्ध नवं सदमेनं न्रूच्यतेऽसआसां वर्णस्तंलास समिद्धिरं गिरइत्याह सामिधेनीष्वेव तज्ज्यो
तिर्जनयति स्त्रियस्तेन यद्ध्व स्त्रियस्तेन यद्ध्रो युस्त्रियुस्त्रियस्तेन यत्सामिधेन्यो वृष
ण्वतीमन्वाह॥ ४॥ तेनपुंस्वतीस्तेन सेन्द्रास्तेन मिथुना अग्निर्देवानां दूत आसीदुशना
काव्योऽसुराणां तौ प्रजापतिं प्रश्नमैतां स प्रजापतिरग्निं दूतं वृणीमह इत्यभिपर्याव
र्तत ततो देवा अभवन्परासुरा यस्यैवं विदुषोऽग्निं दूतं वृणीमह इत्यन्वाह भवत्यात्मना
परास्य भ्रातृव्यो भवत्यध्वरवतीमन्वाह भ्रातृव्यमेवैतया॥ ५॥ ध्वरति शोचिष्केशस्ता
स्तमीमह इत्याह पवित्रमेवैतद्यजमानमेवैतया पवयति समिद्धो अग्न आहुतेत्याह
परिधिमेवैतं परिदधात्यस्कन्दाय यदतऊर्ध्वमभ्यादध्याद्यथा बहिः परिधिस्कन्दति

ताद्ध एवैतत्त्रयो वा अग्नयो हव्यवाहनो देवानां कव्यवाहनः पितॄणां सहरक्षा अ
सुराणां त एतर्ह्याशंसन्ते मां वरिष्यते मां ॥ ५ ॥ वृणीध्वं हव्यवाहनमित्याह ५
य एव देवानां तं वृणीत आर्षेयं वृणीते बंधोरेवैनेत्यथो संतत्यै परस्तादर्वाचो वृणीते
तस्मात्परस्तादर्वांचो मनुष्यान्पितरोनुप्रपिपते ॥ ७ ॥ अग्नीनावाहपंचदशाग्नवीद
न्वाहैतयो वरिष्यते मामेकान्ननिः शर्च ॥ ८ ॥ अग्ने महाँ असीत्याह महान्ह्येष
यदग्निर्ब्राह्मणेत्याह ब्राह्मणो ह्येष भारतेत्याह एष हि देवेभ्यो हव्यं भरति देवेद्ध इत्याह दे
वा ह्येतमैंधत मन्विद्ध इत्याह मनुर्ह्येतमुत्तरो देवेभ्य ऐंधर्षिष्टुत इत्याह ऋषयो ह्येतम
स्तुवन्विप्रानुमदित इत्याह ॥ ९ ॥ विप्रा ह्येते यच्छुश्रुवांसः कविशस्त इत्याह कव
यो ह्येते यच्छुश्रुवांसो ब्रह्मसंशित इत्याह ब्रह्मसंशितो ह्येष घृताहवन इत्याह घृ ॥१०॥

नाकूतिर्यस्यप्रियतमाप्रणीर्यज्ञानामित्याहप्रणीर्ह्येषयज्ञानाꣳरथीरध्वराणामि
त्याहएषहिदेवरथोऽतूर्तोहोतेत्याहनह्येतंकश्चन ॥ २ ॥ तूर्णिर्हव्यवाडित्याहसर्वꣳह्ये
षतरत्यास्पात्रंजुहूर्देवानामित्याहजुहूर्ह्येषदेवानांचमसोदेवपानइत्याहचमसोह्ये
षदेवपानोऽराꣳइवाग्नेनेमिर्देवाꣳस्त्वंपरिभूरसीत्याहदेवान्ह्येषपरिभूर्यद्ब्रूयादावहदेवा
न्देवयतेयजमानायेतिभ्रातृव्यमस्मै ॥ ३ ॥ जनयेदावहदेवान्यजमानायेत्याहयज
मानमेवैनेनवर्धयत्यग्निमग्नआवहसोममावहेत्याहदेवताएवतद्यथापूर्वमुपह्वयतआ
चाग्नेदेवान्वहसुयजाचयजजातवेदइत्याहाग्निमेवतत्सꣳश्यतिसोऽस्यसꣳशितोदेवे
भ्योहव्यंवहत्यग्निर्होता ॥ ४ ॥ इत्याहाग्निर्वैदेवानाꣳहोतायएवदेवानाꣳहोतातंवृणी
तेस्मोवयमित्याहात्मानमेवसत्त्वंगमयतिसाधुतेयजमानदेवतेत्याहाशिषमेवैतामा

न्नास्तियद्ब्रूयाद्योग्निः होतारमवृथाइत्यग्निनोभयतोयजमानंपरिगृह्णीयात्प्रमायुकस्याद्य ६
जमानदेवत्यावैजुहूर्भ्रातृव्यदेवत्योपभृत् ॥ ५ ॥ यद्वेइवब्रूयाद्भ्रातृव्यमस्मैजनयेद्घृतव
तीमध्वर्योःस्रुचमास्यस्वेत्याहयजमानमेवैतेनवर्धयतिदेवायुवमित्याहदेवान्ह्येषावति
विश्ववारामित्याहविश्वंह्येषावतीडामहेदेवाँईडेन्यान्नमस्यामनमस्यान्यजामयज्ञि
यानित्याहमनुष्यावाईडेन्याःपितरोनमस्यादेवायज्ञियादेवताएवतद्यथाभागंयजति ॥ ६ ॥
विश्वानुमदितइत्याहचनास्मेहोतोपभृद्देवताएवत्रीणिच ॥ ९ ॥ त्रीँस्तृचाननुब्रूयाद्रा
जन्यस्यत्रयोवाअन्येराजन्यात्पुरुषाब्राह्मणोवैश्यःशूद्रस्तानेवास्माअनुकान्करोतिपं
चदशानुब्रूयाद्राजन्यस्यपंचदशोवैराजन्यःस्वएवैनंस्तोमेप्रतिष्ठापयतित्रिष्टुभापरि
दध्यादिन्द्रियंवैत्रिष्टुगिन्द्रियकामःखलुवैराजन्योयजतेत्रिष्टुभैवास्माइन्द्रियंपरिगृह्णाति

यद्दिकामयेत॥ १॥ ब्रह्मवर्चसमस्त्विति गायत्र्या परिदध्याद्ब्रह्मवर्चसं वै गायत्री ब्रह्मव
र्चसमेव भवति सप्तदशानुब्रूयाद्वैश्यस्य सप्तदशो वै वैश्यः सएवैनं स्तोमे प्रतिष्ठापयति
जगत्या परिदध्याज्जागता वै पशवः पशुकामः खलु वै वैश्यो यजते जगत्यैवास्मै पशून्प
रिगृह्णात्येकविंशतिमनुब्रूयात्प्रतिष्ठाकामस्यैकविंशः स्तोमानां प्रतिष्ठा प्रतिष्ठित्यै॥ २॥
चतुर्विंशतिमनुब्रूयाद्ब्रह्मवर्चसकामस्य चतुर्विंशत्यक्षरा गायत्री गायत्री ब्रह्मवर्च
सं गायत्र्यैवास्मै ब्रह्मवर्चसमवरुन्धे त्रिंशतमनुब्रूयादन्नकामस्य त्रिंशदक्षरा वि
राडन्नं विराड्विराजैवास्मा अन्नाद्यमवरुन्धे द्वात्रिंशतमनुब्रूयात्प्रतिष्ठाकामस्य द्वात्रिं
शदक्षरानुष्टुबनुष्टुप्छन्दसां प्रतिष्ठा प्रतिष्ठित्यै षट्त्रिंशतमनुब्रूयात्पशुकामस्य
षट्त्रिंशदक्षरा बृहती बार्हताः पशवो बृहत्यैवास्मै पशून्॥ ३॥ अवरुन्धे चतुश्चत्वारिंश

तमनुब्रूयादिंद्रियकामस्य चतुश्चत्वारिंꣳशदक्षरा त्रिष्टुगिंद्रियं त्रिष्टुप्त्रिष्टुभैवास्मा इंद्रिय वा
मवरुंधेष्टाचत्वारिंꣳशतमनुब्रूयात्पशुकामस्याष्टाचत्वारिंꣳशदक्षरा जगती जागताः प ५
शवो जगत्यैवास्मै पशूनवरुंधे सर्वाणि छंदाꣳस्यनुब्रूयाद्बहुयाजिनः सर्वाणि वा एतस्य
छंदाꣳस्यवरुद्धानि यो बहुयाज्यपरिमितमनुब्रूयादपरिमितस्यावरुध्यै ॥ ९ ॥ कामयेत प्र त
तिष्ठितेसेपभूत्सप्तचत्वारिꣳशञ्च ॥ १० ॥ निवीतं मनुष्याणां प्राचीनावीतं पितृणामुपवीतं दे
वानामुपव्ययते देवलक्ष्ममेव तत्कुरुते तिष्ठन्नन्वाह निष्ठुन्न्याश्रुततरं वदति तिष्ठन्नन्वाह सु
वर्गस्य लोकस्याभिजित्या आसीनो यजत्यस्मिन्नेव लोके प्रतितिष्ठति यत्क्रौंचमन्वाहासु
रं तद्यन्मंद्रं मानुषं तद्यदंतरा तत्सदेवमंतरान्न्यूꣳ सदेवलाय विद्वाꣳ सो वै ॥ ११ ॥ पुरा होता
रोऽभूवन्तस्माद्विधृता अध्वानोऽभूवन्न पंथानः समरुक्षन्नंतर्वेद्यन्यः पादो भवति बहिर्वेद्य

न्योयान्वाहाध्वनांविधृत्यैपुथ्यामसंरोहायाथोभूतंचैवभविष्यच्चावरुंधेथोपरिमितंचैवा
परिमितंचावरुंधेथोग्राम्यांश्चैवपशूनारण्यांश्चावरुंधेथो॥२॥देवलोकंचैवमनुष्य
लोकंचाभिजयतिदेवावैसामिधेनीरनूच्ययज्ञंनान्वपश्यन्त्सप्रजापतिस्तूष्णीमाघार
माघारयत्ततोवैदेवायज्ञमन्वपश्यन्यत्तूष्णीमाघारमाघारयतियज्ञस्यानुख्यात्या अ
थोसामिधेनीरेवाभ्यनक्त्यलूक्षोभवतियएवंवेदाथोतर्पयत्येवैनास्तृप्यतिप्रजयापशु
भिः॥३॥यएवंवेदयदेकयाघारयेदेकांप्रीणीयाद्यद्वाभ्यांद्वेप्रीणीयाद्यत्तिसृभिरति
रेचयेन्मनसाघारयतिमनसावानाप्तमाप्यतेतिर्यंचमाघारयत्यछंबट्कारंवाक्चमनश्
चार्त्तीयेतामहंदेवेभ्योहव्यंवहामीतिवागब्रवीदहंदेवेभ्यइतिमनस्तौप्रजापतिंप्रश्न
मैतांसोब्रवीत्॥४॥प्रजापतिर्दूतीरेवत्वंमनसोसियद्धिमनसाध्यायतितद्वाचावदति
तू

स॰ ६॰ ५

।९२॥

चा

इतितत्वलुत्वभ्युंनवाऽजुहवुन्नित्यब्रवीत्तस्मान्मनसाप्रजापतयेजुह्वतिमनइवहिप्रजा

पतिःप्रजापतेराप्त्यैपरिधीन्संमार्ष्टिपुनात्येवैनांस्त्रिर्मध्यमंत्रयोवैप्राणाःप्राणानेवाभि

जयतित्रिर्दक्षिणार्ध्यंत्रयः॥५॥इमेलोकाइमानेवलोकानभिजयतित्रिरुत्तरार्ध्यंत्रयो

वैदेवयानाःपंथानस्तानेवाभिजयतित्रिरुपवाजयतित्रयोवैदेवलोकादेवलोकानेवा

भिजयतिद्वादशसंपद्यन्तेद्वादशमासाःसंवत्सरःसंवत्सरमेवप्रीणात्यथोसंवत्सरमेवा

स्माउपदधातिस्वर्गस्यलोकस्यसमष्ट्याआघारमाघारयतितिरइव॥६॥वैस्वर्गो

लोकःस्वर्गमेवास्मैलोकंपरोऽञ्चयत्यृजुमाघारयत्यृजुरिवहिप्राणःसंततमाघार

यतिप्राणानामन्नाद्यस्यसंतत्याअथोरक्षसामपहत्यैयंकामयेतप्रमायुकःस्यादिति

जिह्मंतस्याघारयेत्प्राणमेवास्माज्जिह्मंनयतिताजक्प्रमीयतेशिरोवाएतद्यज्ञस्य ॥९२॥

होष्यार आत्मा धृता॥ ७॥ आचारमाचार्यं भूवांः समंनक्त्यात्मन्नेव यज्ञस्य शिरः प्रतिद
धात्यग्निर्देवानां हूत आसीद्दैव्योऽसुराणां तौ प्रजापतिं प्रश्नमैतां स प्रजापतिर्ब्राह्मणमे
ब्रवीदेतद्विब्रूहीत्याश्रावयेतीदं देवाः शृणुतेति वावतद ब्रवीदग्निर्देवो होतेति य एव देवा
नां तमेवृणीत ततो देवा॥ ८॥ अभवन्परासुराय स्यैवं विदुषः प्रवरं प्रवृणते भवत्यात्मना
परास्य भ्रातृव्यो भवति यद्ब्राह्मणश्चाब्राह्मणश्च प्रश्नमेयातां ब्राह्मणायाधिब्रूयाद्यद्ब्रा
ह्मणायाध्याहात्मनेऽध्याह यद्ब्राह्मणं पराहात्मानं पराह तस्माद्ब्राह्मणो न परोच्यः॥ ९॥ वा
आरण्यांः श्रावं रुंधेयोः पुष्टुभिः सोऽब्रवीद्दक्षिणाध्यें त्रयेऽद्वभुवादेवाश्चत्वारिंः ग्राञ्च॥ १०॥
आस्येष्ट आयुर्दा ऐन्न आप्यायस्व संतेवतेहेडउदुत्तमं प्रणो दिव्यानो दिवोग्नाविष्णू अग्नावि
ष्णू इमं मे वरुण तत्वायाम्युदुत्यं चित्रं। अपानपासासुरस्थादुपस्थं जिह्मामूर्ध्वविद्युतंव नो

सं०द्वि०५
॥८२॥

सोनः ॥ तस्यज्येष्ठंमहिमानंवहंतीर्हिरण्यवर्णाः परियंतियह्वीः ॥ सं ॥ ३ ॥ अन्यायंत्यु ५
पयंत्यन्याः समानमूर्वंनद्यः पृणंति ॥ तमूशुचिंशुचयोदीदिवांसमपांनपातंपरित
स्थुरापः ॥ तमस्मेरायुवतयोयुवानंमर्मृज्यमानाः परियंत्यापः ॥ सशुक्रेणशिक्वनारेव
दग्निर्दीदायानिध्मोघृतनिर्णिगप्सु ॥ इंद्रावरुणयोरहंसम्राजोरवआवृणे ॥ तानोमृड
तईदृशे ॥ इंद्रावरुणायुवमध्वरायनः ॥ २ ॥ विशेजनायमहिशर्मयच्छतं ॥ दीर्घप्रयज्यु
मतियोवनुष्यतिवयंजयेमपृतनासुदूढ्यः ॥ आनोमित्रावरुणाप्रबाहवा ॥ त्वन्नोअग्नेव
रुणस्यविद्वान्देवस्यहेडोवयासिसीष्ठाः ॥ यजिष्ठोवह्नितमःशोशुचानोविश्वाद्वेषांसि
प्रमुमुग्ध्यस्मत् ॥ सत्वंनोअग्नेवमोभवोतीनेदिष्ठोअस्याउषसोव्युष्टौ ॥ अवयक्ष्वनोव
रुणं ॥ २ ॥ रराणोवीहिमृळीकंसुहवोनएधि ॥ प्रप्रायमग्निर्भरतस्यशृण्वेवियत्सूर्योन ॥१३॥

रोचंते बृहद्भाः ॥ अभियः पूरुं प्रथमं मास्कन्तस्थौ दीदाय दैव्यो अतिथिः शिवो नः ॥ प्रतेयक्षि
प्रतइयर्मि मन्म भुवो यथा वंद्यो नो हवेषु ॥ धन्वन्निव प्रपा असि त्वमग्न इयक्षवे पूरवे प्र
त्नराजन् ॥ ४ ॥ विपाजसा विज्योतिषा ॥ स त्वमग्ने प्रतीकेन प्रत्योष यातुधान्यः ॥ उ
रुक्षयेषु दीद्यत् ॥ तं सुप्रतीकं सुदृशं स्वंचमविद्वांसो विदुष्टरं सपेम ॥ स यं
क्षद्विश्वा वयुनानि विद्वान् प्रहव्यमग्निरमृतेषु वोचत् ॥ अंहोमुचे विवेषयन्मा विनड्
ढे द्वक्षस्त्रमिंद्रियाणि त्रातन्कुनोनुते दायि ॥ २६ ५ ॥ युञ्जीः समे धुरायनो वरूपाः राज्ञः
भ्रुन्तुभ्वलारिः ग्राच्च ॥ १२ ॥ विश्वरूपस्त्वष्टेंद्रं तुच ब्रह्मवादिनः स त्वे नासो मयाध्ये
षवेदेवरथोदेवावेनर्चिनायुज्ञाग्नेमहान्त्री न्तिवीतनुमायुष्टेदृदाह ॥ १२ ॥ विश्वरूपो
नेनतं त्रीनरूरा वज्रवरस्फूर्वे सुर्वाजा इत्यग्नेमहान्निवीतमन्यायंनि चतुः सप्ततिः ॥ ७४ ॥

हरिः ३०३म

सं॰ द्वि॰ ५

॥ ५४ ॥

alarm. The Gendarm
make several charges
mob before order cou
making one hundred
RUSSIA AND P
St. Petersburg, M

ॐ॥ श्रीकृष्णार्पणमस्तु॥ यदक्षरपदभ्रष्टं मात्राहीनं च यद्भवेत्॥ तत्सर्वं क्षम्यतां देव
प्रसीद परमेश्वर॥ ॥ [illegible] श्रीः॥ ॥ श्रीः॥ ॥ श्रीः॥ ॥ ॥ श्रीः॥
इति द्वितीयाष्टके पञ्चम [illegible] ॥ श्रीकृष्णार्पणमस्तु॥ कृष्णाय वासुदेवाय ह
रये परमात्मने॥ प्रणत [illegible] गोविंदाय नमो नमः॥ श्रीपरमेश्वरार्पणमस्तु॥
शांताकारं भुजगशयनं [illegible] गं विश्वाधारं गगनसदृशं मेघवर्णं शुभांगं॥ ल
क्ष्मीकांतं कमलनयनं [illegible] म्यं वंदे विष्णुं भवभयहरं सर्वलोकैकनाथं॥
ध्यायेन्नित्यं महेशं रज [illegible] वतंसं रत्नाकल्पोज्ज्वलांगं परशुमृगवरा
भीतिहस्तं प्रसन्नं॥ प [illegible] तिममरगणैर्व्याघ्रकृत्तिं वसानं विश्वाद्यं
विश्ववंद्यं निखिलभयहरं [illegible] नेत्रं॥ ॐ नमः शिवाय॥ ॥ ॥ ॥ ॥ ॥ १४ ॥

श्रीगजाननप्रसन्न॥ हरिः ओम्॥ समिधोयजतिवसन्तमेवर्तूनामवरुंधेतनूनपातंय
जतिग्रीष्ममेवावरुंधइडोयजतिवर्षाएवावरुंधेबर्हिर्यजतिशरदमेवावरुंधेस्वाहाकार
यजतिहेमंतमेवावरुंधेतस्मात्स्वाहाकृताः हेमन्पशवोवसीदंतिसमिधोयजत्युषसएव
देवतानामवरुंधेतनूनपातंयजतियज्ञमेवावरुंधे॥ १॥ इडोयजतिपशूनेवावरुंधेबर्हि
र्यजतिप्रजामेवावरुंधेसमानयतउपभृतस्तेजोवाआज्यंप्रजाबर्हिः प्रजास्वेवतेजोद
धातिस्वाहाकारंयजतिवाचमेवावरुंधेदशसंपद्यंतेदशाक्षराविराडन्नंविराड्विराजैवान्ना
द्यमवरुंधेसमिधोयजत्यस्मिन्नेवलोकेप्रतितिष्ठतितनूनपातंयजति॥ २॥ यज्ञएवांत
रिक्षेप्रतितिष्ठतीडोयजतिपशुष्वेवप्रतितिष्ठतिबर्हिर्यजतियएवदेवयानाः पंथानस्तेष्वेवप्र
तितिष्ठतिस्वाहाकारंयजतिसुवर्गएवलोकेप्रतितिष्ठत्येतावं तोवैदेवलोकास्तेष्वेवय

सं॰ द्वि॰ ष्टि

॥ ६७ ॥

थापूर्वंप्रयन्तितिष्ठन्तिदेवासुराएषुलोकेष्वस्पर्धन्ततेदेवाःप्रयाजैरेभ्योलोकेभ्योसुरान्प्रा ६
णुदन्ततत्प्रयाजानां ॥ ३ ॥ प्रयाजत्वंयस्यैवंविदुषःप्रयाजाइज्यन्तेप्रैभ्योलोकेभ्योभ्रा
तृव्यान्नुदतेभिक्रामंजुहोत्यभिजित्यैयोवैप्रयाजानांमिथुनंवेदप्रप्रजयापशुभिर्मि
थुनैर्जायतेसमिधोबह्वीरिवयजतितनूनपातमेकमिवमिथुनंतदिडोबह्वीरिवयज
तिबर्हिरेकमिवमिथुनंतदेतद्वैप्रयाजानांमिथुनंयएवंवेदप्र ॥ ४ ॥ प्रजयापशुभि
र्मिथुनैर्जायतेदेवानांवाअनिष्टादेवताआसन्नथासुरायज्ञमजिघांसन्तेदेवागाय था ४
त्रींव्यौहन्पञ्चाक्षराणिप्राचीनानित्रीणिप्रतीचीनानिततोवर्मयज्ञायाभवद्वर्मयज
मानाययत्प्रयाजानूयाजाइज्यन्तेवर्मैवतद्यज्ञायक्रियतेवर्मयजमानायभ्रातृव्याभि
भूत्यैतस्माद्वरूथंपुरस्ताद्वर्षीयःपश्चाद्ध्रसीयोदेवावैपुरारक्षोभ्यः ॥ ५ ॥ इतिस्वाहाका
॥ ३ ॥

रेणप्रयाजेषुयज्ञः सं स्थाप्यमपश्यन्त्स्वाहाकारेणप्रयाजेषुसमस्थापयन्विवाएत
द्यज्ञंछिंदंतियत्स्वाहाकारेणप्रयाजेषुसंस्थापयंतिप्रयाजानिष्ट्वाहवींष्यभिघार
यतियज्ञस्यसंतत्याअथोहविरेवाकरथोयथापूर्वमुपैतिपितावैप्रयाजाःप्रजानूया
जायत्प्रयाजानिष्ट्वाहवींष्यभिघारयतिपितैवतत्पुत्रेणसाधारणं॥ ६॥ कुरुतेतस्मा
दाहुर्यश्चैवंवेदयश्चनकथापुत्रस्यकेवलंकथासाधारणंपितुरित्यस्कन्नमेवतद्यत्प्र
याजेष्विष्टेषुस्कंदतिगायत्र्येवतेनगर्भंधत्तेसाप्रजांपशून्यजमानायप्रजनयति॥ ७॥
यज्ञमेवावरुंधेतनूनपातंयजतिप्रयाजानामेवंवेदप्ररक्षोभ्यः साधारणंपंचत्रिंश
च्च॥ १॥ चक्षुषीवाएतेयज्ञस्ययदाज्यभागौयदाज्यभागौयजतिचक्षुषीएवतद्यज्ञ
स्यप्रतिदधातिपूर्वार्द्धेजुक्षुषीप्रबाहुग्जुहोतितस्मात्प्रबाहुक्चक्षुषीदेवलोकंवाअग्नि

होतितस्मात्पूर्वार्धेच

सं॰ द्वि॰ ६

॥ ६६ ॥

नायजमानोनुपश्यतिपितृलोकꣳसोमेनोत्तरार्द्धेग्नयेजुहोतिदक्षिणार्धेसोमायैव
मिवहीमौलोकावनयोर्लोकयोरनुख्यात्यैराजानौवाएतौदेवतानां॥१॥यदग्नीषोमा
वंतरादेवताइज्येतेदेवतानांविधृत्यैतस्माद्राज्ञामनुष्याविधृताब्रह्मवादिनोवदंतिकिं
तद्यज्ञेयजमानःकुरुतेयेनान्यतोदतश्चपशून्दाधारोभयतोदतश्चेत्यृचमनूच्याज्य
भागस्यजुषाणेनयजतितेनान्यतोदतोदाधारर्चमनूच्यहविषऋचायजतितेनोभ
यतोदतोदाधारमूर्द्धन्वतीपुरोनुवाक्याभवतिमूर्द्धानमेवैनꣳसमानानांकरोति॥२॥
नियुत्वत्यायजतिभ्रातृव्यस्यैवपशून्नियुवतेकेशिनꣳहदार्भ्यंकेशीसात्यकामिरुवाच
सप्तपदांतेशाक्वरीꣳश्वोयज्ञेप्रयोक्तासेयस्यैवीर्येणप्रजातान्भ्रातृव्यान्नुदतेप्रतिज
निष्यमाणान्यस्यैवीर्येणोभयोर्लोकयोर्ज्योतिर्द्धत्तेयस्यैवीर्येणपूर्वार्द्धेनानड्वान्भुनक्ति

॥ २ ॥

जघनार्धेन धेनुरिति पुरस्ताल्लक्ष्मा पुरोनुवाक्या भवति जातानेव भ्रातृव्यान्प्रणुदत्युप
रिष्टाल्लक्ष्मा ॥ ३ ॥ याज्या जनिष्यमाणानेव प्रतिनुदते पुरस्ताल्लक्ष्मा पुरोनुवाक्या भवत्य
स्मिन्नेव लोके ज्योतिर्धत्त उपरिष्टाल्लक्ष्मा याज्यामुष्मिन्नेव लोके ज्योतिर्धत्ते ज्योतिष्मन्तौ
वस्मा इमौ लोकौ भवतो य एवं वेद पुरस्ताल्लक्ष्मा पुरोनुवाक्या भवति तस्मात्पूर्वार्धेनानड्वा
न्भुनक्त्युपरिष्टाल्लक्ष्मा याज्या तस्माज्जघनार्धेन धेनुर्य एवं वेद भुङ्क्त एनमेतौ वज्र आज्यं व५
वज्र आज्यभागौ ॥ ४ ॥ वज्रो वषट्कारस्त्रिवृतमेवैतद्वज्रं संभृत्य भ्रातृव्याय प्रहरत्यछम्ब
ट्कारमपगूर्य वषट्करोति स्तृत्यै गायत्री पुरोनुवाक्या भवति त्रिष्टुग्याज्या ब्रह्मन्नेव क्षत्र
मन्वारम्भयति तस्माद्ब्राह्मणो मुख्यो मुख्यो भवति य एवं वेद प्रैवैनं पुरोनुवाक्ययाह प्र
णयति याज्यया गमयति वषट्कारेणैवैनं पुरोनुवाक्ययादत्ते प्रयच्छति याज्यया प्रति ॥ ५ ॥

वषट्कारेण संस्थापयति त्रिपदा पुरोनुवाक्या भवति त्रय इमे लोका एष्वेव लोकेषु प्रतितिष्ठ
ति चतुष्पदा याज्या चतुष्पद एव पशूनवरुंधे द्व्यक्षरो वषट्कारो द्विपाद्यजमानः पशुष्वेवो ६
परिष्टात्प्रतितिष्ठति गायत्री पुरोनुवाक्या भवति त्रिष्टुग्याज्यैषा वै सप्तपदा शक्वरी यदेता
न यदेवा अशिक्षन्तदशक्नुवन्य एवं वेद शक्नोत्येव यच्छिक्षति ॥ ७ ॥ देवतानां करोत्य
परिष्टाद्धस्माज्यभागौ प्रतिशक्नोत्येव देवं च ॥ २ ॥ प्रजापतिर्देवेभ्यो यज्ञान्व्यादिशत्स आ
त्मन्नाज्यमधत्त तं देवा अब्रुवन्नेष वाव यज्ञो यदाज्यमप्येव नोऽत्रास्त्विति सोऽब्रवीद्यजा
न्व आज्यभागावुपस्तृणानभिघारयानिति तस्माद्यजन्त्याज्यभागावुपस्तृणन्त्यभिघा
रयन्ति ब्रह्मवादिनो वदन्ति कस्मात्सत्याद्यातयामान्यन्यानि हवींष्ययातयाममाज्य
मिति प्राजापत्यं ॥ ३ ॥ इति ब्रूयादयातयामा हि देवानां प्रजापतिरिति छंदांसि देवेभ्यो ॥२॥

पोऽकामयन्त नो भागान्निहव्यं वक्ष्याम इति तेभ्य एतच्चतुरवत्तमधारयन्पुरोनुवाक्यायै याज्या
यै देवतायै वषट्काराय यच्चतुरवत्तं जुहोति छंदांस्येव तत्प्रीणाति तान्यस्य प्रीतानि देवे
भ्यो हव्यं वहंत्यंगिरसो वा इत उत्तमाः स्वर्गं लोकमायंस्तदृषयो यज्ञवास्त्वभ्यवायंस्ते ॥ २ ॥ अ
पश्यन्पुरोडाशं कूर्मं भूतं सर्पंतं तमब्रुवन्निंद्राय ध्रियस्व बृहस्पतये ध्रियस्व विश्वेभ्यो दे
वेभ्यो ध्रियस्वेति स नाध्रियत तमब्रुवन्नग्नये ध्रियस्वेति सोऽग्नये ध्रियत तं यदाग्नेयमष्टाकपा
लममावास्यायां च पौर्णमास्यां चाच्युतो भवति स्वर्गस्य लोकस्याभिजित्यै तमब्रुवन्कथा
हास्था इत्यनुपाक्तोऽभूवमित्यब्रवीद्यथाक्षोऽनुपाक्तः ॥ ३ ॥ अवार्छंत्येवमवारमित्कू परि
ष्टादभ्यज्यावस्तादुपानक्ति स्वर्गस्य लोकस्य समष्ट्यै सर्वाणि कपालान्यभिप्रथयति
तावतः पुरोडाशानमुष्मिंल्लोकेऽभिजयति यो विदग्धः स नैर्ऋतो योऽशृतः स रौद्रो यः शृतः

ससदेवुस्तस्माद्विदहनाश्नलुंकृत्यः सदेवुलायभस्मनाभिवासयतितस्मान्माꣳसेनास्थिच्छ
न्नंवेदेनाभिवासयतितस्मात्॥ ६ ॥ केशैः त्रिरश्मन्नंप्रच्युतंवाएतदस्माल्लोकादगतं ६
देवलोकंयच्छृतꣳहविरनभिघारितमभिघार्योद्वासयतिदेवेष्वेवैनद्गमयतियद्येककपालं
निर्वपेदेकोमासः संवत्सरस्यानवेतःस्या[illegible]दथयजमानःप्रमीयेतयद्विनवयेतांद्वौमासौ
संवत्सरस्यानवेतौस्यातामथयजमानःप्रमीयेतसंख्यायोद्वासयतियजमानस्य॥ ७ ॥
गोपीथाययद्विनवयेताश्विनंद्विकपालंनिर्वपेद्यावापृथिव्यमेककपालमश्विनौवैदेवानां
भिषजौताभ्यामेवास्मैभेषजंकरोतिद्यावापृथिव्यएककपालोभवत्यनयोर्वाएतन्नश्य
तियन्नश्यत्यनयोरेवैनद्विन्दतिप्रतिष्ठित्यै॥ ८ ॥ प्राजापत्यंतेङ्घोनुपाक्तोवेदेनाभिवास
यतितस्माद्यजमानस्यह्वान्निꣳग्राच्छ॥ ९ ॥ देवस्यत्वासवितुःप्रसवइतिस्फ्यमादत्तेप्रसर ॥ ३ ॥

स्या अश्विनोर्बाहुभ्यामित्याहाश्विनौ हि देवानामध्वर्यू आस्तां पूष्णो हस्ताभ्यामित्याह
यत्यै शतभृष्टिरसि वानस्पत्यो द्विषतो वध इत्याह वज्रमेवैतत्सं श्यति भ्रातृव्याय प्र
हरिष्यन्त्स्तंबयजुर्हरत्येतावती वै पृथिवी यावती वेदिस्तस्या एतावत एव भ्रातृव्यं निर्भ
जति ॥ १ ॥ तस्मान्नाभागं निर्भजंति त्रिर्हरति त्रय इमे लोका एभ्य एवैनं लोकेभ्यो निर्भ
जति तूष्णीं चतुर्थं हरत्यपरिमितादेवैनं निर्भजत्युद्धंति यदेवास्या अमेध्यं तदपहंत्यु
द्धंति तस्मादोषधयः पराभवंति मूलं छिनत्ति भ्रातृव्यस्यैव मूलं छिनत्ति पितृदेवत्या
तिखातेयतीं खनति प्रजापतिना ॥ २ ॥ यज्ञमुखेन संमितामा प्रतिष्ठायै खनंति यजमा
नमेव प्रतिष्ठां गमयंति दक्षिणतो वर्षीयसीं करोति देवयजनस्यैव रूपमकः पुरीषवतीं
करोति प्रजा वै पशवः पुरीषं प्रजयैवैनं पशुभिः पुरीषवंतं करोत्युत्तरं परिग्राहं परि
ग्राहं परिगृह्णात्येतावती वै पृथिवी यावती वेदिस्तस्या एतावत एव भ्रातृव्यं निर्भज्यात्मन उत्तरं परि २

सं० हि०
८९ ॥

गृह्णातिक्रूरमिववै ॥ २ ॥ एतत्करोतियद्वेदिंकरोतिधाअसिस्वधाअसीतियोयुप्यते
शान्त्यैप्रोक्षणीरासादयत्यापोवैरक्षोघ्नीरक्षसामपहत्यैस्फ्यस्यवर्त्मन्सादयतियज्ञ
स्यसंतत्यैयंद्विष्यात्तंध्यायेच्छुचैवैनमर्पयति ॥ ३ ॥ भ्जन्तिप्रजापतिनैववेत्रयस्मिंश्श ८९
स्त्र ॥ ४ ॥ ब्रह्मवादिनोवदन्त्यद्भिर्हवींषिप्रौक्षीःकेनापइतिब्रह्मणेतिब्रूयादद्भिर्ह्येवहवीं
षिप्रोक्षतिब्रह्मणापइध्माबर्हिःप्रोक्षतिमेध्यमेवैनत्करोतिवेदिंप्रोक्षत्यृक्षावाएषा
लोमकामेध्यायद्वेदिर्मेध्यामेवैनांकरोतिदिवेत्वान्तरिक्षायत्वापृथिव्यैत्वेतिबर्हिरासा
द्यप्र ॥ ५ ॥ उक्षत्येभ्यएवैनल्लोकेभ्यःप्रोक्षतिक्रूरमिववाएतत्करोतियत्खनत्यपोनिन
यतिशान्त्यैपुरस्तात्प्रस्तरंगृह्णातिमुख्यमेवैनंकरोतीयन्तंगृह्णातिप्रजापतिनायज्ञमु
खेनसंमितंबर्हिःस्तृणातिप्रजावैबर्हिःपृथिवीवेदिःप्रजाएवपृथिव्यांप्रतिष्ठापयत्य ॥ ८९ ॥

नतिदृश्नंस्तृणातिप्रजयैवैनंपशुभिरनतिदृश्नंकरोति ॥ २ ॥ उत्तरंबर्हिषःप्रस्तरंसा
दयन्तिप्रजावैबर्हिर्यजमानःप्रस्तरोयजमानमेवायजमानादुत्तरंकरोतितस्माद्य
जमानोऽयजमानादुत्तरोऽन्तर्दधातिव्यावृत्त्याअनक्तिहविष्कृतमेवैनंसुवर्गंलोकंग
मयतित्रेधानक्तित्रयइमेलोकाएभ्यएवैनंलोकेभ्योऽनक्तिनप्रतिशृणातियत्प्रतिशृणी
यादनूर्ध्वभावुकंयजमानस्यस्यादुपरीवप्रहरति ॥ ३ ॥ उपरीवहिसुवर्गोलोकोनि
यच्छतिवृष्टिमेवास्मैनियच्छतिनात्यग्रंप्रहरेद्यदत्यग्रंप्रहरेदत्यासारिण्यध्वर्योर्नाशु
कास्यान्नपुरस्तात्प्रत्यस्येद्यत्पुरस्तात्प्रत्यस्येत्सुवर्गाल्लोकाद्यजमानंप्रतिनुदेत्प्रा
ञ्चंप्रहरतियजमानमेवसुवर्गंलोकंगमयतिनविष्वञ्चंवियुयाद्यद्विष्वञ्चंवियुयात् ॥ ४ ॥
स्त्र्यस्यजायेतोर्ध्वमुद्यौत्यूर्ध्वमिवहिपुंसःपुमानेवास्यजायतेयत्स्फ्येनवोपवेषेण

वायोयूपेयत्स्तरीरिवास्यसाहस्तेनयोयुपतेयजमानस्यगोपीथायब्रह्मवादिनोवदंति
किंयज्ञस्ययजमानइतिप्रस्तरइतितस्यक्वसुवर्गोलोकइत्याहवनीयइतिब्रूयाद्यत्प्रस्त
रमाहवनीयेप्रहरतियजमानमेव॥ ८॥ सुवर्गंलोकंगमयतिविवाएतद्यजमानोलिश
तेयत्प्रस्तरंयोयुपतेबर्हिरनुप्रहरतिशांत्याअनारंभणइववाएतर्ह्यध्वर्युःसईश्वरोवे
पनोभवितोर्ध्रुवासीतीमामभिमृशतीयंवैध्रुवास्यामेवप्रतितिष्ठतिनवेपनोभवत्यगा३
न्नग्नीदित्याहयद्ब्रूयादगन्नग्निरित्यग्नावग्निंगमयेन्निर्यजमानꣳसुवर्गाल्लोकाद्गच्छेदग
न्नित्येवब्रूयाद्यजमानमेवसुवर्गंलोकंगमयति॥ ८॥ आसाद्यप्राणंतिदंभंकरोतिह
रतिविमुयाद्यजमानमेवाग्निरितिसमतंदर्शाञ्च॥ ८॥ अग्नेस्त्रयोज्यायाꣳसोभ्रातरआस सा
न्तेदेवेभ्योहव्यंवहन्तःप्रामीयन्तसोग्निरबिभेदित्थंवावस्यआर्तिमारिष्यतीतिसनिला ॥ ६१॥

यत्सोपः प्राविशत्तंदेवताः प्रैषमैच्छन्तंमत्स्यः प्राब्रवीत्तमशपद्धियाधियात्वावध्यासुर्यो
माप्रावोच इतितस्मान्मत्स्यंधियाधियाघ्नंतिशप्तः ॥ १ ॥ तमन्वविंदन्तमब्रुवन्नुपनआ
वर्त्तस्वहव्यंनोवहेतिसोब्रवीद्वरंवृणैयदेवगृहीतस्याहुतस्यबहिःपरिधिस्कंदात्तन्मेभ्रा
तृणांभागधेयमसदितितस्माद्यद्गृहीतस्याहुतस्यबहिःपरिधिस्कंदतितेषांतद्भागधेयं
तै०२५ तानेवंप्रीणातिपरिधीन्परिदधातिरक्षसामपहत्यैसंस्पर्शयति ॥ २ ॥ रक्षसामनन्वव
चारायनपुरस्तात्परिदधात्यादित्योह्येवोद्यन्पुरस्ताद्रक्षांस्यपहंत्यूर्ध्वेसमिधावादधा
त्युपरिष्टादेवरक्षांस्यपहंतियजुषान्यांतूष्णीमन्यांमिथुनत्वायद्वेआदधातिद्विपाद्य
जमानः प्रतिष्ठित्यैब्रह्मवादिनोवदंतिसत्वैयजेतयोयज्ञस्यार्त्यावसीयान्स्यादितिभू
पतयेस्वाहाभुवनपतयेस्वाहाभूतानां ॥ ३ ॥ पतयेस्वाहेतिस्कंनमनुमंत्रयेतयज्ञस्यैव

नदास्यां [illegible] यजमानो वसीयान्भवति भूयसीर्हि देवताः प्रीणाति जामि वा एतद्यज्ञस्य
क्रियते यदन्वञ्चौ पुरोडाशावुपांशुयाजमन्तरा यजत्यजामित्वायाथो मिथुनत्वायाग्नि ६
रमुष्मिन्लोक आसीद्यमोऽस्मिन्ते देवा अब्रुवन्नेतेमौ वि पर्यूहामेत्यन्नाद्येन देवा अग्नि ॥ ६ ॥
मुपामन्त्रयन्त राज्येन पितरो यमं तस्मादग्निर्देवानामन्नादो यमः पितृणां राजा य एवं वेद
प्र राज्यमन्नाद्यमाप्नोति तस्मा एतद्भागधेयं प्रायच्छन्यदग्नये स्विष्टकृतेऽवद्यन्ति यदग्नये
स्विष्टकृतेऽवद्यति भागधेयेनैव तद्रुद्रं समर्धयति सकृत्सकृदवद्यति सकृदिव हि रुद्र उत्त
रार्धादवद्यत्येषा वै रुद्रस्य ॥ ७ ॥ दिक्स्वायामेव दिशि रुद्रं निरवदयते द्विरभि घारयति
चतुरवत्तस्याप्त्यै पशवो वै पूर्वा आहुतय एष रुद्रो यदग्निर्यत्पूर्वा आहुतीरभि जुहुयाद्रु
द्राय पशूनपि दध्यादपशुर्यजमानः स्यादतिहाय पूर्वा आहुतीर्जुहोति पशूनां गोपीथाय ॥ ८ ॥
॥ ७ ॥

णासस्वर्ग्यायतिभूतानामग्निःरुद्रस्यसमग्निःशान्त्यै॥ ६॥ मनुःपृथिव्यायज्ञियमैच्छत्स
घृतंनिषिक्तमविंदत्सोऽब्रवीत्कोऽस्येश्वरोयज्ञेपिकर्तोरितितावब्रूतांमित्रावरुणौगोरेवाव
मीश्वरौकर्तोःस्वइतितौततोगांसमैरयतांसायत्रयत्रन्यक्रामतमपीड्यततस्माद्घृ ततोघृ ३
तपद्युच्यतेतदस्यैजन्मोपहूतंरथंतरंसहपृथिव्येत्याह॥ १॥ इयंवैरथंतरमिमामेव
सहान्नाद्येनोपह्वयतउपहूतंवामदेव्यंसहांतरिक्षेणेत्याहपशवोवैवामदेव्यंपशूनेव
सहांतरिक्षेणोपह्वयतउपहूतंबृहत्सहदिवेत्याहैरंवैबृहदिरामेवसहदिवोपह्वयतउप
हूताःसप्तहोत्राइत्याहहोत्राएवोपह्वयतउपहूताधेनुः॥ २॥ सहर्षभेत्याहमिथुनमे
खेर वोपह्वयतउपहूतोभक्षःसखेत्याहसोमपीथमेवोपह्वयतउपहूतां३होइत्याहात्मानमे
वोपह्वयतआत्माह्युपहूतानांवसिष्ठइडामुपह्वयतेपशवोवाइडापशूनेवोपह्वयतेचतु

रुपह्वयते चतुष्पादो हि पशवो मानवीत्याह मनुर्ह्येतां ॥ ३ ॥ अग्रेपश्यद्घृतपदीत्याह यदे
वास्यै पदाद्घृतमपीड्यत तस्मादेवमाह मैत्रावरुणीत्याह मित्रावरुणौ ह्येनां समैरयतां ६
ब्रह्म देवकृतमुपहूतमित्याह ब्रह्मैवोपह्वयते दैव्या अध्वर्यव उपहूता उपहूता मनुष्या
इत्याह देवमनुष्यानेवोपह्वयते य इमं यज्ञमवान्ये यज्ञपतिं वर्धानित्याह ॥ ४ ॥ यज्ञाय चै
व यजमानाय चाशिषमाशास्त उपहूते द्यावापृथिवी इत्याह द्यावापृथिवी एवोपह्वयते
पूर्वजे ऋतावरी इत्याह पूर्वजे ह्येते ऋतावरी देवी देवपुत्रे इत्याह देवी ह्येते देवपुत्रे उपहू
तोऽयं यजमान इत्याह यजमानमेवोपह्वयत उत्तरस्यां देवयज्यायामुपहूतो भूयसि हवि
ष्करण उपहूतो दिव्ये धामन्नुपहूतः ॥ ५ ॥ इत्याह प्रजा वा उत्तरा देवयज्या पशवो भूयो ह
विष्करणं सुवर्गो लोको दिव्यं धामेदमसीदमसीत्येव यज्ञस्य प्रियं धामोपह्वयते विश्वमस्य ॥७॥

प्रियमुपह्वयन्निमित्याहाच्छंबट्कारमेवोपह्वयते ॥ ६ ॥ आहधेनुरेतां बह्वीनित्याह धामन्नुपह्व
श्रनु २ तेस्विः साद्ध ॥ ७ ॥ पञ्चवावावाउडास्वयमाह नेकामममेवात्मना पशूनामाह्वत्तेन स्वन्यः काम
पशूनां मृयच्छति वाचस्पतये त्वा हुतं प्राश्नामीत्याह वाचमेव भागधेयेन प्रीणाति सदस्पतये त्वा स २
हुतं प्राश्नामीत्याह स्वगाकृत्यै चतुरवत्तं भवति हविर्वै चतुरवत्तं पशवश्चतुरवत्तं यद्धोता प्रा
श्नीयाद्धोता ॥ १ ॥ आर्तिमार्च्छेद्यदग्नौ जुहुयाद्रुद्राय पशूनपिदध्यादपशुर्यजमानः स्याद्वाच
स्पतये त्वा हुतं प्राश्नामीत्याह परोक्षमेवैनज्जुहोति सदसस्पतये त्वा हुतं प्राश्नामीत्याह स्व
गाकृत्यै प्राश्नंति तीर्थ एव प्राश्नंति दक्षिणां ददाति तीर्थ एव दक्षिणां ददाति वि वा एतद्यज्ञं ॥ २ ॥
छिंदंति यन्मध्यतः प्राश्नंत्युद्भिर्मार्जयंत आपो वै सर्वा देवता देवताभिरेव यज्ञं संतन्वंति
देवा वै यज्ञाद्रुद्रमंतरायन्स यज्ञमविध्यत्तं देवा अभिसमगच्छंत कल्पतां न इदमिति तेऽब्रुवन्

सं०द्वि० ६

७३॥

स्विष्टं वै न इदं भविष्यतीति यदिमꣳ राधयिष्याम इति तत्स्विष्टकृतः स्विष्टकृत्त्वं तस्याविद्धं निः ॥३॥ ६
अकृन्तन्यवेन संमितं तस्माद्यवमात्रमव द्येद्यज्ज्यायो ऽवद्येद्रोपयेत्तद्यज्ञस्य यदुप च स्तृणी
याद्भि च घारयेदुभयतः संश्वायि कुर्यादवदायाभि घारयति द्विः सम्पद्यते द्विपाद्यज
मानः प्रतिष्ठित्यै यत्तिरश्चीनमतिहरेदनभिविद्धं यज्ञस्याभि विध्येदग्रेण परि हरति ती
र्थेनैव परि हरति तत्पूष्णे पर्यहरन्तत् ॥४॥ पूषा प्राश्य दतो ऽरुणत्तस्मात्पूषा प्रपिष्टभा
गो ऽदन्तको हि तं देवा अब्रुवन्वि वा अयमार्धि प्राशित्रियो वा अयमभूदिति तद्बृहस्पतये पर्य म
हरन्त्सो ऽबिभेद्बृहस्पतिरित्थं वाव स्य आर्तिमारिष्यतीति स एतं मन्त्रमपश्यत्सूर्यस्य त्वा च
स्प क्षुषा प्रति पश्यामीत्यब्रवीन्न हि सूर्यस्य चक्षुः ॥५॥ किं चन हिनस्ति सो ऽबिभेत्प्रतिगृ
ह्णन्तं मा हिꣳसिष्यतीति देवस्य त्वा सवितुः प्रसवे ऽश्विनोर्बाहुभ्यां पूष्णो हस्ताभ्यां प्रतिगृ ॥०॥

ह्वामीत्यब्रवीत्सवितुः प्रसूत एवैनद्ब्रह्मणा देवताभिः प्रत्यगृह्णात्सो बिभेत्प्राश्नंतं माहिंसि
ष्यतीत्यग्नेस्त्वास्येन प्राश्नामीत्यब्रवीन्नह्यग्नेरास्यं किंचन हिनस्ति सो बिभेत्॥ ६॥ प्राशि
त्रं मा हिंसिष्यतीति ब्राह्मणस्योदरेणेत्यब्रवीन्न हि ब्राह्मणस्योदरं किंचन हिनस्ति बृहस्प
तेर्ब्रह्मणेति स हि ब्रह्मिष्ठोप वा एतस्मात्प्राणाः क्रामंति यः प्राशित्रं प्राश्नात्यद्भिर्मार्जयित्वा
प्राणान्त्संमृशतेमृतं वै प्राणा अमृतमापः प्राणानेव यथास्थानमुपह्वयते॥ ७॥ प्राश्नी
याडोतां यज्ञं निरहरन्त त्वष्टुरास्ये किंचन हिनस्ति सो बिभेत्त्वतुभ्यत्वारिंशाच्च॥ ८॥ अ
ग्नीध आदधात्यग्निमुखानेवर्तून्प्रीणाति समिधमादधात्युत्तरासामाहुतीनां प्रतिष्ठित्या अथो सा ३
समिद्धत्येव जुहोति परिधीन्त्संमार्ष्टि पुनात्येवैनांस्त्रिस्त्रिः संमार्ष्टि पराङिव ह्येतर्हि यज्ञ
श्चतुः संपद्यते चतुष्पादः पशवः पशूनेवावरुंधे ब्रह्मन्प्रस्थास्याम इत्याहात्र वा एतर्हि

यज्ञः शिरः ॥ १ ॥ यत्र वा अस्यायत्रैव यज्ञः शिरश्छिन्नस्ततएवैनमारभते यदुस्तेन प्रमीवेद्धपुनः स्या ८
द्यच्छीर्ष्णोऽशीर्षन्विमान्यस्याप्यन्तूष्णीमासीनासंप्रत्तो यज्ञस्यात्मनिष्ठेत्येव ब्रूयाद्यांचैवं
यज्ञः शिरो यत्रैव यज्ञः शिरस्ततएवैनं संप्रयच्छति दिवसविनरेन तुष्य ॥ २ ॥ आहेत्या
ह प्रसरस्यैव बृहस्पतिर्ब्रह्मेत्याह सहि ब्रह्मिष्ठः सयज्ञं पाहि सयज्ञपतिं पाहि समां पाहीत्य
ह यज्ञाय यजमानायात्मने तेभ्य एवाशिषमाशास्तेनार्त्त्यो आश्राव्याह देवान्यजेति ब्र
ह्मवादिनो वदन्तीष्टा देवता अथ कतम एते देवा इति छन्दांसीति ब्रूयाद्गायत्रीं त्रिष्टुभं ॥ ३ ॥
जगतीमित्यथो खल्वाहुर्ब्राह्मणा वै छन्दांसीति तानेव तद्यजति देवानां वा इष्टा देवता आ
सन्नथाग्निर्नोदज्वलत्तं देवा आहुतीभिरनूयाजेष्वन्वविन्दन्यदनूयाजान्यजत्यग्निमेव त
त्समिन्ध एतद्वै नामास्क्रूर आसीत्स एतर्हि यज्ञस्याशीर्षमवृंक्त यद्भूयादेतत् ॥ ४ ॥ उद्या ॥१०॥

वापृथिवीभद्रमभूदित्येतदुहैवास्करंयज्ञस्याशिषंगमयेदिदंद्यावापृथिवीभद्रमभूदित्येव
ब्रूयाद्यजमानमेवयज्ञस्याशिषंगमयत्यार्ध्मसूक्तवाकमुतनमोवाकमित्याहेदंसमरात्स्मे
तिवावैतदाहापश्रितोदिवःपृथिव्योरित्याहद्यावापृथिव्योर्हियज्ञउपश्रितओमन्वतीते
ऽस्मिन्यज्ञेयजमानद्यावापृथिवी॥ ५ ॥स्तामित्याहाशिषमेवैतामाशास्तेयद्ब्रूयात्सूपा
वसानाचस्वध्यवसानाचेतिप्रमायुकोयजमानस्याद्यदाहिप्रमीयतेऽथेमामुपावस्यति
सूपचरणाचस्वधिचरणाचेत्येवब्रूयाद्वरीयसीमेवास्मैगव्यूतिमाशास्तेनप्रमायुको
भवतितयोराविद्यग्निरिदंहविरजुषतेत्याहयाअयाक्ष्म॥ ६ ॥देवतास्ताअरीरधामे
तिवावैतदाहयन्ननिर्दिशेत्प्रतिवेशंयज्ञस्याशीर्गच्छेदाशास्तेयंयजमानोऽसावित्याह
निर्दिशेद्येवैनंस्वर्गंलोकंगमयत्यायुराशास्तेसुप्रजास्त्वमाशास्तइत्याहाशिषमेवैता

माज्ञातास्तेसजानतचनुस्यामाज्ञातास्तदैस्याद्धाग्निर्देवेभ्योवनुतेनयंमनुष्येभ्यइतिवावैतद्दो ६
हहगन्निर्वामस्येदंचनमोदेवेभ्यइत्याहयाश्चैवदेवतायजतियाश्चनताभ्यएवोभयीभ्यो
नमᳵस्याहप्राणावैसज्ञानाःप्राणानेव॥७॥नांतरेतितद्द्यौर्देवोदेवेभ्योवनतेवयम्
ग्नेर्मानुषाउᳵस्करोत्यात्मनोनार्त्यै॥८॥भिन्नस्तेप्रत्रिष्टुभमेतद्यावापृथिवीयोऽस्मपा अ
णानेवपट्चत्वारिंशज्ञाञ्च॥९॥देवावैयज्ञस्यस्वगाकर्त्तारंनाविंदन्तेशंयुंबार्हस्पत्यमब्रु
वन्निमन्नोयज्ञंस्वगाकुर्वितिसोऽब्रवीद्वरंवृणैयदेवाब्राह्मणोक्तोऽश्रद्दधानोयजातैसा
मेयज्ञस्याशीरसदितितस्माद्यदब्राह्मणोक्तोऽश्रद्दधानोयजतेशंयुमेवास्यबार्हस्पत्यंयज्ञ
स्याशीर्गच्छत्येतन्ममेत्यब्रवीत्किंमेप्रजायाः॥१॥इतियोऽपगुरातैशतेनयातयाद्योनि
हनत्सहस्रेणयातयाद्योलोहितंकरवद्यावतःप्रस्कद्यपांसून्संगृह्णात्तावतःसंवत्सरा

न्पितृलोकंनप्रजानादितितस्माद्ब्राह्मणायनापगुरेतननिहन्यान्नलोहितंकुर्यादेतावता
हैनसाभवतितच्छंयोरावृणीमहइत्याहयज्ञमेवतत्स्वगाकरोतितत्॥ २॥ शंयोरावृणी
महइत्याहशंयुमेवबार्हस्पत्यंभागधेयेनसमर्धयतिगातुंयज्ञायगातुंयज्ञपतयइत्याहा
शिषमेवैतामाशास्तेसोमंयजतिरेतएवतद्दधातित्वष्टारंयजतिरेतएवहितंत्वष्टारूपाणि
विकरोतिदेवानांपत्नीर्यजतिमिथुनत्वायाग्निंगृहपतिंयजतिप्रतिष्ठित्यैजामिवाएतद्य
ज्ञस्यक्रियते॥ ३॥ यदाज्येनप्रयाजाइज्यंतआज्येनपत्नीसंयाजाऋचमनूच्यपत्नीसं
याजानामृचायजतियज्ञस्याजामित्वायाथोमिथुनत्वायपंक्तिप्रायणोवैयज्ञःपंक्त्युदयनःपंचप्र
याजाइज्यंतेचत्वारःपत्नीसंयाजाःसमिष्टयजुःपंचमंपंक्तिमेवानुप्रयंतिपंक्तिमनूद्यं
ति॥ ४॥ प्रजायाःकरोतितत्क्रियतेचयस्मिंस्त्राच्च॥ १०॥ युक्ष्वाहिदेवहूतमाँअ

सं०हि०टि०

॥७६॥

श्वाँ अग्ने रथीरिव॥ नि होता पूर्व्यस्सदः॥ उत नो देव देवाँ अच्छा वोचो विदुष्टरः॥ श्रद्विश्वा ६
सहे२ वार्या कृधि॥ त्वं ह यद्यविष्ठ्य सहसः सूनवाहुत॥ ऋतावा यज्ञियो भुवः॥ अयमग्निः सह
स्त्रिणो वाजस्य शतिनस्पतिः॥ मूर्द्धा कवी रयीणां॥ तन्नेमिमृभवो यथा नमस्व सहूति
भिः॥ नेदीयो यज्ञं॥ १॥ अंगिरः॥ तस्मै नूनमभिद्यवे वाचा विरूप नित्यया॥ वृष्णे चोद
स्व सुष्टुतिं॥ कमु ष्विदस्य सेनयाग्नेरपाकचक्षसः॥ पणिं गोषु स्तरामहे॥ मा नो देवानां
विशः प्रस्नातीरिवोस्राः॥ कृशन्न हासुरघ्न्याः॥ मा नः समस्य दूढ्यः परिद्वेषसो अंह
तिः॥ ऊर्मिर्न नावमा वधीत्॥ नमस्ते अग्न ओजसे गृणन्ति देव कृष्टयः॥ अमैः॥ २॥ अ
मित्रमर्दय॥ कुवित्सु नो गविष्टयेऽग्ने संवेषिषो रयिं॥ उरुकृदुरु णस्कृधि॥ मा नो अस्मिन्म
हाधने परा वर्ग्भारभृद्यथा॥ संवर्गं सं रयिं जय॥ अन्यमस्मद्भिया इयमग्ने सिषक्तु दुच्छु ॥१२॥

नो॥ वर्हीनो अमंघच्छदः॥ यस्याज्ञः षन्न मुस्विनः ज्ञामीमद्युर्मरवं वा॥ तं घेदग्निर्वृधावति॥
परस्या अधि॥ २॥ संवनो वराः अभ्यानर॥ यत्राहमस्मि ता अव॥ त्रिधा हि ते पुरा वयम
ग्ने पितुर्यथावसः॥ अधा ते सुम्नमीमहे॥ य उग्र इव शर्यहा तिग्मशृंगो न वंसगः॥ अग्ने पु
रो रुरोजिथ॥ सखायः संवः सम्यंचमिषं स्तोमं चाग्नये॥ वर्षिष्ठाय क्षितीनामूर्जो नप्त्रे स
हस्वते॥ सं समिद्युवसे वृषन्नग्ने विश्वान्यर्य आ॥ इडस्पदे समिध्यसे स नो वसून्याभर॥
प्रजापते न स वेद सोमापूषणो मो देवौ॥ ३० ४॥ यज्ञमसेर्धिकान्न विंज्ञानिम्ब॥ ३३॥ उशंत वृषन्ने
स्त्वा हवामह उशंतः समिधीमहि॥ उशन्नुशत आवह पितॄन्हविषे अत्तवे॥ त्वं सोम प्र
चिकितो मनीषा त्वं रजिष्ठमनु नेषि पंथां॥ तव प्रणीती पितरो न इंदो देवेषु रत्नमभजंत
धीराः॥ त्वया हि नः पितरः सोम पूर्वे कर्माणि चक्रुः पवमान धीराः॥ वन्वन्नवातः परिधीं

सं०द्वि०६

॥७१॥

रपोवृणुवीरेभिरश्वैर्मघवाभव॥ १॥ नुः॥ त्वꣳसोमपितृभिःसंविदानोनुद्यावापृथिवीआ
ततंथ॥ तस्मैतइन्दोहविषाविधेमवयꣳस्यामपतयोरयीणां॥ अग्निष्वात्ताःपितरएह ६
गच्छतसदःसदःसदतसुप्रणीतयः॥ अत्ताहवीꣳषिप्रयतानिबर्हिष्यथारयिꣳसर्ववी
पितर ४ रंदधातन॥ बर्हिषदःपितरऊत्यर्वागिमावोहव्याचकृमाजुषध्वं॥ तआगतावसाशन्तमेनाथा
नःशंयोररपोदधात॥ आहंपितॄन्सुविदत्राꣳअवित्सिनपातंचविक्रमणंचविष्णोः॥
बर्हिषदोयेस्वधयासुतस्यभजंतपित्वस्तइहागमिष्ठाः॥ उपहूताःपितरःसोम्यासो
बर्हिष्येषुनिधिषुप्रियेषु॥ तआगमंतुतइहश्रुवंत्वधिब्रुवंतुतेवंत्वस्मान्॥ उदीरतां
मवरउत्परासउन्मध्यमाःपितरःसोम्यासः॥ असुं॥ २॥ यईयुरवृकाऋतज्ञास्तेनोवं
तुपितरोहवेषु॥ इदंपितृभ्योनमोअस्त्वद्ययेपूर्वासोयउपरासईयुः॥ येपार्थिवेरजस्या ॥१२॥

निषत्तायेवानूनः स्फलूजनास्फविष्ट॥ अधायथानः पितरः परासः प्रत्नासो अग्न ऋ
तमाशुषाणाः॥ शुचीदयन्दीधितिमुक्थशासः क्षामाभिंदंतो अरुणीरपव्रन्॥ य
दग्ने॥ ४॥ कव्यवाहन पितृन्यक्ष्यृतावृधः॥ प्रचहव्यानि वक्ष्यसि देवेभ्यश्च पितृभ्य
आ॥ त्वमग्न ईडितो जातवेदोवाड्ढव्यानि सुरभीणि कृत्वा॥ प्रादाः पितृभ्यः स्वधया ते
अक्षन्नद्धि त्वं देव प्रयता हवींषि॥ मातली कव्यैर्यमो अंगिरोभि बृहस्पतिर्ऋक्वभि
र्वावृधानः॥ यांश्च देवा वावृधुर्ये च देवान्स्वाहान्ये स्वधयान्ये मदंति॥ ५॥ इमं य
म प्रस्तरमाहि सीदांगिरोभिः पितृभिः संविदानः॥ आत्वा मंत्राः कविशस्ता वहंत्वेना रा
जन्हविषो मादयस्व॥ अंगिरोभिरागहि यज्ञियेभिर्यम वैरूपैरिह मादयस्व॥ विवस्व
न्तं हुवे यः पिता तेस्मिन्यज्ञे बर्हिष्या निषद्य॥ अंगिरसो नः पितरो नवग्वा अथर्वाणो

भूर्गवः सोम्यासः ॥ तेषांवयंसुमतौयज्ञियानामपिभद्रेसौमनसेस्याम ॥ ७ ॥ भ्रौ ॥ २२२

वास्मभ्यमस्मयंदधेमदंतिसौमनसंएकंच ॥ १२ ॥ समिधुम्वक्षकृषी प्रजापतिराज्यं

देवस्यस्यस्यंत्रब्रह्मचादितोङ्गिरसेस्वयोमनुः पृथिव्यापृथ्याचोष्णीधेदेवावेयुक्त्वौशंतस्त

हादत्वा ॥ १२ ॥ समिधोयाज्यानस्मान्नाभागः हितमान्वित्यांह प्रजावाउ तेराआहे

त्यांहयुस्वसमाप्तिः ॥ हरिः ॐ ॥ ७० ॥ शके १७३० ॥ विभवनामसंवत्सरेमार्गशीर्षकृष्ण

सप्तम्यांमंदवासरेसमाप्तंइदंपुस्तकंसाठेइत्युपनामकविष्णुपंतात्मजगोविंदे

नलिखितंतस्यपुस्तकं ॥ श्रीकृष्णार्पणमस्तु ॥ स्वार्थपरार्थंवा ॥ श्रीकृष्णार्पण

मस्तु ॥ छ ॥ छ ॥ छ ॥ छ ॥ छ ॥ छ ॥ छ ॥ छ ॥ छ ॥ छ ॥ छ ॥ छ ॥ छ ॥ छ ॥ छ ॥ छ ॥ छ ॥

छ ॥ छ ॥ छ ॥ छ ॥ छ ॥ छ ॥ छ ॥ छ ॥ छ ॥ छ ॥ छ ॥ छ ॥ छ ॥ छ ॥ छ ॥ छ ॥ छ ॥ छ ॥ छ ॥ ॥१४॥

पूर्वनिशि वेद पाठ निषेध प्रमाणम् —

॥ चतुर्थ्यां प्रथमे यामे सार्धयामे च सप्तमी ॥
॥ यामद्वयं त्रयोदश्यां प्रदोषः सर्वघातकः ॥१॥

७१ श्री ५ श्रीः

॥ २०३ म ॥

५ अथसंहिताद्वितीयाष्टकस्समाप्तः श्रीशिवसांबश्रीः ५

॥श्री॥ ७॥ ॥ श्रीविश्वेश्वरायनमः॥ ॥७॥ ॥ श्री॥

७१

॥अथरसंविनोद्तीयाअष्टकप्रारंभः॥

सं०न श्रीगणेशाय नमः॥ हरिः॥ ॐ॥ प्रजापतिरकामयत प्रजाः सृजेयेति स तपोऽतप्यत
१॥ स सर्पानसृजत सोऽकामयत प्रजाः सृजेयेति स द्वितीयमतप्यत स वयांस्य १
सृजत सोऽकामयत प्रजाः सृजेयेति स तृतीयमतप्यत स एतं दीक्षितवादमप
श्यत्तमवदत्ततो वै स प्रजा असृजत यत्तपस्तप्त्वा दीक्षितवादं वदति प्रजा एव
तद्यजमानः॥१॥ सृजते यद्वै दीक्षितोऽमेध्यं पश्यत्यपास्माद्दीक्षा क्राम
ति नीलमस्य हरो व्येत्यबद्धं मनो दरिद्रं चक्षुः सूर्यो ज्योतिषां श्रेष्ठो दीक्षे
मा मा हासीरित्याह नास्माद्दीक्षापक्रामति नास्य नीलं न हरो व्येति यद्वै ॥२॥
दीक्षितमभिवर्षति दिव्या आपोऽशान्ता ओजो बलं दीक्षां॥२॥ तपोऽस्य नि

र्न्स्युर्दत्ती वैत्तं धुनो जो धत्तु वत्तैं धत्त मामे दीक्षां मा तपो निर्वधिष्टेत्या
है तद्देव सर्वं मात्मं धत्ते नास्यो जो बलं न दीक्षां न तपो निर्घ्नन्त्यग्निर्वै दीक्षि
तस्य देवता सोऽस्मादेतर्हि तिर इव यर्हि याति तमीश्वरं रक्षांसि हन्तोः ॥३॥
भद्रादभिश्रेयः प्रेहि बृहस्पतिः पुरएता ते अस्त्वित्याह ब्रह्म वै देवानां बृहस्प
वा तिस्तमेवान्वारभते स एनं संपारयत्येदमगन्म देवयजनं पृथिव्या इत्याह
देवयजनं ह्येष पृथिव्या आगच्छति यो यजते विश्वे देवा यदजुषन्त पूर्व इ
त्याह विश्वे ह्येतद्देवा जोषयन्ते यद्ब्राह्मणा ऋक्सामाभ्यां यजुषा संतरन्त इ
त्याह ऋक्सामाभ्यां ह्येष यजुषा संतरति यो यजते रायस्पोषेण समिषा मदे

सं०९ देमेत्याह ... शिवमेवैनामारोसे ॥ यजमानो दीक्षाऽहं तौ ओ सुपाश्च तुर्वि
॥२॥ ऽस्रा तिस्य ॥ ७ ॥ १ ॥ एष ते गायत्रो भाग इति मे सोमाय ब्रूतादेष ते त्रैष्टुभो १
जागतो भाग इति मे सोमाय ब्रूताच्छंदोमानाऽसाम्राज्यं गच्छेति मे सोमा
य ब्रूताद्यो वै सोमऽराजानऽसाम्राज्यं लोकं गमयित्वा क्रीणाति गच्छ
ति स्वानाऽसाम्राज्यं छंदाऽसि खलु वै सोमस्य राज्ञः साम्राज्यो लोकः
पुरस्तात्सोमस्य क्रयादेवमभि मंत्रयेत साम्राज्यमेव ॥ १ ॥ एनं लोकं ग ॥१३॥
मयित्वा क्रीणाति गच्छति स्वानाऽसाम्राज्यं यो वै तानूनप्त्रस्य प्रतिष्ठां
वेद प्रत्येव तिष्ठति ब्रह्मवादिनो वदंति न प्राश्नंति न जुह्वत्यथ क्व ता

न्नं प्रतितिष्ठतीति प्रजापतौ मनसीति ब्रूयात्त्रिरद्याजिघ्रेत्प्र
जापतौ त्वा मनसि जुहोमीत्येषा वै तौन्न प्रस्य प्रतिष्ठा य
एवं वेद प्रत्येव तिष्ठति यः ॥२॥ वागध्वर्योः प्रतिष्ठां वेद प्रत्येव
तिष्ठति यत्तो मन्येत नाभिक्रम्य होष्यामीति तत्तिष्ठन्नाश्रावये
देषा वा अध्वर्योः प्रतिष्ठा य एवं वेद प्रत्येव तिष्ठति यदभिक्रम्य
जुहुयात्प्रतिष्ठाया इयात्तस्मात्समानत्र तिष्ठता होतव्यं प्रतिष्ठि
त्यै यो वा अध्वर्योः स्वं वेद स्ववानेव भवति स्रुग्वा अस्य स्वं वा

सं०९
।।३।। यज्ञमरस्य ।।२।। स्वं चमसोस्य स्वं यद्ग्राय व्यं वा चमसं वा नन्वारभ्याभि
षवे स्वादियात्तस्मादन्वारभ्याभिषव्यं स्वादेवमेतिर्यो वै सोमम प्रतिष्ठा
नः२ प्यस्तोत्रमुपाकरोत्यप्रतिष्ठितः सोमो भवत्यप्रतिष्ठितः स्तोमोऽप्रतिष्ठितान्युक्थान्य नि ३
प्रतिष्ठितो यजमानोऽप्रतिष्ठितोऽध्वर्युर्वायव्यं वै सोमस्य प्रतिष्ठा चमसो
स्य प्रतिष्ठा सोमः स्तोमस्य स्तोम उक्थानां ग्रहं वा गृहीत्वा चमसं वोन्नीय
स्तोत्रमुपाकुर्यात्प्रत्येव सोमं स्थापयति प्रति स्तोमं प्रत्युक्थानि प्रति ।।२।।
२ ष्ठति यजमानस्तिष्ठति प्रत्यध्वर्युः ।।४।। एवत्तिर्यो वा येमस्यमवे कामा वेश्ता हं ७
लिम्बा ।।२।। यज्ञं वा एतत्संभरन्ति यत्सोमक्रयण्यै पदं यज्ञमुखं हविर्धा

व्ये

नेयर्हि हविर्धाने प्राचीप्रवर्तयेयुस्तर्हि तेनाक्षमुपांज्याद्यज्ञमुखएवयज्ञ
मनुसंतनोतिप्राचमग्निंप्रहरेयुस्तत्पत्नीमानयेयुस्त्वन्वनारंसिप्रवर्त्तयेत्स
थवाअस्येषधिष्ण्योहीयतेसोनुध्यायतिसईश्वरोरुद्रोभूत्वा॥१॥
प्रजांपशून्यजमानस्यशमयितोर्यर्हिपशुमाग्नीध्रमुदंचंनयंतितर्हि
तस्यपशुश्रपणंहरेत्तेनैवैनंभागिनंकरोतियजमानोवाआहवनी
योयजमानंवाएतद्विकर्षंतेयदाहवनीयात्पशुश्रपणंहरंतिसवैनस्या
न्निर्मंथ्यंवाकुर्याद्यजमानस्यसात्मत्वाययदिपशोरवदानंनश्येदा
ज्यस्यप्रत्याख्यायमवद्येत्सैवततःप्रायश्चित्तिर्येपशुंविमथ्नीरन्य

सं॰ तै
॥४॥

स्तान्कामयेतार्तिमार्छेयुरिति कुविदंगेति नमोवृक्तिवत्यर्चाग्नीध्रे जु
हुयान्नमोवृक्तिमेवैषां वृंक्ते नार्तिमार्छति ॥२॥ भूत्वा ततः षड्विं
शतिश्च ॥३॥ प्रजापतेर्जायमानाः प्रजा जाताश्च या इमाः । तस्मै प्रति
प्रवेदय चिकित्वाँ अनुमन्यतां । इमं पशुं पशुपते ते अद्य बध्नाम्यग्ने सु ब ४
कृतस्य मध्ये । अनुमन्यस्व सुयजा यजाम जुष्टं देवानां । इदमस्तु हव्यं ।
प्रजानन्तः प्रतिगृह्णन्ति पूर्वे प्राणमंगेभ्यः पर्याचरन्तं । सुवर्गं याहि पथि
भिर्देवयानैरोषधीषु प्रतितिष्ठा शरीरैः । येषामीशे ॥१॥ पशुपतिः प ॥८॥
शूनां चतुष्पदामुत च द्विपदां । निष्क्रीतोऽयं यज्ञियं भागमेतु रायस्पोषा यजमा ग ८

मानस्यसंतु।येबध्यमानमनुबध्यमाना।अभ्यैक्षंतमनसाचक्षुषाच।अ
ग्निस्तां२ऽअग्रेप्रमुमोक्तुदेवःप्रजापतिःप्रजयासंविदानः।यआरण्याःप
शवोविश्वरूपाविरूपाःसंतोबहुधैकरूपाः।वायुस्तां२ऽअग्रेप्रमुमोक्तु
देवःप्रजापतिःप्रजयासंविदानः।प्रमुंचमानाः॥२॥भुवनस्यरेतोगा
तुंधत्तयजमानायदेवाः।उपाकृतं२ऽशशमानंयदस्थात्।जीवंदेवानामप्ये
तुपाथः।नानाप्राणोयजमानस्यपशुनायज्ञोदेवेभिःसहदेवयानः।
जीवंदेवानामप्येतुपाथःसत्याःसंतुयजमानस्यकामाः।यत्पशुर्मा
म॰२ युमकृतोरोवापद्भिराहते।अग्निर्मातस्मादेनसोविश्वान्मुंचत्वंहसः॥

सं० तृ०
२५ ॥
श्रा मिलारजुपेतनयज्ञं ॥ ३ ॥ देवेभिरन्विते ॥ पाश्रोत्प्रपुंप्रमुंचतबंधा १
धुज्ञपतिंरि ॥ आदितिः पाशांप्रमुमोक्तेतंनमः पशुभ्यः पशुपतयेकरो तेर
प२ मि ॥ अरातीयंतमधरंकृणोमि यंद्विष्मस्तस्मिन्प्रतिमुंचामिपाशां ॥
ते त्वामुनेहविरेहव्यवाहश्रलंकृतोरमुतयाज्ञियंच ॥ अग्नेसहस्वः
सलेनुहिंभूत्वाथहव्याजातवेदोजुषस्व ॥ जातवेदोवपयागच्छदे
वांत्वंहिहोताप्रथमोबभूथ ॥ घृतेनत्वंतनुवोवर्धयस्वस्वाहाकृ
तंहविरदंतुदेवाः ॥ स्वाहादेवेभ्योदेवेभ्यःस्वाहा ॥ ४ ॥ ईशेप्रजु ५५ ॥
चमानायुतत्वंषोडशाच ॥ ४ ॥ प्राजापत्यावेपत्रावस्तेघोरंग

द्रोः पिपर्तिर्यद्द्वे ताभ्यामुपाकरोति ताभ्यामेवैनं प्रतिप्रोच्यालभत
आत्मनोऽनाव्रस्काय द्वाभ्यामुपाकरोति द्विपाद्यजमानः प्रतिष्ठि
त्या उपाकृत्य पञ्च जुहोति पाङ्क्ताः पशवः पशूनेवावरुन्धे मृत्यवे वा ए वे
ष नीयते यत्पशुस्तं यदन्वारभेत प्रमायुको यजमानस्यान्नान्वारभ्यो
यजमानस्य पशुनेत्याहुर्व्याहृत्यै ॥ ३ ॥ यत्पशुर्मायुमकृतेति
जुहोति शान्त्यै शमितार उपेतेत्याह यथायजुरेवैतद्वपायां वा आ पाद
ह्रियमाणायामग्नेर्मेधोपक्रामाति त्वामुते दधिरे हव्यवाहमिति व
पामभि जुहोत्यग्नेरेव मेधमवरुन्धेऽथो शृतत्वाय पुरस्तात्स्वाहाकृते धे

।सं०तृ०

॥६॥

योवाअन्येदेवाउपरिषद्स्स्वाहुस्तयोन्येस्वाहादेवेभ्योदेवेभ्यःस्वा
हेत्यभिसौवर्पाञ्जुहोतितानेवोभयान्प्रीणाति॥२॥व्याहृत्याऽ
भिसौवर्पांपंचच॥३॥योवाअयथादेवतंयज्ञमुपचरस्यादेवता
भ्योवृश्च्यतेपापीयान्भवतियोयथादेवतंनदेवताभ्यआवृश्च्यतेवसी
यान्भवत्याग्नेय्यर्चाग्नीध्रमभिमृशेद्वैष्णव्याहविर्धानमाग्नेय्या
स्त्रुचोवायव्ययावायव्यान्यैन्द्रियासदोयथादेवतमेवयज्ञमुप
चरतिनदेवताभ्यआवृश्च्यतेवसीयान्भवतियुनज्मितेपृथिवीञ्ज्यो ॥६॥
तिषासहयुनज्मिवायुमंतरिक्षेण॥१॥तेनसहयुनज्मिवाचंसह

सूर्येण लेयु नप्सिं तिस्त्रो विष्टच्युः सूर्यस्य लो ॥ अग्निर्देवता गायत्री छंद
उपांशोः पात्रमसि सोमो देवता त्रिष्टुप्छंदो ऽन्तर्यामस्य पात्रमसी
इंद्रो देवता जगती छंद इंद्रवायुवोः पात्रमसि बृहस्पतिर्देवतानुष्टुप्
छंदो मित्रावरुणयोः पात्रमस्यश्विनौ देवता पंक्तिश्छंदो ऽश्विनोः पा
त्रमसि सूर्यो देवता बृहती ॥ २ ॥ छंदः शुक्रस्य पात्रमसि चंद्रमा दे
वता सतो बृहती छंदो मंथिनः पात्रमसि विश्वेदेवा देवता क्रिहा
छंद आग्रयणस्य पात्रमसी इंद्रो देवता ककुप्छंद उक्थानां पात्रम ६२
सि पृथिवी देवता विराट्छंदो ध्रुवस्य पात्रमसि २१ ॥ ३ ॥ अंतरिक्षेण
बृहती त्र्यंबिस्त्रिरात्र ॥ ६ ॥

सं०नृ०

।७१। इष्टर्गो वा अध्वर्युर्यजमानस्येष्टर्गुः खलु वै पूर्वोऽर्ष्टुः क्षीयत आसन्यान्मा
मंत्रात्पाहि कस्याश्चिदभिशस्त्या इति पुरा प्रातरनुवाकाज्जुहुयादात्मन
एव तदध्वर्युः पुरस्ताच्छर्म नह्यते नोत्तै संवेशाय त्वोपवेशाय त्वा गायत्र्यास्त्रि
या त्रिष्टुभो जगत्या अभिभूत्यै स्वाहा प्राणापानौ मृत्योर्मा पातं प्राणापा
नौ मा मा हासिष्टं देवत्रा सुवा एतेत्रा पापानयोः ॥१॥ व्यायच्छंते येषां सो
मः समृच्छंते संवेशाय त्वोपवेशाय त्वेत्याह छंदांसि वै संवेशा उपवेशाः छं
सि२ दोभिरेवास्य छंदांसि वृंक्ते प्रेति वंत्याज्यानि भवंत्यभिजित्यै मरुत्वतीः प्रति ॥७॥
पदो वि जित्या उभे बृहद्रथंतरे भवत इयं वा व रथंतरमसौ बृहदाभ्यामे

वै न मंतरे त्यद्य वा व रथंतरऽ२श्वो इदं द्या श्वादेवै न मंतरे निभूतं ॥ २ ॥ वाव
रथंतरं भविष्यद्बृहद्भूताद्वै वै नं भविष्यतः श्वो न रेति परिमितं वाव रथंतर
मपरिमितं बृहत्परिमितात्खलु वै नमपरिमिता श्वो नरेति विश्वामित्रज
मदग्नी वसिष्ठेनास्पर्धेताऽ२स एतज्जमदग्निर्विहव्यमपश्यत्तेन वै स व
सिष्ठस्येंद्रियं वीर्यमवृंक्त यद्विहव्यऽ२शस्यतइंद्रियमेव तद्वीर्यं यजमानो
भ्रातृव्यस्य वृंक्ते यस्य भूयाऽ२सो यज्ञक्रतव इत्याहुः स देवता वृंक्त इति य
द्यग्निष्टोमः सोमः परस्तात्स्यादुक्थ्यं कुर्वीत यद्युक्थ्यः स्यादतिरात्रं कुर्वी
त यज्ञक्रतुभिरेवास्य देवता वृंक्ते वसीयान्भवति ॥ ३ ॥ आपापानयोर्भूतं
वृंक्त्वा विऽ२शतिश्च ॥ ७ ॥

सं०तृ० गणान्मे तर्पयत ८
॥ ८ ॥ निग्राभ्यास्थ देवश्रुत आयुर्मे तर्पयत प्राणं मे तर्पयतापानं मे तर्पयत व्यानं मे
तर्पयत चक्षुर्मे तर्पयत श्रोत्रं मे तर्पयत मनो मे तर्पयत वाचं मे तर्पयता
त्मानं मे तर्पयताङ्गानि मे तर्पयत प्रजां मे तर्पयत पशून्मे तर्पयत गृहा
न्मे तर्पयत सर्वगणं मा तर्पयत तर्पयत मा ॥ १ ॥ गणा मे मा वितृषन्नोष
धयो वै सोमस्य विशो विशः खलु वै राज्ञः प्रदातोरीश्वरा ऐन्द्रः सोमो
वीवृधं वो मनसा सुजाता ऋतप्रजाता भग इद्वः स्याम । इन्द्रेण देवीर्वीरुधः
संविदाना अनु मन्यन्ताꣳ सवनाय सोमम् । इत्याहौषधीभ्य एवैनꣳ स्वायै ॥ ८
विशः स्वायै देवतायै निर्याच्याभि षुणोति यो वै सोमस्याभिषूयमाणस्य ॥ २ ॥

प्रथमोंऽशुस्कंदति सइंद्रियं वीर्यं प्रजां पशून्यजमानस्य निर्हंतो
स्तमभिमंत्रयेता मास्कान्त्सह प्रजया सह राय स्पोषेणेंद्रियं मे वीर्यं मा
निर्वधीरित्याशिषमेवैतामाशास्तइंद्रियस्य वीर्यस्य प्रजायै पशूनाम
निर्घाताय द्रप्सश्चस्कंद पृथिवीमनु द्यामिमं च योनिमनु यश्च पूर्वः॥
तृतीयं योनिमनु संचरंतं द्रप्सं जुहोम्यनु सप्त होत्राः॥३॥ तं पर्ययतमा
मिष्ट्वयमौपस्य यश्च द्रप्सोच॥८॥ यो वै देवान्देवयशसेनार्पयति मनुष्या
५५२ न्मनुष्ययशसेन देवयशस्येव देवेषु भवति मनुष्ययशसी मनुष्येषु यान्प्रा
चीनमाग्रयणाद्ग्रहान्गृह्णीयात्तानुपांशु गृह्णीयाद्यानूर्ध्वांस्तानुप

सं०९०
॥९॥ क्षुमंतो देवा नेवंतंदं वयं चासे ...नो र्पयत मनुष्यान्मनुष्ययशासे
नंदे वयं यशास्वेव देवेषु भवति मनुष्ययशासी मनुष्येषु ग्निः प्रातः सवने पातु
स्मा वैश्वानरो महिना विश्वशंभूः ॥ स नः पावको द्रविणं दधातु ॥ १ ॥ आ
युष्मंतः सहभक्षाः स्याम ॥ विश्वे देवा मरुत इंद्रो अस्मानस्मिं द्वितीये सवने न
जह्युः ॥ आयुष्मंतः प्रियमेषां वदंतो वयं देवानां सुमतौ स्याम ॥ इदं तृती
यं सवनं कवीनामृतेन ये चमसमैरयंत ॥ ते सौधन्वनाः सुवरानशानाः
स्विष्टिं नो अभि वसीयो नयंतु ॥ आयतनवती वा अन्या आहुतयो हूयंते ॥९
नायतना अन्या या आघारवती स्ता आयतनवतीयोः ॥ २ ॥ सौम्यास्त्रा

लि य एवं वेद धोधा वा पृथिवी एव च लेन व्युनासि नेसु ते उपजीवनीये भवत उपजीवनीयो भ २

अनोयत्नमा ऐ इवायुव माद्रायाधारमाधारयेदध्वरो यज्ञोयमस्तु देवा

ओषधीभ्यः पशवे नो जनाय विश्वस्मै भूतायाध्वरोऽसि स पिन्वस्व घृत

वद्देव सोमेति सोम्या एव तदाहुतीरायतनवतीः करोत्यायतनवान्भव

वति॥३॥ य एवं वेद षते रुद्र भागो यन्निरयाचथास्तं जुषस्व विदेर्गौप

त्यꣳ रायस्पोषꣳ सुवीर्यꣳ संवत्सरीणाꣳ स्वस्ति॥ मनुः पुत्रेभ्यो दायं व्य

भजत्स नाभानेदिष्ठं ब्रह्मचर्यं वसन्तं निरभजत्स आगच्छत्सोऽब्रवीत्क

था मा निरभागिति न त्वा निरभाक्षमित्यब्रवीदङ्गिरस इमे सत्रमास

ते ते॥४॥ सुवर्गं लोकं न प्रजानन्ति तेभ्य इदं ब्राह्मणं ब्रूहि ते सुवर्गं लोकं

सं० सू०
॥१०॥ यंतो य एषां पशवस्तान्वो दास्यंतीति तदेभ्योब्रवीत्ते सुवर्गं लोकं यंतो य
एषां पशव आसंस्तानस्मा अददुस्तं पशुभिश्चरंतं यज्ञवास्तौ रुद्र आ
गच्छत्सोब्रवीन्मम वा इमे पशव इत्यदुर्वै ॥५॥ मह्यमिमानित्यब्रवीन्न वै
३।१।९।४ तस्य त ईशत इत्यब्रवीद्यद्यज्ञवास्तौ हीयते मम वै तदिति तस्माद्यज्ञवास्तु नाभ्य
वेत्यं सोब्रवीद्यज्ञे मा भजाथ ते पशून्नाभि मंस्य इति तस्मा एतं
मंथिनः संस्रावमजुहोत्ततो वै तस्य रुद्रः पशून्नाभ्यमन्यत यत्रैत
मेवं विद्वान्मंथिनः संस्रावं जुहोति न तत्र रुद्रः पशूनभि मन्यते ॥६॥ रुद्रा ॥९॥
त्वा य एनं वत्सीयो उपजीवनीयो भवत उपजीवनीयो भवति ते दुर्वै यत्रै

तमेकोरुद्राय ॥ ९ ॥ जुष्टो वाचो भूयासं जुष्टो वाचस्पतये देवि वाक् ॥ यद्वा
चो मधुमत्तस्मिन्मा धाः स्वाहा सरस्वत्यै ॥ ऋचा स्तोमꣳ समर्धय गायत्रे
णरथंतरं ॥ बृहद्गायत्रवर्त्तनि ॥ यस्ते द्रप्स स्कंदति यस्ते अꣳशुर्बाहुच्युतो
धिषणयोरुपस्थात् ॥ अध्वर्योर्वा परि यस्ते पवित्रात्स्वाहा कृतमिंद्राय तं
जुहोमि ॥ यो द्रप्सो अꣳशुः पतितः पृथिव्यां परिवापात् ॥ पुरोडाशात्करं
भात् ॥ धानासोमान्मंथिन इंद्र शुक्रात्स्वाहा कृतमिंद्राय तं जुहोमि ॥
यस्ते द्रप्सो मधुमाꣳ इंद्रियावान्स्वाहाकृतः पुनरप्येति देवान् ॥ दिवः
पृथिव्याः पर्यंतरिक्षात्स्वाहा कृतमिंद्राय तं जुहोमि ॥ अध्वर्युर्वा क्रु

सं॰ तृ॰ त्विजां प्रथमो युज्यते तेन स्तोमो योक्तव्य इत्याह वागग्रेगा अग्र एत्वृजुगा दे
॥११॥ वेभ्यो यशो मयि दधती प्राणान्पशुषु प्रजां मयि ॥१॥ च यजमाने चेत्याह
व३ वाचमेवैतया यज्ञमुखे युनक्ति वास्तु वा एतद्यज्ञस्य क्रियते यद्ग्रहान्गृही
त्वा बहिष्पवमानं सर्पन्ति पराञ्चो हि यन्ति पराचीभिः स्तुवते वैष्णव्यर्चा पु
नरेत्योप तिष्ठते यज्ञो वै विष्णुर्यज्ञमेवाकर्विष्णो त्वं नो अन्तमः शर्म यच्छ
सहन्त्य ॥ प्र ते धारा मधुश्चुत उत्सं दुह्रते अक्षितमित्याह यदेवास्य
शयानस्योपशुष्यति तदेवास्यैतेनाप्याययति ॥२॥ परिवीपालजा ॥११॥
मयि दुह्रते चतुर्दश राच ॥१०॥ अग्निना रयिमश्नवत्पोषमेव दिवेदिवे ॥

यशसं वीरवत्तमं ॥ गोमाँ अग्ने विमाँ अश्वी यज्ञो नृवत्सखा सदमि
द्प्रमृष्यः ॥ इडावाँ एषो असुर प्रजावां दीर्घो रयिः पृथुबुध्नः सभावान् ॥
आप्यायस्व संते ॥ इह त्वष्टारमग्रियं विश्वरूपमुपह्वये ॥ अस्माकमस्तु के
वलः ॥ तन्नस्तुरीपमधपोषयित्नु देवत्वष्टर्विरराणस्यस्व ॥ यतो वीरः ॥१॥
कर्मण्यः सुदक्षो युक्तग्रावा जायते देवकामः ॥ शिवस्त्वष्टरिहागहि विभुः
पोष उत त्मना ॥ यज्ञे यज्ञे न उदव ॥ पिशंगरूपः सुभरो वयोधाः श्रुष्टी वीरो
जायते देवकामः ॥ प्रजां त्वष्टा विष्यतु नाभिमस्मे अथा देवानामप्येतु
पाथः ॥ अपो देव्या नो दिवः ॥ पीपिवांसं सरस्वतस्तनं यो विश्वद

सं०११
॥१२॥ रीलः॥ धुक्षीमहि प्रजामिषं॥२॥ येते सरस्व ऊर्मयो मधुमंतो घृतश्चुतः॥
तेषांते सुम्नमीमहे॥ यस्य व्रतं पशवो यंति सर्वे यस्य व्रतमुपतिष्ठंत आ
पः॥ यस्य व्रते पुष्टिपतिर्निविष्टस्तं सरस्वंतमवसे हुवेम॥ दिव्यं सुप
प०८ र्णं वयसं बृहंतमपां गर्भं वृषभमोषधीनां॥ अभीपतो वृष्ट्या तर्पयंतं तं
सरस्वंतमवसे हुवेम॥ सिनीवालि पृथुष्टुके या देवानामसि स्वसा॥
जुषस्व हव्यं॥३॥ आहुतं प्रजां देवि दिदिड्ढि नः॥ या सुपाणिः स्वंगुरिः सुषूमा
बहुसूवरी॥ तस्यै विश्पत्न्यै हविः सिनीवाल्यै जुहोतन॥ इंद्रं वो वि ॥१[illegible]
श्वतस्परीं इंद्रं नरः॥ असितवर्णा हरयः सुपर्णा मिहो वसाना दिव

मुत्पतंति॥ तआववृत्रन्सदनानिकृत्वादिस्पृथिवीघृतैर्व्युद्यते॥ हिरण्यके
शोरजसोविसारेहिर्धुनिर्वातइवध्रजीमान्शुचिभ्राजाउषसः॥ ६॥
नवेदायशस्वतीरपस्युवोनसत्याः॥ आतेसुपर्णाअमिनन्तएवैः कृ
ष्णोनोनाववृषभोयदीदं॥ शिवाभिर्नस्मयमानाभिरागात्पतंतिमि
हस्तनयंत्यभ्रा॥ वाश्रेवविद्युन्मिमातिवत्संनमातासिषक्ति॥ यदेषांवृ
ष्टिरसर्जि॥ पर्वतश्चिन्महिवृद्धोबिभायदिवश्चित्सानुरेजतस्वनेवः। यत्क्री
ळथमरुतः॥ ५॥ ऋष्टिमंतआपइवसध्रिचोधवध्वे॥ अभिक्रंदस्तन यं २
यगर्भमाधाउदन्वतापरिदीयारथेन॥ दृतिंसुकर्षविषितंन्यंचं
समाभवंतूद्वतोनिपादाः॥ त्वंत्याचिदच्युताग्नेपशुर्नयवसे॥ धामा

सं०९:

॥१३॥ इषयंते अजरवनेष्वंति श्रिकसः॥ अग्ने भूरीणि तव जातवेदो देव स्वधावो मृ
तस्य धाम॥ याश्च॥ ८॥ माया मायिनां विश्वमिन्व त्वे पूर्वीः संदधुः पृष्टबंधो॥ दि
वो नो वृष्टिं मरुतो ररीध्वं प्रपिन्वत वृष्णो अश्वस्य धाराः। अर्वाङेतेन स्तनयि
त्नुनेह्यपो निषिंचन्नसुरः पिता नः॥ पिन्वंत्यपो मरुतः सुदानवः पयो घृतवद्वि
दथेष्वाभुवः॥ अत्यं न मिहे वि नयंति वाजिनमुत्सं दुहंति स्तनयंतमक्षितं॥ उद्
वृतो मरुतस्ताः इयर्त वृष्टिं॥ ७॥ ये विश्वे मरुतो जुनंति॥ क्रोशाति गर्दा क
न्येव तुन्ना पेरुं तुंजाना पत्येव जाया॥ घृतेन द्यावापृथिवी मधुना समुक्षत प ॥१२॥
यस्वतीः कृणुताप ओषधीः॥ ऊर्जं च तत्र सुमतिं च पिन्वथ यत्रा नरो मरुतः
सिंचथा मधु॥ उदुत्यं चित्रं॥ और्वभृगुवच्छुचिमप्नवानवदाहुवे॥ अग्निं॥

संमुद्र्वा सरसी।। आसन्नः सवितुर्यथा भगस्येव भुजिं हुवे।। अग्निं संमुद्र्वा
सरसी।। हुवे वातः स्वनं कविं पर्जन्य क्रंद्युं सहः।। अग्निं संमुद्र्वा सरसी।। वीरइ
षं हव्यमुषसो मरुतश्च यद्दष्टिं भगस्य द्वादशा च।। प्रजापतिरेषतेयुजं वै प्रजाप
तेः प्राजापत्या यो वा अयं यथा देवतामिष्टं गौ नि ग्राम्यास्य यो वै देवं सुश्चे ग्निनारयि वा
मेकादश ।।११।। प्रजापतिः प्रजापतेजौ यमानाव्यायच्छेत मत्स्यमिमानाया नू
मायिनो हृदयं त्वा रिं रात्।। ।। हरिः।। ॐ।। हरिः ॐ ॥ यो वै पवमानानामन्वारोहान्वि
द्वान्यजतेनु पवमानानारोहति न पवमानेभ्यो वश्चियते श्येनोसि गायत्रछंदा अनुत्वा
रभे स्वस्ति मा संपारय सैसघासि जगतीछंदा अनुत्वारभे स्वस्ति मा संपारयेत्याहितेन।। १।।
सुपर्णोसि त्रिष्टुप्छंदा अनुत्वारभे स्वस्ति मा संपारय ×

सं॰ तृ॰
१८७॥

न्य एवं

वैपवमानानामन्वारोहास्तांन्विद्वान्यजतेनुपवमानानारोहतिनपवमाने
भ्योवछिद्यतेयोवैपवमानस्यसंततिंवेदसर्वमायुरेतिनपुरायुषःप्रमीयते
पशुमान्भवतिविंदतेप्रजांपवमानस्यग्रहागृह्यंतेथवाअस्यैतेगृहीताद्रो
णकलशआधवनीयःपूतभृत्तान्यदगृहीत्वोपाकुर्यात्पवमानंवि॥२॥छिं
द्यात्तंविछिद्यमानमध्वर्योःप्राणानुविछिद्यतोपयामगृहीतोसिप्रजा
पतयेत्वेतिद्रोणकलशमभिमृशेदिंद्रायेत्याधवनीयंविश्वेभ्यस्त्वादे ॥१४॥
वेभ्यइतिपूतभृतंपवमानमेवतत्संतनोतिसर्वमायुरेतिनपुरायुषःप्रमी

यतेप्रशुमान्भवतिविंदतेप्रजां॥३॥एतविद्विवत्वारिंःशत्राव॥१॥त्री
णिवावसवनान्यथतृतीयंःसवनमवलुंपंत्यनंःशुकुर्वंतउपांःशुं
हुत्वोपांःशुपात्रेंःशुमवास्यतंतृतीयसवनेपिसृज्याभिषुणुयाद्यदा
प्यायर्यतितेनांःशुमद्यदभिषुणोतितेनर्जीषिसर्वाण्येवतत्सवना
न्यःशुमंतिशुक्रवंतिसमावद्वीर्याणिकरोतिद्वौसमुद्रौविततावजू
र्यौपर्यावर्तेतेजठरेवपादाः।तयोःपश्यंतोअतियंत्यन्यमपश्यं
तः॥४॥सेतुनातियंत्यन्यं।द्वेद्रधसीसंततीवस्त्वेकः।केशीविश्वा

॥१५॥ भुवनानिविद्वान्। तिरोधायैत्यसितंवसानः शुक्रमादत्तेअनुहाय
जायै। देवावैयज्ञकुर्वततदसुराअकुर्वततेदेवाएतंमहायज्ञमप
पश्यंतमतन्वताग्निहोत्रंव्रतमकुर्वततस्माद्द्विव्रतस्याद्द्विरग्निहोत्रं
जुह्वतिपौर्णमासंयज्ञमग्नीषोमीयं॥२॥पशुमकुर्वतदार्शंयज्ञमा
ग्नेयंपशुमकुर्वतवैश्वदेवंप्रातःसवनमकुर्वतवरुणप्रघासान्मा
ध्यंदिनंसवनंसाकमेधान्पितृयज्ञंत्र्यंबकांस्तृतीयसवनम
कुर्वततमेषामसुरायज्ञमन्ववाजिगांसंतनान्ववायंतेऽभवन्नथ ॥१५॥

र्व्यावृत्मेदेवाअभूवन्नितितदध्वरस्याध्वरत्वंततोदेवाअभवन्प
रासुरायएवंविद्वान्सोमेनयजतेभवत्यात्मनापरास्यभ्रातृव्योभव
ति॥ ५॥ अपंदयंतोग्नीषोमीयमात्मनापराजीणिव॥ २॥ परिभूर
ग्निंपरिभूरिंद्रंपरिभूर्विश्वांदेवान्परिभूर्मां:सहब्रह्मवर्चसेनसनः
पवस्वशंगवेशंजनायशमर्वतेशं:राजन्नोषधीभ्योच्छिंनस्यतेरयि
पतेसुवीर्यस्यरायस्पोषस्यददितारस्याम।तस्यमेरास्वतस्यतेभ
क्षीयतस्यतइदमुन्मृजे।प्राणायमेवर्चोदावर्चसेपवस्वापानाय

व्यानायवाचे॥३॥ दक्षक्रतुभ्यांचक्षुर्भ्यांमिवर्चोदौवर्चसेपवेथांश्रो
त्रायात्मनेंगेभ्यआयुषेवीर्यायविष्णोरिंद्रस्यविश्वेषांदेवानांजठरम
सिवर्चोदामेवर्चसेपवस्वकोसिकोनामकस्मैत्वाकायत्वायत्वासो
मेनातीत्पंयंत्वासोमेनामीमदःसुप्रजाःप्रजयाभूयासंसुवीरो
वीरैःसुवर्चावर्चसासुपोषःपोषैर्विश्वेभ्योमेरूपेभ्योवर्चोदाः॥२॥
वर्चसेपवस्वतस्यमेरास्वतस्यतेभक्षीयतस्यतइदमुन्मृजे॥बृह
षन्नवेक्षेतेषवेपात्रीयःप्रजापतिर्यज्ञःप्रजापतिस्तमेवतर्पयति

सएनंतृप्तोभूत्याभिपवते ब्रह्मवर्चसकामोवैक्षेतैषवैपात्रियःप्र
जापतिर्यज्ञःप्रजापतिस्तमेवतर्पयतिसएनंतृप्तोब्रह्मवर्चसेना
भिपवतआमयावी॥३॥आवैक्षेतैषवैपात्रियःप्रजापतिर्यज्ञःप्र
जापतिस्तमेवतर्पयतिसएनंतृप्तआयुषाभिपवतेभिचरंनवैक्षे
तैषवैपात्रियःप्रजापतिर्यज्ञःप्रजापतिस्तमेवतर्पयतिसएनंतृ
प्तःप्राणापानाभ्यांवाचोदक्षक्रतुभ्यांचक्षुर्भ्यांश्रोत्राभ्यामात्म
नोंगेभ्यआयुषोंतरेतिताजक्प्रधन्वति॥४॥वानेरूपेभ्योवचोंदा

ओमयावीपंचचत्वारिंशश्च ॥ २ ॥ स्फ्यस्वस्तिर्विघनः स्वस्तिःपर्शु
र्वेदिः परशुर्नः स्वस्ति ॥ यज्ञियायज्ञकृतस्थतेमास्मिन्यज्ञउपह्व
यध्वमुपमाद्यावापृथिवी ह्वयेतामुपास्तावः कलशः सोमोऽग्नि
रुपदेवाउपयज्ञउपमाहोत्राउपह्वयंतांनमोऽग्नयेमखघ्ने
मखस्यमायशोर्यादित्याहवनीयमुपतिष्ठतेयज्ञोवैमखः ॥ १ ॥
यज्ञंवावसतद्दहंतस्माएवंनमस्कृत्यसदः प्रसर्पत्यात्मनोनार्त्यै
नमोरुद्रायमखघ्नेनमस्कृत्यामापाहीत्याग्नीध्रंतस्माएवंनम ॥१७॥

स्कृत्यसदःप्रसर्पत्यात्मनोनार्त्यैनमइंद्रायमखघ्नइंद्रियंमेवीर्यं
मानिर्वधीरि[illegible]तिहोत्रीयमाशिषमेवैतामाशास्तइंद्रियस्यवी
र्यस्यानिर्घाताययावै॥२॥देवताःसदस्यामार्तिमार्पयंतियस्ता
विद्वान्प्रसर्पतिनसदस्यामार्तिमार्छतिनमोग्नयेमखघ्नइत्याह
तावेदेवताःसदस्यामार्तिमार्पयंतितायएवंविद्वान्प्रसर्पतिनसद
स्यामार्तिमार्छतिदृढेस्थःशिथिरेसमीचीमांहसस्पातंसूर्यो
मादेवोदिव्यादंहसस्पातुवायुरंतरिक्षात्॥३॥अग्निःपृथि

व्यायमः पितृभ्यः सरस्वतीमनुष्येभ्योदेवीद्वारोमामासंतापंन
मः सदसेनमः सदसस्पतयेनमः सखीनांपुरोगाणांचक्षुषेनमो
दिवेनमः पृथिव्याअहेदेधिषव्योदतास्तिष्ठान्यस्यसदनेसीदयो
स्मत्पाकतरउन्निवतउदुद्वतश्चगेषंपातंमाद्यावापृथिवीअद्या
न्हः सदोवेप्रसर्पतं॥ ९॥ पितरोनुप्रसर्पंतितएनमीश्वराहिंसि
तोः सदः प्रसर्प्य दक्षिणार्धंपरेक्षेतागतापितरः पितृमानहंयुष्मा
भिर्भूयासं सुप्रजसोमयायूयंभूयास्तेतितेभ्यएवनमस्कृत्यस

द्ःप्रसर्पत्स्वात्मनोनार्त्यै ११ ॥५॥ मरुत्वावान्ऽअंतरिक्षात्समसर्पतंनयस्विनः
प्रावृ॥४॥भक्षेहिमाविशदीर्घायुत्वायशंतनुत्वायरायस्पोषायवर्च
सेसुप्रजास्त्वायेहिवसोपुरोवसोप्रियोमेहृदोस्यश्विनोस्त्वाबाहुभ्यां
सघ्यासंनृचक्षसंत्वादेवसोमसुचक्षाऽअवख्येषंमंद्राभिभूतिःके
तुर्यज्ञानांवाग्जुषाणासोमस्यतृप्यतुमंद्रास्वर्वाच्यदितिरनाहतशी
र्ष्णीवाग्जुषाणासोमस्यतृप्यत्वेहिविश्वचर्षणे॥३॥शंभूर्मयोभूःस्व
क्र स्तिमाहरिवर्णप्रचरक्रत्वेदक्षायरायस्पोषायसुवीरतायैमामाराज

न्विबीभिषोमामेहार्दित्विषावधीः॥ वृषणेशुष्मायायुषेवर्चसे॑ वसुम
द्गणस्यसोमदेवतेमतिविदः प्रातःसवनस्यगायत्रछंदसइंद्रपीत
स्यनराशंसपीतस्यपितृपीतस्यमधुमतउपहूतस्योपहूतोभक्ष
यामिरुद्रवद्गणस्यसोमदेवतेमतिविदोमाध्यंदिनस्यसवनस्य
त्रिष्टुप्छंदसइंद्रपीतस्यनराशंसपीतस्यपितृपीतस्यमधुमतउ ॥२॥
पहूतस्योपहूतोभक्षयाम्यादित्यवद्गणस्यसोमदेवतेमति विद
स्तृतीयस्यसवनस्यजगतीछंदसइंद्रपीतस्यनराशंसपीतस्यपि ॥३९॥

त्पीतस्यमधुमतउपहूतस्योपहूतोभक्षयामि॥ आप्यायस्वसमेतु
तेविश्वतःसोमवृष्णियं। भवावाजस्यसंगथे॥ हिन्वमेगात्राहरिवोगणा
न्मेमाविततृपः॥ शिवोमेसप्तर्षीनुपतिष्ठस्वमामेवाङ्नाभिमति॥ २॥
गाः। अपामसोमममृताअभूमादर्म्मज्योतिरविदामदेवान्॥ किम
स्मान्कृणवदरातिःकिमुधूर्तिरमृतमर्त्यस्य॥ यन्मआत्मनोमिंदाभू
दग्निस्तत्पुनराहार्जातवेदाविचर्षणिः। पुनरग्निश्चक्षुरदात्पुनरिंद्रो
बृहस्पतिः। पुनर्मेअश्विनायुवंचक्षुराधत्तमक्ष्योः। इष्टयजुषस्तेदेव

सोमस्तुतस्तोमस्य॥ ४॥ शस्तोकथस्यहरिवतइंद्रपीतस्यमधुमतउ
पहूतस्योपहूतोभक्षयामि॥ आपूर्यास्थामापूरयतप्रजयाचधने
नच॥ एतत्तेततयेचत्वामन्वेतत्तेपितामहप्रपितामहयेचत्वामन्वे
तपितरोयथाभागंमंदध्वंनमोवः पितरोरसायनमोवः पितरःशुष्मा
यनमोवः पितरोजीवायनमोवः पितरः॥ ५॥ स्वधायैनमोवः पितरो
मन्यवेनमोवः पितरोघोरायपितरोनमोवोयएतस्मिंल्लोकेस्थ
युष्मांस्तेनुयेस्मिंल्लोकेमांतेनुयएतस्मिंल्लोकेस्थयूयंतेषांवसि ॥ २०॥

स्वाभूयास्त्वयेस्मिन्लोकेहंतेषांवासिष्ठाभूयासंप्रजापतेनत्वदे
तान्यन्योविश्वाजातानिपरिताबभूव॥६॥यत्कामास्तेजुहुम
स्तंनोअस्तुवयंस्यामपतयोरयीणां॥देवकृतस्यैनसोवयजन
मसिमनुष्यकृतस्यैनसोवयजनमसिपितृकृतस्यैनसोवय
जनमस्यप्सुधौतस्यसोमदेवतेनृभिः सुतस्येष्टयजुषस्तुतस्तो॥
मस्यशस्तोक्थस्ययोभक्षोअश्वसनिर्योगोसनिस्तस्यतेपितृ
भिर्भक्षितंकृतस्योपहूतस्योपहूतोभक्षयामि॥७॥विश्वचर्षणेवि

संत ॥२१॥

द्विया २

इषूर्ध्वंदसइंद्रपीतस्यनराशंसपीतस्यातिस्तुतस्तोमस्ययजी
वायनमोवःपितरोबभूवचतुश्चत्वारिंशःशाखा॥५॥महीनांप
योसिविश्वेषांदेवानांतनूर्ऋध्यासमद्यपृषतीनांग्रहंपृषती
नांग्रहोसिविष्णोर्हृदयमस्यकमिषविष्णुस्त्वानुविचक्रमे भू
तिर्दध्नाघृतेनवर्धतांतस्यमेष्टस्यवीतस्यद्रविणमागम्याज्यो
तिरसिवैश्वानरंपृश्निय्यैदुग्धंयावतीद्यावापृथिवीमहित्वायाव
च्चसप्तसिंधवोवितस्थुः।तावंतमिंद्रते॥१॥ग्रहंसहोर्जागृह्णा ॥२१॥

छिद्रा अस्य प्रमायुकास्युर्यच्छ्रावमृते

स्यस्तत्। यत्क्षश्राकुनः पृषदाज्यमेवमृत्योऽश्चतुष्पादोस्य पशवः

प्रमायुकास्युर्यत्स्कंदेद्यजमानः प्रमायुकस्यात्पशवोवैपृषदाज्यं

पशवोवाएतस्कंदंतियस्यपृषदाज्यंस्कंदतियत्पृषदाज्यं

पुनर्गृह्णातिपशूनेवास्मैपुनर्गृह्णातिप्राणोवैपृषदाज्यंप्राणो

वै॥२॥एतस्यस्कंदतियस्यपृषदाज्यंस्कंदतियत्पृषदाज्यंपु

नर्गृह्णातिप्राणमेवास्मैपुनर्गृह्णातिहिरण्यमवधायगृह्णात्यमृ

तंवैहिरण्यंप्राणःपृषदाज्यममृतमेवास्यप्राणेदधातिशतमानं

भवतिशतायुःपुरुषःशतेंद्रियआयुष्येवेंद्रियेप्रतितिष्ठत्यश्वमव
घ्रापयतिप्राजापत्योवाअश्वःप्राजापत्यःप्राणस्वादेवास्मैयोनेः
प्राणंनिर्मिमीतेविवाएतस्यय ज्ञश्छिद्यतेयस्यपृषदाज्य
ंस्कंदतिवैष्णव्यर्चापुनर्गृह्णातियज्ञोवैविष्णुर्यज्ञेनैवयज्ञंसंत
नोति॥ २॥ तेपृषदाज्यंप्राणोवैयोनेःप्राणंद्वाविंशतिश्च॥ ६॥ दे
वसवितरेतत्तेप्राहतत्प्रचसुवप्रचयजबृहस्पतिर्ब्रह्मायुष्मत्याऋ
चोमागातनूपात्साम्नःसत्यावआशिषःसंतुसत्याआकूतयऋ

तंचसत्संचंवदनस्तुतदेवस्यसवितुः प्रसवस्तुतस्यस्तुतमस्यूर्जमिद्य
ःस्तुतंदुहामामास्तुतस्यस्तुतगम्याः ञ्छस्त्रस्यशस्त्रं॥१॥ अस्यूर्जमिद्य
ःशस्त्रंदुहामामाशस्त्रस्यशस्त्रंगम्यादिदंहूयावंतावनामहेधुक्षीम
हिप्रजामिषं॥ सामसत्याशीर्दिविषुभूयाद्ब्रह्मवर्चसंसमागम्यात॥ यज्ञो
बभूवसआबभूवसप्रजज्ञेसवावृधे॥ सदेवानामधिपति[illegible]र्बभूव
सोअस्माँ अधिपतीन्करोतुवयंस्यामपतयोरयीणां॥ यज्ञोवा
वे॥२॥ यज्ञपतिंदुहयज्ञपतिर्वायज्ञंदुहसयस्तुतन्नशास्त्रयादहिम

संत व द्विध्या २

२२॥ विद्वान्यजतेतंयज्ञोदुहेसदुग्धापापीयान्भवतियएनंयोदोहंविद्वान्यज
इ२ तेसयज्ञंदुहेसह्वावसीयान्भवतिस्तुतस्यस्तुतमस्यूर्जंमह्यंस्तुतं २
दुहामामास्तुतस्यस्तुतंगम्याःशस्त्रस्यशस्त्रमस्यूर्जंमह्यंशस्त्रंदु
हामामाशस्त्रस्यशस्त्रंगम्याइत्याहैषवैस्तुतशस्त्रयोदोहस्तयए
वंविद्वान्यजतेदुहएवयज्ञमिष्ट्वावसीयान्भवति॥ २॥ शस्त्रैवैशस्त्र व ५
दुहांदाविंशस्त्रातिश्च॥ ७॥ देयपनासपत्नेन्स्वाहावट्स्वयमभिगूर्ता
यनमोविष्टंभायधर्मणेस्वाहावट्स्वयमभिगूर्तायनमःपरिधये
॥ २२॥

जनप्रथनायस्वाहावट्त्वयमभिगूर्तायनमऊर्जेहोत्राणांस्वा
हावट्त्वयेमःपयसेहोत्राणांस्वाहावट्त्वयेमःप्रजापतयेम
नवेस्वाहावट्त्वयमभिगूर्तायनमऋतमृतपाःसुवर्वाट्स्वाहा
वट्त्वयमभिगूर्तायनमस्तृम्पन्तांहोत्रामधोर्घृतस्ययज्ञपतिमृ
षयएनसा॥१॥आकूः॥प्रजानिर्भक्ताअनुतप्यमानामधव्यौ
स्तोकावपतौरराध।सन्नस्ताभ्यांसृजतुविश्वकर्माघोराऋ
षयोनमोअस्त्वेभ्यः।चक्षुषएषांमनसश्चसंधौबृहस्पतयेमहि

षष्ठुमं नमः। नमो विश्वकर्मणे स उ पात्वस्मानन्न्यान्सोमपान्मन्य
मानः। प्राणस्य विद्वान्त्समरे न धीर एनश्चकृवान्महि बद्ध एषां। तं
विश्वकर्मन्॥ २॥ प्रमुञ्चा स्वस्तये ये भक्षयंतो न वसून्यानृहुः। यान
ग्नयोन्वतप्यंत धिष्णिया इयं तेषामवया दुरिष्ट्यै स्विष्टिं नस्तां कृ
णोतु विश्वकर्मा। नमः पितृभ्यो अभि ये नो अख्यन्यज्ञकृतो यज्ञ
कामाः सुदेवा अकामा वो दक्षिणां न॥ ३॥ नयदेभ्यो विश्व्यतु यद्दे
श्वकर्मणा नि जुहोति सद्दस्यानव तक्षीणात्यस्मे देवासो वपुषे ॥२६॥

२४ अन्नीं निमु मानुस्त्रस्मा देनेत [illegible] दक्षिण्या स्तेभ्यो यो दक्षिणा ४२

चिकित्सतयमा। शिवादंपतीवाममश्नुतः॥ पुमान्पुत्रोजायते
विंदतेवस्वथविश्वेअरपाएधतेगृहः। आशीर्दयादंपतीवा
ममश्नुतामरिष्टोरायःसचतांःसमोकसा। यत्रासिंचुत्संदु
ग्धंकुंभ्यासहेष्टेनयामन्नमतिंजहातुसः॥ सर्पिर्ग्रीवी॥ ६॥ पी
वर्यस्यजायापीवानःपुत्राअकृशासोअस्य। सहजानिर्यःसु
मखस्यमानइंद्रायाशिरंःसहकुंभ्यादातुं॥ आशीर्मऊर्ज
मुतसुप्रजास्त्वमिषंदधातुद्रविणंःसवर्चसं। संजयन्क्षेत्रा

संत

॥२५॥

द्विप्या२

णिसहस्साह मिंद्रकृण्वानोअन्याःअधरान्त्सपत्नान्॥ भूतम
सि भूते मा धा मुखमसि मुखं भूयासं द्यावापृथिवीभ्यां त्वा परि
गृह्णामि विश्वेत्वा देवा वैश्वानराः॥५॥अच्यावयंतु दिवि देवा दृं
हांतरिक्षे वयाःसि पृथिव्यां पार्थिवा ध्रुवं ध्रुवेण हविषावसोमं
नयामसि॥ यथा नः सर्वमिज्जगदयक्ष्मःसुमना असत्॥ य
थान इंद्र इद्विशः केवलीः सर्वाः समनसः करत्॥ यथान सर्वा
इद्दिशोअस्माकं केवलीरसन्॥ एनसाविश्वकर्मन्योदक्षिणा॥२५॥
॥६॥

नसर्पिर्ग्रीवीवैश्वानरश्चत्वारिंशाक्षं॥८॥ यद्वैहोताध्वर्युमभ्याह्वयते
वज्रमेनमभिप्रवर्तयत्युक्थशाइत्याहप्रातःसवनंप्रतिगीर्यत्रीण्ये
तान्यक्षराणित्रिपदागायत्रीगायत्रंप्रातःसवनंगायत्र्यैवप्रातःस
वनेवज्रमन्तर्धत्तउक्थंवाचीत्याहमाध्यंदिनंसवनंप्रतिगीर्यचत्वार्ये
तान्यक्षराणिचतुष्पदात्रिष्टुप्त्रैष्टुभंमाध्यंदिनंसवनंत्रिष्टुभैवमा
ध्यंदिनेसवनेवज्रमन्तर्धत्ते॥१॥उक्थंवाचीन्द्रायेत्याहतृतीयसवनं
प्रतिगीर्यसप्तैतान्यक्षराणिसप्तपदाशक्वरीशाक्वरोवज्रोवज्रेणैवतृ

नीयसवनेवज्ज्रंमंतर्देचेद्देतेवाद्दिनोवदंतिसलाम्भेध्वर्युस्याघोयथा
सवनंप्रतिगरश्छंदांसिसंपादयेत्तेजःप्रातःसवनमालंदधीतें
द्रियंमाध्यंदिनेसवनेपशूंस्तृतीयसवनइत्युक्थशाइत्साहमा
तःसवनंप्रतिगीर्यत्रीण्येतान्यक्षराणि॥२॥त्रिपदागायत्रीगाय
त्रंप्रातःसवनएवप्रतिगरश्छंदांसिसंपादयन्यथातेजोवैगाय
त्रीतेजःप्रातःसवनंतेजएवप्रातःसवनआलंधत्तउक्थंवाचीत्या
हमाध्यंदिनंसवनंप्रतिगीर्यचत्वार्येतान्यक्षराणिचतुष्पदात्रि ॥२७६॥

२ प्रातःसवनं ×२

ष्टुप्त्रैष्टुभंमाध्यंदिनंसवनंमाध्यंदिनएवसवनेप्रतिगरेछंदांसि
संपादयत्यथोइंद्रियंवैत्रिष्टुगिंद्रियंमाध्यंदिनंसवनं॥ २॥
इंद्रियमेवमाध्यंदिनेसवनआलंभंतउक्थंवाचीदित्याहतृ
तीयसवनंप्रतिगीर्यसप्तैतान्यक्षराणिसप्तपदाशाक्वरीशाक्व
राःपशवोजागतंतृतीयसवनंतृतीयसवनएवप्रतिगरेछंदांसि
सिसंपादयत्यथोपशवोवैजगतीपशवस्तृतीयसवनंपशूनेव
तृतीयसवनआलंभंतेयद्वैहोताध्वर्युमभ्याह्वयेआव्यमस्मिं
त

दधातितद्घ्नन्न॥४॥अपहनीतपुरास्यसंवत्सराद्गृहआवेवीरन्क्षे
ऽसामोदद्वेतिप्रत्याह्वयतेनैवतदपहतेयथावाआयतांप्रती
क्षेतएवमध्वर्युःप्रतिगरंप्रतीक्षतेयदभिप्रतिगृणीयाद्यथायत
यासमृच्छेतताहृगेवतत्सबाहूवाकुलिजामुज्झीथाउज्झीथएवा
ऽऽलणां॥५॥ऋचःप्रणवउक्थवीर्यांसिनाप्रतिगरोध्वर्यूणांय
एवंविद्वान्प्रतिगृणात्यसंनादएवमेवत्सास्यप्रजायांवाजीजाय
तद्रूपंवैहोतासावध्वर्युर्यदासीनःशंसत्यस्याएवतद्धोतानैसा ॥२७॥

४४ घ्नरर्पूर्वहुपैतयथाधावद्रोहीयंतेताटसेषत४७

स्तेद्वहीयमथो द्दमामेवतेन यजमानोदुहेयन्निष्ठन्प्रतिगृणात्यमु

ष्याएवतदध्वर्युर्नैति॥ ६ ॥ तिष्ठतीवह्यसावथो अमूमेवतेन यजमा

नोदुहे यदासीनःशंसतितस्मादितःप्रदानंदेवाउपजीवंतियत्ति

ष्ठन्प्रतिगृणातितस्मादमुतःप्रदानमनुष्याउपजीवंतियत्प्राङा

सीनःशंसतिप्रत्यङ्तिष्ठन्प्रतिगृणातितस्मात्प्राचीनंरेतोधी

यतेप्रतीचीःप्रजाजायंतेयद्वैहोताध्वर्युमभ्याह्वयतेवज्रमेनमभि

प्रवर्तयतिपराङ्‌पर्वर्ततेवज्रमेवतन्निकरोति॥ ७ ॥ सर्वेनवज्रमेतद्धं

तेत्रीण्येतान्यक्षराणीद्रियंमाध्यंदिनꣳसवनंनोज्ञातृणामध्वर्युर्नि
र्तिवर्तयस्वैच॥१॥उपयामगृहीतोसिवाक्षसदसिवाक्पाभ्यां
त्वाक्रतुपाभ्यामस्ययज्ञस्यध्रुवस्याध्यक्षाभ्यांगृह्णाम्युपयामगृ
हीतोस्यृतसदसिचक्षुष्पाभ्यांत्वाक्रतुपाभ्यामस्ययज्ञस्यध्रुवस्या
ध्यक्षाभ्यांगृह्णाम्युपयामगृहीतोसिश्रुतसदसिश्रोत्रपाभ्यांत्वा
क्रतुपाभ्यामस्ययज्ञस्यध्रुवस्याध्यक्षाभ्यांगृह्णामिदेवेभ्यस्त्वा
विश्वदेवेभ्यस्त्वाविश्वेभ्यस्त्वादेवेभ्योविष्णवुरुक्रमैषतेसोमस्तꣳ

रक्षस्व॥१॥ तंतेदुश्चक्षामावरव्यन्मयिवसुः पुरोवसुर्वाक्पावाचंमे
पाहिमयिवसु र्विदद्वसुश्चक्षुष्पाश्चक्षुर्मेपाहिमयिवसुः संयद्वसु
श्रोत्रपाःश्रोत्रंमेपाहिभूरसिश्रेष्ठोरश्मीनांप्राणपाःप्राणंमेपाहि
धूरसिश्रेष्ठोरश्मीनामपानपाअपानंमेपाहियोनइंद्रवायूमित्रा
वरुणावश्विनावभिदासतिभ्रातृव्यउत्पिपीतेशुभस्पतीइदमहं
तमधरंपादयामियथेंद्राहमुत्तमश्चेतयानि॥२॥रक्षस्वाग्नादे
व्युरत्नयोदन्नाच॥१०॥ प्रसोअग्नेतवोतिभिःसुवीराभिस्तरतिवा

॥२९॥ जं कर्मभिः। यस्य त्वं सख्यमाविथ॥ प्र होत्रे पूर्व्यं वचोऽग्नये भरता
बृहत्। विपां ज्योतींषि बिभ्रते न वेधसे॥ अग्ने त्री ते वाजिना त्री षध
स्था। तिस्रस्ते जिह्वा ऋतजात पूर्वीः। तिस्र उ ते तन्वो देववातास्ता
भिर्नः पाहि गिरो अप्रयुच्छन्॥ सं वां कर्मणा समिषा॥१॥ हिनोमी
न्द्राविष्णू अपसस्पारे अस्य॥ जुषेथां यज्ञं द्रविणं च धत्तमरिष्टैर्नः प
थिभिः पारयन्ता॥ उभा जिग्यथुर्न परा जयेथे न परा जिग्ये कतरश्च
नैनोः। इन्द्रश्च विष्णो यदपस्पृधेथां त्रेधा सहस्रं वि तदैरयेथां॥ त्रीण्या ॥२९॥

यूंषितवजातवेदस्तिस्रआजानीरुषसस्तेअग्ने॥ ताभिर्देवाना
